N. A.

1) Jabalg'cupanishad (जाबालेयुपनिषद्) 1-12
2) Shaivaratnakar (शैवरत्नाकर) 1-47
3) Lingarchan chandrika (लिंगार्चन चंद्रिका) 1-45

Sanskrit — Combina volume

Paper - Handwritten

N. A. (very old)

104 Folio

14.5" x 5.8"

Complete



जा॰बा॰
१

श्रीगणेशाय नमः ॐ भद्रं कर्णेभिरिति शांतिः ॐ आपो वा इदमासन्सलिलमेव तत्प्रजापतिरेकः पुष्करपर्णे भुसुंडः समभवत् तस्यांतर्मनसि कामः समवर्त
त इदं सृजेयमिति तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदति तत्कर्मणा करोति तदेषाभ्युक्ता कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् सतो बं
धुमसति निरविंदन् हृदि प्रतीष्या कवयो मनीषेति उपैनं तदुपनमति यत्कामो भवति य एवं वेद स तपोऽतप्यत स तपस्तप्त्वा स एतं भुसुंडः कालाग्निरुद्रमगमत् आग
त्य भो विदातः विभूतिमाहात्म्यं ब्रूहीति होवाच तथेति प्रत्यवोचत् भुसुंड उच्यमानं किमिति विभूतिमाहात्म्यं रुद्रस्य योगमाहात्म्यम् बभाषेति आदावेव पंचब्रह्मत्वादेतस्य हो
तमिति तत्स्थूलसूक्ष्मेवेतितस्योर्ध्वलिंगं वदामीति बृहज्जाबालाभिधां मुक्तिश्रुतिं ममोपदेशं कुरुष्वेति ॐ तथेति सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः भवे भवेना
तिभवे भजस्व मां भवोद्भवाय नमः यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्वं स नो देवः शुभया स्मृत्या संयुनक्तु सद्योजातात्पृथि
वी तस्याः निवृत्तिः तस्याः कपिलवर्णा नंदा तस्या गोमयेन विभूतिर्जाता वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बल
विकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ततः परं ब्रह्मपरं बृहंतं यथानिकायं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टि
तारमीशं तं ज्ञात्वामृता भवंति वामदेवादुदकं तस्मात्प्रतिष्ठा तस्याः कृष्णवर्णा सुभद्रा तस्या गोमयेन भसितं जातं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः स
र्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः शिवेभ्यः सर्वे निर्गुणाभासं सर्वोन्नूयविवर्जितम् सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् अघोराद्वह्निः तस्माद्विद्या तस्या रक्तवर्णा
सुरभिर्जाता तस्या गोमयेन भस्म जातं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् अथापाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः सर्ववेत्ति

वेदं वचनस्यास्ति वेत्तारं मां दृश्यं पुरुषं महान्तं तमपुरुषा द्वापुः तस्माज्ज्योतिः तस्माच्छ्वेतवर्णा सुरभी त्वाजाता तस्या गोमयेन त्वारं जाते ईशानः सर्वविद्यानामीश्वरः सर्वभूता
नां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् तत्पुरुषोऽस्मत ईशसंस्थोऽतः सर्वगो भुवनस्यास्य गोप्ता परेशो ऽस्य जगतोऽनित्यमेव नान्यो हेतुर्विद्यते ईश
नाप यो ब्रह्मणां विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनम् अमृतस्य परं सेतुं
दग्धेंधनमिवानलम् ईशानादाकाशं तस्माच्छ्वासमीनात तस्याश्चित्रवर्णा सुमनाजाता तस्या गोमयेन त्वाजाता विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः भवेति पंच नामानि पंच
भिर्हेतुभिर्मन्त्र सैश्वर्यकरणाद्भूतिर्भस्म सर्वाघभक्षणात् भासनाद्भसितं प्रोक्तं क्षारणात्क्षारमापदाम् भूतप्रेतपिशाचब्रह्मराक्षसापस्मारसंसारभयभीतिभ्योऽभिरक्षणाद्रक्षे
ति इति मुक्तिस्तुत्यभिधेयां बृहज्जाबालोपनिषदि प्रथमं ब्राह्मणम् अथ भुसुंडः कालाग्निरुद्रमग्नीषोमात्मकं भस्मस्नानविधिं प्रपच्छ स होवाच अग्निर्यथैको भुवनं प्रविष्टो रूपं रूप
प्रतिरूपो बभूव एकं भस्म सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च आग्नीषोमात्मकं विश्वमित्यग्निराचक्षते रौद्री घोरा या तेजसी तनुः सोमः शक्त्यमृतमयः शक्तिकरी तनुः अ
मृतं यत्प्रतिष्ठा सा तेजो विद्याकला स्वयम् स्थूलसूक्ष्मेषु भूतेषु स एव रसतेजसी द्विविधा तेजसो वृत्तिः सूर्यात्मा चानलात्मिका तथैव रसवृत्तिश्च सोमात्मा च जलात्मिका वैद्युता
दिमयं तेजो मधुरादिमयो रसः तेजोरसविभेदैस्तु प्रभवेतच्चराचरम् अग्नेरमृतनिष्पत्तिरमृतेनाग्निरेधते अत एव हविः क्लृप्तमग्नीषोमात्मकं जगत् हविषा सम्प्रसंपत्तिर्वृद्धिः सस्या
भिवृद्धये वृष्टिश्च हविस्तस्मादग्नीषोमात्मकं जगत् ऊर्ध्वशक्तिमयः सोमो ऽधः शक्तिमयोऽनलः आभ्यां संपुटितं तस्माच्छश्वद्विश्वमिदं जगत् अग्नेरूर्ध्वं ज्वलत्येवो यावत्सौ
म्यं परामृतं यावदग्न्यात्मकं सौम्यममृतं विसृजत्यधः अतो वह्निश्च कालाग्निरधस्ताच्छक्तिरूर्ध्वगा यावदादहनश्चोर्ध्वमधस्तात्प्लवनं भवेत् आधारशक्त्या वधृतः कालाग्निरयमूर्ध्वे

गः तथैव निम्नगः सोमः शिवशक्तिपदास्पदः शिवश्चोर्ध्वमधः शक्तिरूर्ध्वं शक्तिरधः शिवः तदित्थं शिवशक्तिभ्यां नाव्याप्तमिह किंचन असकृच्चाग्निना दग्धं जगत्तद्भस्मसात्कृ
तम् अग्नेर्वीर्यमिदं प्राहुस्तद्वीर्यं भस्म यत्ततः यश्चेत्थं भस्मसद्भावं ज्ञात्वाभिस्नाति भस्मना अग्निरित्यादिभिर्मन्त्रैर्दग्धपाशः स उच्यते अग्नेर्वीर्यं तु तद्भस्म सोमेनाप्लावितं पु
नः अयोगयुक्त्या प्रकृतेरधिकाराय कल्पते योगयुक्त्या तु तद्भस्म प्लाव्यमानं समन्ततः शाक्तेनामृतवर्षेण ह्यधिकारान्निवर्तते अतो मृत्युंजयायेत्थममृतप्लावनं सताम् शि
वशक्त्यमृतस्पर्शे लब्ध एव कुतो मृतिः यो वेद गहनं गुह्यं पावनं च यथोदितं अग्नीषोमपुटं कृत्वा न स भूयोऽभिजायते शिवाग्निना तनुं दग्ध्वा शक्तिसोमामृतेन यः भावयेद्योगमार्गेण
सोऽमृतत्वाय कल्पते सोऽमृतत्वाय कल्पत इति इति द्वितीयं ब्राह्मणम् अथ भुसुण्डः कालाग्निरुद्रं विभूतियोगं ब्रूहीति होवाच स होवाच विरूपेणामुक्तां महाशनां वत्सलां मलिनाम
लिनां छिन्नाङ्किचिह्नाङ्कितां पुनर्धेनुलक्षणां गां च क्रामं गर्हितां वन्ध्यां हीनाङ्गीं तामदुग्धदोहिनीं निरिन्द्रियां जग्धनरगां केशचेलास्थिभक्षिणीं संधिनीं नवप्रसूतां रोगार्दितां गां विहाय प्रश
स्तायां गोमयमाहरेत् गोमयं खस्थं स्थण्डिलस्थं शुभे स्थाने वा पतितमपरीस्पृष्टं तदूर्ध्वं मर्दयेत् गव्येन गोमयपञ्चहरणम् कपिला वा धवला वा अलाभेन त्वन्यगोः स्याद्दोषवर्जिता क
पिला गोभस्मोक्तं लब्धगोभस्मना चेदन्यगोसारं यत्र क्वापि स्थितं च यत्तत्तद्धार्यं पुण्ड्रं कारणरहितं धार्यम् नैतेन श्लोकाः विद्याशक्तिः समस्तानां शक्तिरित्यभिधीयते गुणत्रयाश्रया
विद्या सविद्या च तदाश्रया। गुणत्रयमिदं धेनुर्विद्याभूद्गोमयं शुभम् मूत्रं चोपनिषत्प्रोक्तं कुर्याद्भस्म ततः परं वत्सास्तु स्मृतयश्चास्यास्तत्संभूतं तु गोमयं आगाव इति मन्त्रेण धेनुं
तत्राभिमन्त्रयेत् गावो भगो गाव इति प्राशयेत्तु तत्तृणं जलम् उपोष्य च चतुर्दश्यां शुक्ले कृष्णेऽथ वा व्रती परेद्युः प्रातरुत्थाय शुचिर्भूत्वा समाहितः कृतस्नानो धौतवस्त्रः पयोर्थं च व्र
जेच्च गाम् उत्थाप्य गां प्रयत्नेन गायत्र्या मूत्रमाहरेत् सौवर्णे राजते ताम्रे धारयेन्मृन्मये घटे पौष्करेऽथ पलाशे वा पात्रे गोशृङ्ग एव वा आ ददीत हि गोमूत्रं गन्धद्वारेति गोमयम् अभू

भिपातं गत्तो पात्याद्वेपर्वोदितेगहे गोमये नं शोभयेद्धां श्रीर्मे भजतु मंत्रेन अलक्ष्मीर्मे नश्यत्विति मंत्रेण गोमयं स्थापयेत् ततः संत्वा सिंचामि मंत्रेण गोमूत्रं गोमये क्षिपेत् पं
चानां त्वेति मंत्रेण पिष्टानां तु चतुर्दश कुर्यात्संशोध्य क्लिरसौः सौरकैगृहे ततः निदध्यात्पूर्वोक्तपात्रे गोमयपिंडकान् ततो निधनपतये त्रयोविंशत्यनुहोतिच आघा
रावाज्यभागौ चरुं क्षिपेद्यावन्तीः सुधीः स्वगृह्योक्तविधानेन प्रतिष्ठाप्याग्निमोजयेत् पिंडं श्वानि क्षिपेत् नत्र आघंजुहुवांचक्रुः ५ उक्थं ब्रूतेति हस्माह मुष्क मंगारस्तदग्निमुपा
सीत सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्चंते नेन यजुरित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय युज्यंते नेन सामेत्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय संनमंते नेन श्रीरित्यु
पासीत न यश इत्युपासीत तेज इत्युपासीत नद्यथैतच्छस्त्राणां श्रीमत्तमं यशस्वितमं तेजस्वितमं भवति तथो एवैवं भूतानां नां सर्वेषां विद्वान् श्रीमत्तमो यशस्वितमस्तेजस्वि
तमं तेजस्वितमं भवति तथो एवैवं भूतानां नां सर्वेषां विद्वान् श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति तमेतमैष्टिकं कर्ममयमात्मानमध्वर्युः संस्करोति तस्मिन्यजुर्मयं प्रवपति
यजुर्मये ऋग्मयं होता ऋग्मये साममयमुद्गाता स एष सर्वस्यै त्रयी विद्याया आत्मैष उ एवास्यात्मा भवति य एवं वेद ६ अथातः सर्वजितः कौषीतकेस्त्रीण्युपासनानि
भवंति यज्ञोपवीतं कृत्वाप आचम्य त्रिः प्रसिच्योदपात्रं सघंतमादित्यमुपतिष्ठेत वर्गोसि पाप्मानं मे वृंधीत्येतेनैवावृता मध्ये संतमुद्वर्गोसि पाप्मानं मे उद्वृंधीत्येतेनैवावृतास्तं यंतं
संवर्गोसि पाप्मानं मे संवृंधीति यदहोरात्राभ्यां पापमकरोत्संतद्वृंक्ते ७ अथ मासि मास्यमावास्यायां पश्चाच्चंद्रमसं दृश्यमानमुपतिष्ठेतेनैवावृता हरितत्तृणाभ्यां वाक्प्रत्य
स्यतियत्ते सुसीमं मम हृदयं मधि चंद्रमसि श्रितं तेनामृतत्वस्येशाने माहं पौत्रमघं रुदमिति न हास्मात् पूर्वाः प्रजाः प्रैतीति नु जातपुत्रस्याथाजातपुत्रस्याप्यायस्व समेतु ते सं
ते पयांसि समु यांसि समुपन्तु वाजा यमादित्या अंशुमाप्याययंतीत्येतास्तिस्त्र ऋचो जपित्वा मास्माकं प्राणेन प्रजया पशुभिराप्याययिष्ठा योस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणे

जो० बा०
३

नप्रजापायशुभिरण्याय त्वेति दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते ८ अथ पौर्णमास्यां पुरस्ताच्चंद्रमसं दृश्यमानं उपतिष्ठेतैतयैवावृता सो
मो राजासि विचक्षणः पंचमुखोसि प्रजापतिर्ब्राह्मणस्त एकं मुखं तेन मुखेन राज्ञोत्स्यि तेन मुखेन मामन्नादं कुरु श्येनस्त एकं मुखं तेन मुखेन पक्षिणोत्सि तेन मुखेन मामन्ना
दं कुर्वग्निष्ट एकं मुखं तेन मुखेनेमं लोकमत्सि तेन मुखेन मामन्नादं कुरु त्वयि पंचमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि तेन मुखेन मामन्नादं कुरु मास्माकं प्राणेन प्रजया पशुभिर
वक्षेष्ठा योस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिरवक्षीयस्वेति दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते ९ अथ संवेश्यन् जायायै हृ
दयमभिमृशेत् यत्ते सुसीमे हृदये हितमंतः प्रजापतौ मन्येहं मां तद्विद्वांसं माहं पौत्रमघं रुदमिति न हास्मात्पूर्वाः प्रजाः प्रैतीति १० अथ प्रोष्यायन्पुत्रस्य मूर्धानमभिमृशेत् अं
गादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्र नामासि स जीव शरदः शतमसाविति नामास्य गृह्णात्यश्मा भव परशुर्भव हिरण्यमस्तृतं भव तेजो वै पुत्र नामासि स जीव शरदः शत
मसाविति नामास्य गृह्णाति मा छेत्स्या मा व्यथिष्ठाः शतं शरद आयुषो जीव स्व पुत्र ते नाम्ना मूर्धानमवजिघ्राम्यसाविति त्रिरस्य मूर्धानमभिहिंकुर्यात् ११ अथातो दैवः परिमर
दानद्वै ब्रह्म दीप्यते यदग्निर्ज्वलत्यथैतन्म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो गच्छति वायुं प्राणा एतद्वै ब्रह्म दीप्यते यच्चंद्रमा दृश्यतेथैतन्म्रियते यन्न दृश्यते तस्य विद्युतमेव ते
जो गच्छति वायुं प्राणा एतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योततेथैतन्म्रियते यन्न विद्योतते तस्य वायुमेव तेजो गच्छति वायुं प्राणास्ता वा एताः सर्वा देवता वायुमेव प्रविश्य वायौ सृ
ष्टा न मृच्छन्ते तस्मादेव पुनरुदीरत इत्यधिदैवतमथाध्यात्मम् १२ एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रियते यन्न वदति तस्य चक्षुरेव तेजो गच्छति प्राणं प्राणा एतद्वै ब्रह्म
दीप्यते यच्चक्षुषा पश्यत्यथैतन्म्रियते यन्न पश्यति तस्य श्रोत्रमेव तेजो गच्छति प्राणं प्राणा एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणोत्यथैतन्म्रियते यन्न शृणोति तस्य म

न एव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायत्यथैतन्म्रियते यन्न ध्यायति तस्य प्राणमेव तेजो गच्छति प्राणं प्राणस्ता वा एताः सर्वाः देवताः प्राण
मेव प्रविश्य प्राणे मृत्वा न मृच्छंते तस्मादेव पुनरुदीरते तद्यदिह वा एवं विद्वांसमुभौ पर्वतावभिप्रवर्त्तेयातां तुस्तूर्षमाणो दक्षिणश्चोत्तरश्च न हैवैनं स्तृणवीयाताम् अथ य एनं
द्विषंति यांश्च स्वयं द्वेष्टि त एनं परि म्रियन्ते १३ अथातो निःश्रेयसादानं सर्वा ह वै देवता अहं श्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुस्तद्दारुभूतं शिश्ये थैनद्वाक्प्रविवेश तद्वा
चा वदच्छिश्य एवाथैनञ्चक्षुः प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छिश्य एवाथैनं श्रोत्रं प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वच्छिश्य एवाथैनं मनः प्रविवेश तद्वाचा
वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वन्मनसा ध्यायच्छिश्य एवाथैनं प्राणः प्रविवेश तत्तत एव समुत्तस्थौ ता वा एता देवताः प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय सहैतैः
सर्वैरस्माच्छरीरादुच्चक्रमुस्ते वायुप्रतिष्ठा आकाशात्मानः स्वरीयुस्तथो एवैवं विद्वान् प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय सहैवैतैः सर्वैरस्माच्छरीरादुत्क्रामति
स वायुप्रतिष्ठ आकाशात्मा स्वरेति स तद्भवति यत्रैते देवास्तत्प्राप्य यदमृता देवास्तदमृतो भवति १४ अथातः पितापुत्रीयं संप्रदानमिति चाचक्षते पिता पुत्रं प्रेष्यन्नाह्वयति नवैस्तृणै
रगारं संस्तीर्याग्निमुपसमाधायोदकुंभं सपात्रमुपनिधायाहतेन वाससा संप्रच्छन्नः स्वयं श्वेन एत्य पुत्र उपरिष्टादभिनिपद्यत इन्द्रियैरस्येन्द्रियाणि संस्पृश्यापि वास्याभिमुखत एव
आसीतायास्मै संप्रयच्छति वाचं मे त्वयि दधानीति पिता वाचं ते मयि दध इति पुत्रः प्राणं मे त्वयि दधानीति पिता प्राणं ते मयि दध इति पुत्रश्चक्षुर्मे त्वयि दधानीति पिता चक्षुस्ते मयि दध इति
पुत्रः श्रोत्रं मे त्वयि दधानीति पिता श्रोत्रं ते मयि दध इति पुत्रोन्नरसान्मे त्वयि दधानीति पितान्नरसांस्ते मयि दध इति पुत्रः कर्माणि मे त्वयि दधानीति पिता कर्माणि ते मयि दध इति पुत्रः
कर्माणि मे त्वयि दधानीति पिता कर्माणि ते मे दध इति पुत्रः सुखदुःखे मे त्वयि दधानीति पिता सुखदुःखे ते मयि दध इति पुत्र आनंदं रतिं प्रजातिं मे त्वयि दधानीति पितानंदं रतिं प्रजातिं ते

जा॰ बा॰
४

मयिदधइतिपुत्रःस्मामेत्वयिदधानीतिपितेमांस्तेमयिदधइतिपुत्रोधियोविज्ञातव्यंकामान्मेत्वयिदधानीतिपिताधियोविज्ञातव्यंकामान्मेमयिदधइतिपुत्रोथदक्षिणावृदुपनिष्क्रा
मतितंपितानुमंत्रयतेयशोब्रह्मवर्चसमन्नाद्यंकीर्तिस्त्वाजुषतामित्यथेतरःसव्यमंसमन्ववेक्षतेपाणिनांतर्धायवसनान्तेनवाप्रच्छाद्यस्वर्गांल्लोकान्कामानाप्नुहीतिसयद्यगदः
स्यात्पुत्रस्यैश्वर्येपितावसेत्परिवाव्रजेत् यद्युवैप्रेयाद्यदेवैनंसमापयतितथासमापयितव्योभवतितथासमापयितव्योभवति१५ इत्यारण्यकेद्वितीयोध्यायः२ ॐप्रतर्दनोहवैदै
वोदासिरिंद्रस्यप्रियंधामोपजगामयुद्धेनचपौरुषेणचतंहेंद्रउवाचप्रतर्दनवरंतेददानीतिसहोवाचप्रतर्दनस्त्वमेववृणीष्वयंत्वंमनुष्यायहिततमंमन्यसइतितंहेंद्रउवाचनवैवरःपर
स्मैवृणीतेत्वमेववृणीष्वेत्यवरोवैतर्हिकिलमइतिहोवाचप्रतर्दनोथोखल्विंद्रःसत्यादेवनेयायसत्यंहींद्रःसहोवाचमामेवविजानीह्येतदेवाहंमनुष्यायहिततमंमन्येयन्मांविजानी
यात्त्रिशीर्षाणंत्वाष्ट्रमहनमरुन्मुखान्यतीन्सालावृकेभ्यःप्रायच्छंबह्वीःसंधाअतिक्रम्यदिविप्रह्लादीनतृणमहमंतरिक्षेपौलोमांपृथिव्यांकालकांजांस्तस्यमेतत्रनलोमच
मामीयतेसयोमांविजानीयान्नास्यकेनचनकर्मणालोकोमीयतेनस्तेयेननभ्रूणहत्ययानमातृवधेनपितृवधेननास्यपापंचनचकृषोमुखान्नीलंवेतीति१ सहोवाचप्राणोस्मिप्रज्ञात्मा
नमामायुरमृतमित्युपास्स्वायुःप्राणःप्राणोवाआयुःप्राणएवामृतंयावद्ध्यस्मिन्शरीरेप्राणोवसतितावदायुःप्राणेनह्येवामुष्मिंल्लोकेऽमृतत्वमाप्नोतिप्रज्ञयासत्यंसंकल्पंसयोमआयु
रमृतमित्युपास्तेजोराज्यविशेषमोक्षकारणीभूतिःसदाधार्यताम् रुद्राक्षाणिशिवमंत्रपवित्राणिभस्मानिकामदहनांगविलेपनानित्रिपुण्ड्राणिरचितानिललाटपट्टेलुंपतिदैव
लिखितानिदुरक्षराणिश्रीकरंचपवित्रंचशोकरोगनिवारणम् लोकवश्यकरंपुण्यंभस्मत्रैलोक्यपावनम् त्रिनेत्रंत्रिगुणाधारंत्रयाणांजनकंविभुम् स्मरन्नमःशिवायेतिललाटेतु
त्रिपुण्ड्रकम् ईशानाभ्यांनमेत्युक्त्वायाभ्युयोश्चत्रिपुंड्रकम् भुजाभ्यांनमइत्युक्त्वाधारयेत्प्रकोष्ठयोः कूर्पराधःपितृभ्यांचउमेशाभ्यांततोथोपरिभीमायेतितरः पश्चिमेशिरसःपश्चिमेतथानील

कंठाय शिरसि क्षिपेत्सर्वात्मने नमः पापनाशयते ललाटे सप्तजन्मशतार्जितम् कंठोपरि कृतं पापं नश्येत्स्कंधस्य धारणात् कंठे च धारणात्कंठभोगादिकृतपातकम् बाह्वोर्बाहुकृतं
पापं वक्षस्सु मनसा कृतम् नाभ्यां शिश्नकृतं पापं पृष्ठे गुदकृतं तथा पार्श्वयोर्धारणात्पापं परस्त्र्यालिंगनादिकं भस्मनश्चास्य धारणं मुख्यं सर्वत्रैव त्रिपुंड्रकम् ब्रह्मविष्णुमहेशानां त्रयाग्नीनां च
धारणम् गुणलोकत्रयाणां च धारणं तेन वै कृतम् इति चतुर्थं ब्राह्मणम् मानस्तोकेति मंत्रेण मंत्रितं भस्म धारयेत् ऊर्ध्वपुंड्रं भवेत्साम मध्यपुंड्रं यजूंषि च अधःपुंड्रमृचः साक्षात्तस्मात्पुंड्
त्रिपावनम् त्रियायुषाणि कुर्वीत ललाटे च भुजद्वये नाभौ शिरसि हृत्पार्श्वे ब्राह्मणाः क्षत्रियाः सदा त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवं इदं मुख्यं गृहस्थानां विरजानलजं भवेत्
विरजानलजं चैव धार्यं प्रोक्तं मनीषिभिः औपासनसमुत्पन्नं गृहस्थानां विशेषतः समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणा शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवम् अन्येषा
मपि सर्वेषां धार्यं दावानलोद्भवं यतीनां ज्ञानदं प्रोक्तं वानस्थानां विरक्तिदम् अतिवर्णाश्रमाणां तु श्मशानाग्निसमुद्भवं विवाहाग्निजं सौख्यं सनाग्निजं वा ब्रह्मचारिणां समिदग्निजं शू
द्राणां श्रोत्रियागारपचनाग्निजं अन्येषां दावानलसमुद्भूतं पतितानां सर्वेषां चावस्थितम् अतिवर्णाश्रमिणां श्मशानगतं सर्वेषां देवालयस्थितमिति शिवयोगिनां शिवाग्निहोत्रजा
विभूतिः शिवालयस्थं तल्लिंगलिप्तं मंत्रसंस्कारदग्धं वा तत्रैते श्लोकाः तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं येन विप्रेण शिरसि त्रिपुंड्रं भस्मना धृतं त्यक्तवर्णाश्रमाचारो लुप्तकर्म
क्रियोऽपि यः सकृत्तिर्यक् त्रिपुंड्रांको धारणात्सोऽपि पूज्यते ये भस्मधारणं त्यक्त्वा जन्मकोटिभिः महापातकयुक्तानां पूर्वजन्मनि संततिः त्रिपुंड्रोद्धूलने द्वेषो जायते सततं ध्रुवं येषां कोपो भवे
द्भाललाटे भस्मधारणात् तेषामुत्पत्तिसांकर्यं मंतव्यं विपश्चिता ये भस्मधारणं दृष्ट्वा वाचा निंदंति मानवाः तेषां शूद्रात्संभूतिर्मंतव्या विपश्चिता ये भस्मधारणं दृष्ट्वा नराः कुर्व
न्ति ताडनम् तेषां चाण्डालतो जन्म ब्रह्मन्नूह्यं विपश्चिता येषां नास्ति मते श्रद्धा श्रौते भस्मनि सर्वदा गर्भाधानादिसंस्कारास्तेषां नास्तीति निश्चयः त्रिपुंड्रं ये विनिंदंति निंदंति शिवमेव ते



धारयंतितुयेभस्माधारयंतितमेवतेप्येभस्मरहितंफालंधिगनामनशिवालयमृधिगनीशार्वनंतंत्र्यधिगिवधामशिवाम्नयाम् हृग्नेयेभ्यरंवोर्यंतद्रुस्मपारिकीर्तितमनस्मा
त्सर्वेषुरात्नेषुवीर्यवान्भस्मसंयुतः भस्मनिष्ठस्यदह्यंतेदोषाभस्माग्निसंगमात् भस्मस्नानविशुद्धात्माभस्मनिष्ठइतिस्मृतः भस्मसंदिग्धसर्वांगोभस्मदीप्तत्रिपुंड्रकः भस्मशायो
चपुरुषोभस्मनिष्ठइतिस्मृतः ।इतिपंचमंब्राह्मणम्॥ अथभुसुण्डः सहोवाचनामपंचकस्यमाहात्म्यंब्रूहीतिसहोवाच अथवासिष्ठवंशजस्यशतभार्यासमेतस्यधनंजयस्यज्ये
ष्ठतरास्यज्येष्ठभार्यायाः कनिष्ठः पुत्रः करुणाइति नामातस्यशुचिस्मिताभार्या असौचैककदाचिद्भ्रात्रेवैरमसहमानोभवनाशिनीतटेकालाग्निरुद्रंभगवंतंनृसिंहमगमत् तत्रदेवस
मीपेअन्येनोयापनार्थंसमर्पितम् जंबीरफलंगृहीत्वाजिघ्रत् तदानींतनस्याआशयत् पायमस्मिकोभववर्षाणांशतमितिसोऽपिशापमादायमक्षिकः सततस्वकेषुस्वचेष्टितम् त
स्येतिवेघसांरात्रेतिस्वभार्यामवदत्ततदामक्षिकोभवत् ज्ञातिमेवंविधज्ञात्वाज्ञातयस्तैलमध्येत्यमारयन् सामतंपतिमादायअरुंधतीमगमत् अवदद्ब्रोशुचिस्मितेशोकेनालमरुं
धत्येत्युक्त्वापतीमयाद्धविभूतिमादायशुचिस्मितेतिअथैषमिहोत्रजंभस्मादाहंधत्येत्यवेदयत् साऽरुंधतीचमस्तंजपेतिमंत्रेणमृतजंतोतदासिपत् मंदवापुत्तनोजजेम
जनेनशुचिस्मिता उदतिष्ठततोजंतुर्भस्मतोऽस्यप्रभावतः ततोवर्षशतेपूर्णेतथाविधंदेवानपिमहाभूतान्मामप्येतास्वंपुरा तस्मात्भस्मनाजंतुजीवयामिसदा तथेदस्येवम्
त्कामगवान्कथितः समज्ञापत स्वरूपंचतत्तोगत्वास्वमाश्रमयदंयथाविधि इदानीमस्यभस्मनः सर्वोऽघः भस्मरणसामर्थ्यंविधत्ते इत्याहगौतमविवाहकालेतामहल्यांरक्षस्सर्वे
देवाः कामातुराअभवन् ततनष्टज्ञानाद्दुर्वाससंगत्वापप्रच्छुः सतदोषशमयिष्यामीत्युवाचततः शतरुद्रेणमंत्रेणामंत्रितंभस्मवेपुरा मयापिदत्तेनैवब्रूहत्याहरिशांतये इत्ये
वमुक्त्वादुर्वासादत्तवान्भस्मवोतमं ज्ञात्वास्तद्देवताः सर्वेपूर्यंतेज्जतके नसः शतरुद्रीयमंत्रेणाभस्मोद्धूलितविग्रहाः निर्धूतरेतसः सर्वेतस्मरणाद्बवयंमुने आज्ञप्यंमेतज्ज्ञानीमोभस्म

सामर्थ्यमीदृशम् अस्य भस्मनः शक्तिमत्त्वां प्रगृणान देवहरिः शंकरयोर्ज्ञानप्रदम् ब्रह्मादिपापनाशकमिति महाविभूतिप्रदमिति शिवः स्ववक्षसि स्थितं भस्म तत्वे नाराय
प्रणवेनाभिमंत्र्य गायत्र्या पंचाक्षरेणाभिमंत्र्य हरिमलं करोत्येषु समालिप्य तत् ततो हरिर्ध्यायस्वेति पुंड्रं मुक्ता शिवोऽहं हरिः स्वहृदि ध्यात्वा रक्षो रक्षेति शिवः शव महत्तरो हरिं भस्मभू
षेत्याह हरा ततः भस्मधिष्ठे शिवं भस्मस्नात्वाहं भस्मनापुरा दृष्टं स्वरं भक्तिगम्यं भस्माभ्यपदमुतः तत्राश्चर्यं मतीवासो न्यतिर्विवस्त्रम पुतिः वासुदेवस्तद्भक्तो पल्लवरोगो भवत्सरणात्
ततः प्रभृति श्रुत्का भो वासुदेवः प्रशंसनात् न शक्तिं भस्मनो जाने प्रभावं तेजु तो विभो नमस्तेऽस्तु नमस्ते स्तुत्वामेव शरणं गतः त्वमाद्युगल्ले शंभो भक्तिरस्तु सदा मम भस्मधारणासंपन्नो
मम भक्तो भविष्यसीति अतएवेवाभूतिर्भूतिकारी सुज्ञात तुरान दृढ जाबालं सर्वकामदं मोक्षदां श्रद्धया पंचपत्रैर्मे पंचाममपंचब्रह्ममपंचमत्तमयं भवति तस्य पुरस्ताद्वासव आस
ने हृद्रदिसि सातदादित्यः पश्चाद्धिश्वेदेवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यां सूर्याचंद्रमसौ पार्श्वयोस्तदेतद्वाम्युतमृचोऽक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः यस्तं न वेद किं
ऋचा करिष्यति य इत्तद्विदुस्त इमे समासत इति तद्वा एतद्बृहज्जाबालं वा लोकायुर्वावा वेद स महा भवतिसपूतः सर्वेषां मंत्राणामुपदेष्टा भवति एतयैव होमं कुर्यादेव ब्रूयेवार्चनं कुर्या
त्तदेतद्धंसो ध्यमस्तु तारकं गतरणाल्वर्णं कंठे वा हृदि शिरवायां वा यावधातसह द्वीपवतीभूमिर्दक्षिणार्थं तावत्कल्पते तस्मा श्रद्धया यां कांचिद्दद्यात्सा दक्षिणा भवति तस्मादिदं बृह
ज्जाबालं येन केनचित्सर्वमुखे नंयो जानीते स तेन व शरीरेण संसारमुच्यते मोचयति मुमुक्षुर्भवति जयाने व शरीरा देवना दृशोनं करोति तस्मादिदमेव मुमुक्षुर्वारं कतिनान्ये
वां भवति तस्मादिदं बृहज्जाबालं विजानीवान्मुमुक्षुर्भवति ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ऊर्ध्वरेतं विरूपाक्षं शंकरं नीललोहितम् उमापति पशुपतिः पिनाकी ह्यमि
तद्युतिः ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्यो यजुर्वेद वाच्यं तं बृहज्जाबालं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति अथ बृहज्जाबालस्य फलं नो ब्रूहि भगवन् इति

सहोवाच य इमामुपनिषदं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स लोकपूतो भवति स सर्वपूतो भवति स सर्वे
पूतो भवति य इमां रुद्रजाबालोपनिषदं ब्राह्मणो वा क्षत्रियो वा नित्यमधीते स मृत्युं जयति स पापान्तरति स ब्रह्महत्यां तरति स सर्वहत्यां तरति सोऽग्निं स्तंभयति स वायुं स्तं
भयति स आदित्यं स्तंभयति स सोमं स्तंभयति स उदकं स्तंभयति स सर्वान्देवान्स्तंभयति स सर्वान्ग्रहान्स्तंभयति स विषं स्तंभयति य इमामुपनिषदं नित्यमधीते स भूर्लोकं जयति
स भुवर्लोकं जयति स सुवर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति य इमामुपनिषदं नित्यमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स सुवर्लोकं जयति स महर्लोकं जयति
स तपोलोकं जयति स सत्यलोकं जयति य इमामुपनिषदं नित्यमधीते स मनुष्यानाकर्षयति स देवानाकर्षयति स पशूनाकर्षयति सर्वानाकर्षयति य इमामुपनिषदं नित्यमधीते स ऋचो
ऽधीते स ऋचोऽधीते यजूंष्यधीते स कल्पानधीते स गाथा अधीते स नाराशंसीरधीते स इतिहासपुराणमधीते सर्वमधीते स सर्वमधीते अनुपनीतशतमेकमेकेनोपनीतेन तत्सम
मुपनीतशतमेकमेकेन यतिना तत्समं यतीनां शतं पूर्णमेकमेकेन रुद्रजापकेन तत्समं अथर्वशिरःशिखाध्यापकशतमेकमेकेन रुद्रजाबालोपनिषदध्यापकेन तत्समं रुद्रजाबा
लोपनिषदध्यायं नशतमेकमेकेन तत्प्रियाचरणेन तत्समं तदानेतरं धाम उपनिषज्जापशीलस्य यत्र न सूर्यस्तपति यत्र न वायुर्वाति यत्र न चंद्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्नि
र्दहति यत्र न मृत्युः प्रविशति यत्र दुःखानि संति सदानंदं परमानंदं शांतं शाश्वतं सदाशिवं ब्रह्मादिवंदितं योगिध्येयं परमं पदं यत्र गत्वा न निवर्तन्ते योगिनः तदेतदृचाभ्युक्तं तद्विष्णोः
परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदं ॥ सत्यं ॐ सत्यं न स पुनरावर्तते न स पुनरावर्तते ॐ सत्यम् ॥ इति रुद्रजा
बालोपनिषदि पूर्वतापनीयोपनिषत्समाप्ता ॥ अथ हैनं भगवंतं कालाग्निरुद्रं भुसुंडः पप्रच्छ कथं रुद्राक्षोत्पत्तिस्तद्धारणात्किं फलमिति होवाच भगवान्कालाग्निरुद्रस्त्रिपुरवधाय

रोन्मीलिताक्षोऽहं तेभ्यो जलबिंदवो भूमौ पतितास्ते रुद्राक्षा जाताः सर्वानुग्रहार्थाय तेषां नामोच्चारणे दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं त्रिगुणं फलं भवति अत ऊर्ध्वं वक्तुं
न शक्नोमि तत्र श्लोकाः कस्मिञ्जातं तु किं नाम कथं वा धार्यते नरैः कतिभेदमुखान्यत्र कैर्मंत्रैः कथयस्व मे दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया भूमावक्षिपुटाभ्यां तु पतिता जलबिंदवः
तत्राश्रुबिंदवो जाता महारुद्राक्षवृक्षकाः स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात् तत्र श्लोकाः भक्तानां धारणात्पापं दिवारात्रिकृतं हरेत् लक्षं तु दर्शनात्पुण्यं कोटिस्तु स्पर्शनाद्भवेत्
तस्य कोटिशतं पुण्यं लभते धारणान्नरः लक्षकोटिसहस्राणि लक्षकोटिशतानि च तज्जपाल्लभते पुण्यं नरो रुद्राक्षधारणात् रुद्राक्षाणां तु भद्राक्ष धारणात्स्यान्महत्फलम् धात्रीफल
प्रमाणं तु श्रेष्ठमेतदुदाहृतम् बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः अधमं चणमात्रं स्यात्प्रक्रियैषा मयोच्यते ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति शिवाज्ञया वृ
क्षा जाताः पृथिव्यां तु तज्जातीयाः शुभाक्षकाः श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः पीता वैश्यास्तु विज्ञेयाः कृष्णाः शूद्रा उदाहृताः ब्राह्मणो बिभृयाच्छ्वेतान्रक्तान्राजा तु धा
रयेत् पीतान्वैश्यस्तु बिभृयात्कृष्णाञ्छूद्रस्तु धारयेत् समाः स्निग्धा दृढाः स्थूलाः कंटकैः संयुताः शुभाः कृमिजग्धं छिन्नभिन्नं कंटकैर्हीनमेव च व्रणयुक्तमयुक्तं च षड्रुद्राक्षाणि
वर्जयेत् स्वयमेव कृतद्वारं रुद्राक्षं स्यादिहोत्तमम् यत्तु पौरुषयत्नेन कृतं तन्मध्यमं भवेत् समान्स्निग्धान्दृढान्स्थूलान्क्षौमसूत्रेण संयुतान् धारयेत्सर्वगात्रेषु सामान्यानि विच
क्षणाः निकषे हेमरेखाभा यस्य रेखा प्रदृश्यते तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैः शिखायामेकरुद्राक्षं त्रिशतं शिरसा वहेत् षट्त्रिंशतं गले दध्याद्बाह्वोः षोडश धारयेत् मणि
बंधे द्वादश च स्कंधे पंचशतं वहेत् अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत् द्विसरं त्रिसरं वापि सराणां पंचकं तु वा सराणां सप्तकं वापि बिभृयात्कंठदेशतः मुकुटे कुंडले चैव कर्णिकाहा
रकेषु च केयूरकटके चैव कुक्षिबंधे विशेषतः सुप्ते पीते सदाकालं रुद्राक्षं धारयेन्नरः त्रिशतं त्वधमं पंचशतं मध्यममुच्यते सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत् शिरसीशान

जा॰ बा॰
७

मंत्रेण कारयेत्तु रुद्रेण च अघोरेणाग्ने शूर्यं तेनैव रुद्रेपि च अघोरबीजमंत्रेण कारयो धारयेत्सुधीः पंचाशद्रुद्रत्र्यक्षिणां योमध्यापि च चालने पंचमे वृत्तमंत्रे त्रिमालां पंच
सप्त च अथवा मूलमंत्रेण सर्वाण्यक्षाणि धारयेत्॥ अथ कालाग्निरुद्रं भगवंतं भुसुंडः पप्रच्छ रुद्राक्षाणां मुखभेदेन यदक्षं यत्स्वरूपं यत्फलमिति तत्तत्स्वरूपं मुखयुक्तमरिष्टनिरसनं
मिष्टफलप्रदं ब्रूहीति होवाच तत्र श्लोकाः एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम् तद्धारणात्परे तत्त्वे लीयते विजितेन्द्रियाः द्विवक्त्रं तु मुनिः श्रेष्ठ अर्द्धनारीश्वरो भवेत् धारणादर्द्धनारीशः
प्रीयते तस्य नित्यशः त्रिवक्त्रा मनलः साक्षात्त्रिरूपं स्त्रीहत्यां दहति क्षणात् त्रिमुखे चैव रुद्राक्षमग्नित्रयस्वरूपकं तद्धारणाच्च हुतभुक् तस्य तुष्यति नित्यशः चतुर्वक्त्रः स्वयं ब्रह्मा पुरुषहत्यां व्यपो
हति चतुर्मुखं तु रुद्राक्षं पितामहस्वरूपकम् पंचवक्त्रं स्वयं रुद्रः कालाग्निर्नाम नामतः अगम्यागमनं चैव अभक्ष्य॰ स्य च भक्षकः मुच्यते सर्वपापेभ्यो पंचवक्त्रस्य धारणात् पंचवक्त्रं तु रुद्रा
क्षं पंचब्रह्मस्वरूपकम् तस्य धारणमात्रेण संतुष्यति सदाशिवः षड्वक्त्रमपि रुद्राक्षं कार्तिकेयाधिदैवतम् विनायकाधिदैवं च प्रवदंति मनीषिणः तद्धारणाच्छ्रुतामादिषड्वर्गविजयो भवे
त् सप्तवक्त्रं तु रुद्राक्षं सप्तमात्रधिदैवतम् सप्ताश्वदैवतं चैव मुनिसप्तकदैवतम् तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमं महतो ज्ञानसंपत्तेः शुचिर्भूत्वा दिनेः शनैः अष्टवक्त्रं तु रुद्राक्षं अष्ट
मात्राधिदैवतम् वस्वष्टकप्रियं चैव गंगाप्रीतिकरं परम् तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः नववक्त्रं तु रुद्राक्षं नवशक्त्याधिदैवतम् तस्य धारणमात्रेण प्रीयंते नवशक्तयः दशवक्त्रं तु रु
द्राक्षं यमदैवमुदाहृतं दशाशाप्रीतिजनकं धारयेन्नात्र संशयः तदाऽप्रीतिजननं धारयेन्नात्र निश्चितम् एकादशमुखं त्वक्षं रुद्रैकादशदैवतम् तदिदं दैवतं चाहुः सदा सौभाग्यवर्द्धनम् रुद्रा
क्षं द्वादशमुखं महाविष्णुस्वरूपकम् द्वादशादित्यदैवं च बिभर्त्येव हि तत्परः त्रयोदशमुखं चाक्षं कामदं सिद्धिदं शुभम् तस्य धारणमात्रेण कामदेवः प्रसीदति चतुर्दशमुखं चाक्षं रुद्रनेत्रसमुद्भव
म् सर्वव्याधिहरं चैव सदारोग्यमवाप्नुयात् मद्यं मांसं च लशुनं पलांडुं शिग्रुमेव च श्लेष्मांतकं विड्वराहमभक्ष्यं वर्जयेन्नरः ग्रहणे विषुवे चैव अयने संक्रमे तथा दर्शे च पूर्णमासे च पुण्येषु दिव

सेषु च रुद्राक्षधारणात्स यः सर्वपापक्षयो भवेत् रुद्राक्षमूलं तद्दृष्ट्वा नाल्पं तद्दिष्टं मुच्यते तन्मुखं रुद्रस्याकृतद्धिक्षुः सर्वदेवताः इमामुपनिषदं बालो वा युवा वा वेद महान्भवति स सर्वेषां मं
त्राणामुपदेष्टा भवति एतेनैव होमं कुर्यात् एतेनैवार्चनं तं देवताः इत्येषो ऽघं मत्वा तारकं गुरुणा लब्धं कंठे बाह्वोः शिखायां वा बध्नीत सप्तद्वीपवती भूमिर्दक्षिणार्थं नाव कल्पते तस्माच्छ्रद्धया यो
चिरं दद्यात्सा दक्षिणा भवति य इमामुपनिषदं ब्राह्मणो वा क्षत्रियो वा सायमधीयानो दिवसकृतं पापं नाशयति प्रातरधीयानो मासकृतं पापं नाशयति यापरधीयानो जन्मकृतं पापं
नाशयति मध्याह्नेऽधीयानः षण्मासकृतं पापं नाशयति सायं प्रातरधीयानः संवत्सरकृतं पापं नाशयति सायं प्रातरधीयानो जन्मकृतं पापं नाशयति य इमामुपनिषदं ब्राह्मणो वा क्षत्रियो
वा वाधीते षट्‌षष्टिशतसहस्रलक्षाणि गायत्रीजपफलानि भवंति वृषलस्त्रीयाः पूतो भवति सुरापानात्पूतो भवति सुवर्णस्तेयात्पूतो भवति अभोज्यभोजनात्पूतो भवति अभक्ष्यभक्षणा
त्पूतो भवति अगम्यागमनात्पूतो० गुरुतल्पगमनात्पूतो० पतितसंभाषणात्पूतो० तत्संयोगात्पूतो० सर्वतीर्थेषु स्नातो भवति पंक्तिशतसहस्रपावनो भवति शिवसायुज्यमेति न स पुनराव
र्तते न स पुनरावर्तते इत्यों सत्यम् इति सप्तमं ब्राह्मणम् अथ कालाग्निरुद्रं भगवंतं सनत्कुमारः पप्रच्छ अधीहि भगवन् रुद्राक्षधारणविधिं ब्रूहीति स होवाच तस्मिन्समये निदाघजडभरत
दत्तात्रेयकात्यायनभरद्वाजकपिलवशिष्ठपिप्पलादश्च कालाग्निरुद्रं प्रतिसमेत्योचुः अथ कालाग्निरुद्रः किमर्थं भगवतामागमनमिति होवाच रुद्राक्षधारणविधिं सर्वे श्रोतुमि
च्छामह इति अथ कालाग्निरुद्रः प्रोवाच रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायंते यदा सदाशिवः संहारकाले संहारं कृत्वा संहाराक्षं मुकुलीकरोति तन्नयनाज्जाता रुद्राक्षा
इति होवाच तस्माद्रुद्राक्षत्वमिति अथ कालाग्निरुद्रः प्रोवाच स्वयं रुद्राक्षं वाग्विषयं करोति दशगोप्रदानेन यत्फलमाप्नोति तत्फलमश्नुते स एष भस्मज्योती रुद्राक्ष इति होवाच राक्षस
देष्वरः शतरुद्राक्षं करेणासंस्पृशति छन्नशतगोप्रदानेफलं लभते तद्रुद्राक्षं धारणं कुर्वन्ति छन्न द्विशतगोदानफलं लभते तद्रुद्राक्षस्य यज्ञोपवीतवत् धारणमात्रेण सहस्रगोप्रदानफलं

लभते तद्रुद्राक्षस्य यज्ञोपवीतवत् धारणमात्रेण सहस्रगोप्रदानफलं लभेत् तद्रुद्राक्षे करयोर्धार्यमाणे द्विसहस्रगोप्रदानफलं भवति रुद्राक्षे कंठे धार्यमाणे त्रिसहस्रगोप्रदानफलं
भवति एकादशरुद्रत्वं च गच्छति शिरसि धार्यमाणे कोटिगोप्रदानफलं भवति रुद्राक्षे कंठे धार्यमाणे त्रिसहस्रगोप्रदानफलं भवति एकादशरुद्रत्वं च गच्छति शिरसि धार्यमाणे कोटिगोप्र
दानफलं भवति एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यमिति होवाच अथ सनत्कुमारः पप्रच्छ रुद्राक्षप्रदानात्फलमस्येति होवाच अथ कालाग्निरुद्रः प्रोवाच अष्टशतरुद्राक्षान्त्वाऽष्टश
तरुद्राक्षान्यो धारयेत् प्रबलः यप्रदानेन यत्फलमाप्नोति तत्फलमश्नुते सनत्कुमारसमो तीरुद्राक्षस्य इति होवाच अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ रुद्राक्षसहस्रं क्रमेण धर्त्तुं शक्यं वा
इति अथ कालाग्निरुद्रः प्रोवाच रुद्राक्षधारणं कर्त्तुं मध्ये वासनाऽस्मासा प्रतिष्ठां कृत्वा रुद्राक्षसहस्रं वर्षमेकं तु धारयेत् ब्रह्मत्वं गच्छति द्विसहस्रं रुद्राक्षं द्वे वर्षे धारयेद्विष्णुत्वं गच्छति त्रिसहस्रं रु
द्राक्षं त्रीणि वर्षाणि धारयेत्स हि शिवत्वं गच्छति न स पुनरावर्त्तते स एवं सत्त्ययोनी रुद्राक्षस्य इति होवाचाथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ सर्वोपनिषन्नरजधारणफलं ब्रूहीत्यथ का
लाग्निरुद्रः प्रोवाच सर्वोपनिषत्सारं वो· भूम्यैव धारयेति तद्वैतेऽन्यो काम भवन्ति विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरः शरीरः अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं
प्रणम्य हृत्पुण्डरीकं विरजं विशुद्धं विचिंत्य मध्ये विशदं विशोकम् अचिंत्यमव्यक्तमनन्तरूपं शिवम्प्रशांतममृतं ब्रह्मयोनिम् तथादिमध्यांतविहीनमेकं विभुं चिदानंदमरूपमद्भुतम् उमासहायं
परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्र
माः स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ज्ञात्वा तं मृत्युमत्येति नान्यः पंथा विमुक्तये। एवं ध्यात्वा रुद्राक्षान्धारयेत्। इत्यष्टमं ब्राह्मणम्। अथ जनको वैदेहो याज्ञवल्क्यमुपसमेत्योवाच भगवान्
त्रिपुण्ड्रविधिं मनुब्रूहीति स होवाच याज्ञवल्क्यः प्रमाणमस्य त्रिधाऽग्निललाटात् आचक्षुषोराभ्रुवोर्मध्यतः जनको ह वैदेहः स होवाच भगवन् सद्भस्मं तदाग्नेयं भस्म सद्योजातादि पञ्चब्रह्ममंत्रैः परि

गत्याग्निरिति भस्मेत्यभिमंत्र्यमानस्तोकं इति शिरोललाटवक्षस्कंधेषु धारयित्वा पूतो भवति मोक्षी भवति शतरुद्रियजपेन यत्फलमाप्नोति स सर्वं भस्मज्योतिरिति वै याज्ञवल्क्यः जनको ह वैदेहः
स होवाच याज्ञवल्क्यं किं तेन फलमिति स होवाच देवमुक्तिर्भवति तद्भस्मधारणादेव शिवसायुज्यमवाप्नोति न स पुनरावर्तते स राघव भस्मज्योतिरिति वै याज्ञवल्क्यः जनको ह वैदेहः स होवाच
याज्ञवल्क्यं भगवानिति तद्भस्मधारणादेव किं फलमश्नुत इति न वेत्ति तत्परं महत् स संवर्तकाग्नेः ध्वेनकेतुर्वा सत्यमुनिरघजश्मरथ्यतोन्नम्परेवतक्रमसुः प्रभृतयो विभूतिधारणादेव विमु
क्ताः स्युः स राघव भस्मज्योतिः स राघव भस्मज्योतिरिति याज्ञवल्क्यः जनको ह वैदेहः स होवाच याज्ञवल्क्यं भस्मस्नानेन किं जायत इति यस्य कस्यचिच्छरीरे यावन्तो रोमकूपास्तावन्ति लिंगानि भूत्वाति
ष्ठन्तीति ब्राह्मणो वा क्षत्रियो वा वैश्यो वा शूद्रो वा तद्धारणादेव न ज्वरस्य रूपं पश्यन्ति पश्यन्ति ते वा वदन्ति छते अथ जनको ह वैदेहः पैप्पलादेन सह प्रजापतिलोकं जगाम तं गत्वोवाच भो प्रजापते
त्रिपुण्ड्रस्य विधिं ब्रूहीति होवाच तं प्रजापतिस्तु वै स्वयमेवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्य माहात्म्यमिति होवाच प्रजापतिः अथ पैप्पलादो वैकुण्ठं जगाम तं गत्वोवाच भो विष्णो त्रिपुण्ड्रस्य
विधानं ब्रूहीति प्रोवाच यथैवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्य माहात्म्यमिति स होवाच विष्णुः अथ पैप्पलादो भगवन्तं कालाग्निरुद्रं परिसमेत्योवाच अधीहि भगवन् त्रिपुण्ड्रस्य विधिं ब्रूहीति
अथ कालाग्निरुद्रः त्रिपुण्ड्रस्य विधानमनुब्रवीमीति होवाच ततोऽत्रिभृगुर्वसिष्ठनिधाध्वजेरमरथ्यतोन्नत्रेयरैवतक्रमप्रभृतयोऽपि मुख्यः परिसमेत्योचुः रैवतको महामुनिर्भस्मं ब्रवीतु त्रिपुण्ड्र
विधिमनुब्रूहीति मुख्यः स होवाच पुण्ड्रविधिर्मे पीवतः तं न शक्यः सत्यमिति वाचानन्तानन्तं नानन्तं बीजमस्तु तानानन्तं बीजं वदन्ति स सम्यक् सर्वेश्वर वदन्ति अथ भगवन्तं कालाग्निरुद्रं ------
------------ प्रजापतिश्च कालाग्निरुद्रं परिसमेत्योवाच देवाश्च ऋषयश्च ते परस्परानुवादे त्वोन्मीलयित्वा कालाग्निरुद्रं प्रच्छामस्ति अथ कालाग्निरुद्र त्रिपुण्ड्रस्य विधा
नं ब्रूहीति होवाच देवाश्च ऋषयश्च त्रिपुण्ड्रस्य माहात्म्यं प्रणुध्वमिति अथ भस्मच्छन्नः संसारान्मुच्यते भस्मशय्याशयानः तं शंकरो चास्म शिवसायुज्यमिति न स पुनरावर्तते रुद्राध्यायोस

ज. बा.
८

न्तमनन्तं गच्छति स एव ब्रह्मज्योतिर्विभूतिधारणाद्ब्रह्मलोकं गच्छति सर्वभस्मज्योतिः सर्वभस्मज्योतिर्विभूतिधारणात्कैवल्यमश्नुते सर्वभस्मज्योतिः सर्वभस्मज्योतिर्विभूतिधारणाद्देव
सर्वतीर्थेषु स्नातो भवति विभूतिधारणात्त्रिस्थले यस्तु लमाप्नोति न कुलमश्नुते सर्वभस्मज्योतिः सर्वभस्मज्योतिर्यस्य कस्यचिच्छरीरे त्रिपुण्ड्रलक्ष्म दृश्यं वर्तते प्रथमप्रजापतिर्द्वितीयो वि
ष्णुस्तृतीयः सदाशिव इति स एव भस्मज्योतिः ॥ इति नवमं ब्राह्मणम् ॥ अथ जाबालो भुसुण्डः कैलासशिखरावासमोंकारस्वरूपिणं महादेवमुमार्धधारिणं हरिविरिंचिपुरंदरमखसुरसेवितं स्वरूपमान
मन्तैरपि वेदैर्मूर्तिधरैः सोमार्धकृतशेखरं सोमसूर्याग्निनयनमनन्तेन्दुरविप्रभं व्याघ्रचर्मपरिधानं मृगहस्तं भस्मोद्धूलितविग्रहं त्रिपुण्ड्ररेखाविराजमानभालं तं स्मितपूर्वं प्रत्य
विधपञ्चाननं वीरासनारूढममेयमनाद्यन्तं निष्कलं निर्गुणं शान्तं निरंजनमनामयं हुं फट् कुर्वाणं शिवनाममनिशमुच्चरन्तं हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं चतु
र्थमेकमशास्त्रं भगवन्तं प्रणवं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य श्रीफलदलैः शिरसा नमस्कारो नमोऽङ्गः कृताञ्जलिपुटः पप्रच्छ अधीहि भगवन्भस्मसारं मह्यं त्रिपुण्ड्रविधिं यस्मात्स्नान
येऽसमेवमोक्षोपलब्धिः किं भस्मनो द्रव्यं कानि स्थानानि मन्त्रो कः स्यात् के वा कर्तारस्तद्धारणे के वा नत्राधिकारिणो नियमास्तेषां के वा मामन्तेवासिनमनुशास यमोऽह ॥ इति प्रथमः खंडः
अथोवाच भगवान्सदाशिवः परमकारुणिकः प्रथमान्सुरानपि संबोध्य पूर्वं प्रागुपायो मयैवं ब्रह्मपरोक्षविद्या मे इति आत्मा हृदये नाभौ नाभ्यां नाभिनाडीति मे त्रैणां दसिरा भुजं भावयेत्तल्लक्ष्ये
रुद्रायेति तन्मार्गावलम्बेन भवायेति तन्नक्षत्रयक्षेपसुपतये नमः इति वामबाहुमूले उग्रायेति तन्मध्ये अग्नेवधायेति मणिबन्धे दूरे वधायेति नन्दिकेश्वरपृष्ठे नमो हंसेभ्यः शेशंकरायेति पयाच्छमे भस्मधृ
त्वा सामायेति शिवं नत्वा ततः प्रक्षाल्य करौ तद्भस्म जमायः पुनर्लिप्तं पिबेन्नास्याज्जमू एवं प्रातर्मध्याह्ने सायं तन्नेपि काले विधिवद्भस्मधारणमप्रमादेन कार्यं प्रमादात्पतितो भवति ब्रा
ह्मणानामयमेव धर्मोऽयमेव धर्मः एवं भस्मधारणमकृत्वा नाश्नीयाद्योऽन्नमन्यदपि प्रमादात्स्नात्वा भस्मधारणं न गायत्रीं जपेन्न जुहुयाद्ग्नौ न तर्पयेद्देवानृषीन्पितॄन्नयमेव धर्मः

समाचरन्ः सर्वपापप्रणाशको मोक्षहेतुर्नित्यो यं धर्मो ब्राह्मणानां ब्रह्मचारी गृही वानप्रस्थयती नामेतदकरणे प्रत्यवैति ब्राह्मणाः अकृत्वा प्रमादेनैकदिनं रुद्रोत्तरसहस्रं गायत्रीं जप्त्वा
मध्ये जपित्वो यो बरो नैकेन शुद्धो भवति पतितस्य त्वेकरुणमस्य धारणामुमोक्ष्य द्वादशसहस्रं प्रणवं जप्त्वा शुद्धो भवति अन्यथा पाचाय सप्ताल्लावृक्क भवेपरेतः पतितो भवति भस्म नोस्य पद्य
भावस्तत्रानर्थभस्तवानलमन्यद्वावश्यं मंत्रपूतं धार्यमेतस्मात्ः सपुंजानो एविष्कृतास्मापान्मुच्यते मध्याह्ने माध्याह्निकं संध्यात्मपस्यानां तमादित्यानामि सुरेवाधीपानः सुरापानात्पू
तो भवति सुवर्णस्तेयात्पूतो भवति गुरुदाराभिगमनात्पूतो भवति ब्रह्मवधात्पूतो भवति बृह्मवधात्पूतो भवति गोवधात्पूतो भवति स्त्रीवधात्पूतो भवति अश्ववधात्पूतो भवति गजवधात्पूतो
भवति मातृवधात्पूतो भवति त्रिकालमेतत्सपुंजानः सर्ववेदपारायणपुण्यमाप्नोति सर्वतीर्थफलमश्नुते अनुपदनः सर्वमाप्नोति विन्दते प्राजापत्यं रापुष्प्यो यं गो यस्यमेवमावर्तयेदु
पतिवस्मेवमावर्तयेदित्याह भगवान् सांबसदाशिवः इति हृतीयः खंडः अथ मुमुक्षोजाबालो महादेवं सांबं प्रणम्य पुनः पप्रच्छ लिंगिनित्यं ब्राह्मणानां कर्तव्यं यदकारणे प्रत्यवैति ब्राह्मणः
कः पूजनीयः को वा ध्येयः कः स्मर्तव्यः कः पंचध्येयः कः स्थान क्रमेण ब्रूहि समासेन तत्सहोवाच भगवान् ब्राह्मणो वैश्यो वाद्यनन्तः स्नात्वा मार्जनं हृत्सूक्तेन तत्स्वाहृतं वासः परिधते पाप्मनो पहत्ये
उद्यंतमादित्यमभिध्यायन्नञ्जलिनां गः कृत्वाय पास्ताने त्रिपुण्ड्रं भवेते नैवरुद्राक्षा श्रेत्राल्य वेनत्रससस्पर्शः न तथा चान्ये मूर्ध्नि चत्वारिंशच्छिरवायामेकं त्रं यथा श्रोत्रयोर्द्वादश कंठे द्वात्रिंशद्वा
हौ षोडश द्वादश मणिबंधयोः षट्षट्कर्णयोस्तनस्सं ध्यां कुर्याद्रहरहः संध्यामुपासीत अग्निर्ज्योतिरित्यादिभिर्मन्त्रैर्जपान् शिवलिंगं त्रिसंध्यं मध्ये कुशे व्यासीनो ध्यात्वा सर्वमात्मे
वरुब माहर्हिरण्यवाहुं हिरण्यरूपं हिरण्यपाशविमोचकं पुरुषं कृष्णपिंगलं ऊर्ध्वरेतं संविरूपाक्षं विश्वतः सहस्राक्षं सहस्रशीर्षं सहस्रः वरणं विश्वतोवाहुं विश्वात्मानं एकमद्वैतं निष्क
लं निर्गुणं शांतं शिवमक्षरमव्ययं हरिं हिरण्यगर्भो दिस्तद्ध्यानं अग्रमेयमनाद्यंतं हृत्स्थं ने ग्भिविं अरसितं नभस्स नाविल्वदलैस्त्रिशाखैरार्द्रैर्वा नवत्रसं मर्शलनः पूजासाध नं कल्पयेच्च नैवेद्यं


ततश्चैकादशगुणोऽष्टौ जपनीय एकगुणो वा ततः वा ह्सुरौ वा शैवो मंत्रो जपनीयः ॐमित्यग्रे आहरेन्नम इति पश्चात्ततः शिवायेत्यक्षरद्वयं ॐमित्यग्रे आहरेन्नम इति पश्चात्ततो महादेवायेति
पञ्चाक्षरात्मनात्तारकः परमो मंत्रः तारकोऽयं पंचाक्षरकोऽयं शैवो मनुस्तारको मनुः शैवस्तारकः अयमेवोपदिश्यते मनुरविमुक्ते शैवेभ्यः सान्नजीवेभ्यः अयमेव मंत्रस्तारयति स एवो ब्रह्मोपदेशः
ब्रह्मा सोमोऽहं पवनः सोमोऽहं पवते ति सोमोऽहं जनिता मतीनां सोमोऽहं जनिता दिवः सोमोऽहं जनिता पृथिव्याः सोमोऽहं जनिताग्नेः सोमोऽहं जनिता मतीनां सोमोऽहं जनिता दिवः सोमोऽहं जनिता पृ—
थिव्याः सोमोऽहं जनिताग्नेः सोमोऽहं जनितासूर्यस्य सोमोऽहं जनितेन्द्रस्य सोमोऽहं जनितोत विष्णोः सोमोऽहमेव जनिता मन्त्रार्थं मम सोवेदानां भूर्भुवः स्वरादीनां सर्वेषां लोकानां चाविश्व भूतं च
वतं चित्रं बहुधा जातं जायमानं च यत् तत्सर्वस्य सोमोऽहमेव जनिताविश्वाधिको रुद्रो महर्षिः हिरण्यगर्भादीन् अहं जायमानान् पश्यामि यो रुद्रो अग्नौ यो रुद्रो अप्स्वन्तर्य ओषधीषु यो रुद्रो वि
श्वा भुवनाविवेश सोऽहं चाहमात्मान्तरात्मा ब्रह्मज्योतिर्यस्मान्न मत्तोऽन्यः परोऽहमेव परो विश्वाधिको मामेवं विदित्वा संसरन्ति कं तज्जमहं द्रावयामि तस्मादहं रुद्रो योऽहं सर्वेषां परमा गतिः सोऽहं सर्वकः
यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तं मामेवं विदित्वो पासीत भूतेभ्यो देवेभ्य एषु तोऽहमेव भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च सो
मा अमृत एव योऽहं सर्वेषामधिष्ठाता सर्वेषां भूतानां च पालकः सोऽहं पृथिवी सोऽहमापः सोऽहं तेजः सोऽहं वायुः सोऽहमाकाशः सोऽहं कालः सोऽहं दिशः सोऽहमात्मा मयि सर्वं प्रतिष्ठितम् ब्रह्मविदा
मेति परब्रह्मा शिवो मे तु सदा शिवो न अचक्षुर्विश्वतश्चक्षुरकरो विश्वतः करो ऽपादो विश्वतः पादो ऽपाणिर्विश्वतः पाणिरशिरा विश्वतः शिरा विद्यामात्रैकसत्त्वो विद्यात्मा विद्यामयो वि
श्वेश्वरोऽहमजरोऽहं मामेवं विदित्वा प्राप्नुवन्ति संसृति पश्चात् प्रमुच्यन्ते तस्मादहं मुमुक्षुभिर्मोचकः परशिवः मानवं ब्रह्मारण्यमध्यवर्ति नश्च पुण्यात्मानो यत्नेन मामेव प्राप्नुयान्ते मां नयन्न
रावर्तन्ते त्रिशूल निर्मिता काशी मयि स्थितस्मत्काशमेवो मद्ये वा नु प्रविशन्ति मुक्ताः लयं द्विजं हविर्यथा न यज्ञमानमासीदिति तथा एतस्य काकुरावनेन तारकं वपुराप्नुवन्ति एवमेवा देशः ए


वत्त्व परमो धर्मः सत्यान्न च न प्रमदितव्यं नत्वोद्धूलनत्रिपुण्ड्राभ्यां तथा रुद्राक्षधारणात् तथा महदर्शनाद्य प्रमादेनापि नातेर्दिवसरात्रौ निरीक्षुर्व्यात् ब्रूतान्न प्रमदितव्यम् तद्धितपरतत्त्वं तपःका
श्यामेव मुक्तिकामा नामासनं नत्याज्यं मोचकोहमविमुक्ते निवसतां नाविमुक्तासीस्थानम् काश्यां स्थानानि चत्वारि तेष्वथ्यर्हितम् तत्रप्रायमे स्वर्ण्यस्थानं रम्यरण्यां विलासस्थानं पश्चिमा
यां ज्ञानस्थानं उत्तरायां वैराग्यस्थानं तस्मिन्मदंतो निलिप्तमन्त्वयमना यंतमशेषवेदवेद्यं तवेधमनिर्देश्यमनिरुक्तमप्रधृष्यमाशास्यमहितं सावधारमनिरीस्यमहरहर्बुद्धत्वविस्पुरं दाघ
मरसेवितं मां सर्वज्योतिः स्वरूपं लिङ्गं तदेवो पाशितव्यं नैव मासपन्न तलिङ्गं भानुष्ठं ज्योतिर्वायन्त्याकाशं विश्वेश्वराभिधमापातालमध्ये तिष्ठन्ति तदेवा तन्नार्थितोहं सान्नात्रिशूलस्ये बिल्वद
लैपत्रै र्वायोरभिषिच्यसंपूजयेन्न न्मामध्याहितात्मुर्मध्ये वार्पितां गवलकर्मा मसमरिग्धांगो रुद्राक्षभूषणो मामेव प्रपन्नो मदेकपूजानिरतः संपूजयेत् तिरहमन्नाम तं मोचयामि पाशात्संस्
तिरूपात् अहरहरभ्यर्च्य विश्वेश्वरं लिंगं तत्र रुद्रसूक्तैरभिषिच्य तदेव स्नापनं पयः त्रिःपीत्वा महापातकेभ्यो विमुच्यते तथो कमाप्नोति मुच्यते संसारबंधनात् तदनभ्यर्च्य नाश्नीयात् फलमन्न
मन्य द्वाय पयःश्नीयात् तद्रेतो भस्मी भवेत् नापापि वेत्सु पयो भवेत् प्रमादेनैकततत्वतनभ्यर्च्य मां भक्त्वा भोजयित्वा वाके शान्त्वा पयित्वा तन्मांगसिपंच संगत्यै यो ब्रजलेरुद्रस्यानेजयेत्रिवारं रुद्र
नुवाकमादित्यं पश्यन्नभिध्यायन् स्व हस्तेन कमेततो सौरैद्रैरेवंमंत्रैः कुर्यान्मार्जनं ततो भोजयित्वा ब्राह्मणा न्मुक्तो भवति अन्यथा परेतो पातनाम मुक्तो पत्रैर्जलैर्बीजैर्गंधै पूज्य विश्वेश्वरं मांत
तोश्नीयात् कापिलेन पयसा रुद्रसूक्तैरभिषिच्य मामेव शिवलिंगरूपिनं ब्रह्महत्यामुक्तो भवति कापिलेनाज्येनाभिषिंच्य सुरापानान्मुक्तो भवति कापिलेन दध्नाभिषिंच्य स्वर्णस्तेयान्मुक्तो भव
ति सौरादि मैरेमेरभिषिच्य सर्वानवाप्नोति कामान् इरमेकेशंमहाभस्य शतनसहाभस्य शतमानेः शनैरभिषिंच्य मुक्तो भवति संसारबंधनात् मामेव लिंगरूपिनमाघृयांयो रोमास्यां अमावस्या
यां वा महापाते भृहशेसंक्रान्तौ वाभिषिंच्य बिल्वैरस्सन्तैर्दलैस्सपत्रैः संपूज्य तद्वैर्बिल्वैर्दलैरभ्यर्च्य कापिलान्वित गंधसारधूपैः परिकल्प्य दीपं भ्रान्ते नैवान्ने तसाज्यमुपहारं कल्पयित्वा पुनर्धूपदीपा

श्चकल्पयित्वा दक्षिणस्यां ज्वलितमेवं प्रयतो भस्म मम सायुज्यमेति मम सायुज्यमेति एतेन महाप्रस्थाने रखंडैस्तण्डुलैरग्निं पूज्य चंद्रलोककामश्चंद्रलोकमवाप्नोति तिलैरेतावद्भि
रग्निं पूज्य वायुलोककामो वायुलोकमवाप्नोति माषैरेतावद्भिरग्निं पूज्य वरुणलोककामो वरुणलोकमवाप्नोति यवैरेतावद्भिरग्निं पूज्य सूर्यलोककामः सूर्यलोकमवाप्नोति एतै
स्सर्वैरेतावद्भिरग्निं पूज्य स्वर्गलोककामः स्वर्गलोकमवाप्नोति एतैरेतावद्भिर्द्विगुणैरभ्यर्च्य ब्रह्मलोकमवाप्नोति एतैरेतावद्भिरेव चतुर्गुणैरग्निं पूज्य विष्णुलोकमवाप्नोति एतैरेतावद्भि
रेव शतगुणैरग्निं पूज्य चतुर्जालं ब्रह्मकोशं यं मृत्युर्नावपश्यति तमतीत्य मल्लोककामो मल्लोकमवाप्नोति नास्मांल्लोकान्परं काम्यं परमवाप्य न शोचति न स पुनरावर्तते न स पुन
रावर्तते लिंगरूपिणीं मामेवं संपूज्य चिंतयंति सिद्धा योगिनो ध्यायंति यजंति यज्वनः मामेव सत्यं विवेदाः सांगाः सोपनिषदः सेतिहासः तमनोऽस्म्यहमेव सर्वमपि सर्वं प्रतिष्ठितम् ततः काश्यां
प्रपन्नैरन्वहमेवाग्निं पूज्य तत्र गणाः रौद्रा नानामुखा नानाशस्त्रधारिणो नानारूपधरा नानाचिह्नास्ते सर्वे भस्मदिग्धांगा रुद्राक्षाभरणाः कृतांजलयो नित्यमभिध्यायंतः संति तत्र
पूर्वस्यां दिशि ब्रह्मा कृतांजलिरनिशमुपास्ते प्रतीच्यामिंद्रो सन्ततांगडुपास्ते उदीच्यामग्निमुखो रुद्रांगारकं ध्यायाहिमांगाहिमभूषाहिमवस्त्राः समुपासते मामेव वेदाश्च तन्मूर्तिधराः दक्षिणा
यां दिशि मुक्तिस्थानं तन्मुक्तिमण्डपसंज्ञितं तत्रानेकगणाः पालकाः सायुधाः पापमालुक्ताः तत्रत्राक्षयः शांभवायामुपतामहाशेवामव्यार्पितमनेषु योनिगणा रोजितेंद्रियामामहैवतं चतुर्थमे
कमाशस्यमुपास्य शिवं सांवं संसारमोचकं ध्यात्वा वसंति रुद्रलक्ष्मपरायणाः येऽत्र वर्तंते शैवं पश्चाद्वायं जपं तत्तारकं स प्रणवं मोक्षमानति ध्वंति तत्रैकरस्त्र वेदिकात्र ह्मासीनः काश्यां स्मकं
कुणापाश्चवातानीयाम केभ्यस्येवसंवेश्य भस्मालिनरुद्राक्षभूषितानूपरूप्याश्यमाभूदेनेयांजत्मारम्सूचेतितारकं शैवं मन्त्रमुपदिशामि ततस्ते मुक्ता मामनुविशंति विज्ञानमयेसौवे न पुनरावर्त
न्ते रुद्राशेषविष्णुहरिविनतेवस्तुतार्थमुपदिश्यते शैवो मंत्रः पश्चाद्वारस्तत्र मुक्तिस्थानदेशं तत्कारणं तत्तो मद्दर्पितकर्माणां मद्विशिष्टचेतसां मद्रूपतामवति नास्त्येषामियं ब्रह्मविद्येयं ब्रह्म

वीर्यं मुमुक्षवः काश्यामेवासीनाः वीर्यवंतो विद्यावंतो विज्ञानघनं वृत्रकोशं चतुर्जालयं रुद्रसुर्नावपश्यति यं वृत्ता नावपश्यति यं विष्णुर्नावपश्यति यमिंद्राग्नी नावपश्यतः वरुणाद
यो नावपश्यंति तमेव तेजःपुंजं विच्छिन्नं भवो हं मम मां संभिन्नप्रवसंतं चेद्रकोटिसमप्रभम् चंद्रकिरीटं सोमसूर्याग्निनयनं विभूतिविभूषितविग्रहम् शिवं मामेवमभिध्यायंतो मुक्तिविल्वया
मुक्तवंधामयेव वली नाम भवंति ये चान्ये काश्यां पुरीषकारिणः प्रतिग्रहीतारस्तत्र भस्मधारणात्तस्य तत्र हत्या स्वधारणात्तस्य तत्र सोमपान रवृतास्तत्र विश्वेश्वरार्चनात्तस्य तत्रान्तर्गृहयात्रास्तत्र पञ्चा
क्षरजपात्तस्य तत्र रुद्रजपात्तत्र भैरवार्चनाभैरवीं घोरां यातनां नानाविधां काश्यां तेरभुक्त्वा ततः शुद्धा मां प्रपद्यंते ये चान्तर्गृहे रेतो मूत्रं पुरीषं वा विसृजंति मोहादज्ञानतो ममैवांतस्तत्रोः कु
र्वंति तत्सर्वमनंतं तत्र यातनाबीजमेव भवति यत्र मूत्रं रेतः पुरीषं वा विसृजं स्यान गृहे तत्र तेन तेतेसिं च त्ते पितृ न नतमेव पापकारिणां मत्तं पश्यत्तोल लोहितो भैरवस्तं प्राप्यन्त्र स्वयं स्ते ज्वल
ज्वलत्कुरौख्वन्से ख्वपितत्र भ्वाप्रमाद नति ववसेत्काश्यां लिंगरूपिण्यां लिंगरूपिसयामिति ॥ इति बृहज्जाबाले अविमुक्तवैभवप्रकाशो नाम ततीयः स्वराः । सद्योजातात्पविद्महे महादे
वायधीमहि तन्नो घोरः प्रचोदयात् इति भस्मगायत्री । सिद्धं ब्रूलपरं जोतिः स्वयमानंदविग्रहः विज्ञानादि महाभूत विज्ञानत्वेन भासते पश्मामुपनिषदं ब्राह्मणो वा क्षत्रियो वा नित्यमधी
ते अश्रोत्रियः श्रोत्रियो भवति अनुपनीत उपनीतो भवति स सर्वैर्तथ्यासो भवति स सर्वेषु वेदेष्वधीतो भवति स सर्वपूतो भवति स सर्ववेदैर्ज्ञातो भवति तद्धारणात्सर्वेषु तीर्थेषु स्ना
तो भवति स सर्वैः क्रतुभिरिष्टो भवति अथ कालाग्निरुद्रः प्रोवाच योगध्यानानां शिवशंकोश्चेयः शिवंकरः सर्वमन्यत्परित्यज्येतामधीत्य ब्राह्मणो वा क्षत्रियो वा गर्भवासान्मुच्यते इमां सत्य
म् अथ कालाग्निरुद्रः प्रोवाच सकृज्जप्त्वा शुचिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणपत्यमवाप्नोति तृतीयं जप्त्वा देवमेवानुप्रविशति इत्यों सत्यमों सत्यम् ॥ भद्रं कर्णेभिः श्रु
णुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः स्वस्ति नः इन्द्रो वृद्धश्रवा इति ॐ शांतिः ३ इति बृहज्जाबालोपनिषद् ३ अत्रात्पत्तियो यनि घस्माश्रा
श्रार्जितं भूरिकष्टेन लिखितं ग्रंथमद्भुतं मंहर्तुमिच्छति यः पापी तस्य वंशो क्षयो भवेत् ॥

१२





शै०र०

१

श्रीमच्छिवज्ञानमाणिक्यगणपतये नमः ॥ श्रीपार्वतीकांताय नमो नमः ॥ शैवरत्नाकरो लिख्यते ॥ अस्ति प्रशस्तमहिमा सोमः सोमकलाधरः ॥ श्रीमान् सोमेश्वरो नाम देवः सौराष्ट्रनाय
कः ॥१॥ पश्चिमांबुधिकल्लोलमालाधौतपदांबुजः ॥ अनेकयक्षगंधर्वदेवदानवपूजितः ॥२॥ संसारसागरस्यैव रोधस्युपरि वारिधेः ॥ कर्णधार इवाभाति स्थाणुः कृतमंदिरः ॥३॥ तस्य सो
राष्ट्रनाथस्य परिचर्यापरायणाः ॥ आसीत्तत्रैव भगवान् कश्चिदाहिलनामवान् ॥४॥ शिवागमपुराणानां पारगः परमार्थवित् ॥ अग्रजन्मकुलाग्रण्यः शिवभक्तिपरायणः ॥५॥ सः श्रीमा
नाहिलो राधयन् सोमं भर्गो यद्गुग्गुलं धिजेनिस्संदिह्य धूपार्थे स्वदेहसमतोदितं ॥६॥ तद्दत्त्वातिमसाधारस्तत्र सूजकतपोधनाः ॥ पुरस्कारयामासुर्भिक्षामपि समंततः ॥७॥ ततोऽनिवारिते भैक्षे
स वृत्तीदृष्टमानसः ॥ निर्माल्यबिल्वपत्राणि यथापूर्वमवर्तत ॥८॥ तस्मिन्नपि च तैर्धूर्तैर्दग्धं तद्बिल्वनायकं ॥ कंताहारोपनालासो यथापूर्वमवर्तत ॥९॥ कदाचिद्गुग्गुलो भारं वृषेन वहद
न्वनात् ॥ आयात तस्य देवेन शल्यविद्धमभूत्पदं ॥१०॥ स्वकंठपादस्पर्शाद्दोषान्नाहीगुग्गुलमाहितं विवर्धं … नुदस्य तच्छल्यं गछंतं तं शनैः शनैः ॥११॥ अनुगत्यास स सोमेशः किरातवपु
षो मया … मुद्धर्तुं स्वच्छिमाशम्य वारितः ॥१२॥ शिलीमुखमुखेनैव शल्यमुत्पाट्य तत्क्षणात् ॥ हरिर्नैमस्य पार्श्वे स्वे दर्शयामास शंकरः ॥१३॥ कृपया सोमनाथस्य सरागत्वात् गतवेदनः ॥
गुग्गुलवृत्तिनिष्पन्नात्तोपयथापूर्वमवर्तत ॥१४॥ तैः पुनः सन्निवागार प्रवेशे वारिते शिवः ॥ स्वयं विघाटयन्नेव … समहानिशि ॥१५॥ ज्ञानस्तेन तत्कृतां पूजां दृष्ट्वा विस्मितचिंतया ॥ बभूवुराकुलाः सो
पिय यथापूर्वमवर्ततः ॥१६॥ ततः समेत्य ते सर्वे वृत्तभंगाय तत्क्षणे ॥ गुग्गुलं धूपवेलायां तदानीं तमपाहरन् ॥१७॥ तस्मिन्काले स पूजात्मा भगवानाहिलः प्रभुः ॥ स्वदेहमेव धूपाग्नाववपद्यामा
सनिश्चलः ॥१८॥ तस्मिन्क्षणे देववरः प्रसन्नः सौराष्ट्रनाथः करुणासनाथः ॥ तद्रूपयात्रैव सहस्वभक्त्या निनाय कैलासमथाहिलेशं ॥१९॥ तत्संप्रदायविख्यातः सकलागमतत्ववित् ॥ शि
वदेवमहायोगी चासीत् भस्मधरातले ॥२०॥ श्रीरामादिमहासिद्धमीनारिरामेहारणवः ॥ शिवपंचाक्षरीसिद्धश्रीकालंजः समाधिमान् ॥२१॥ यत्रैव पंचाक्षरीवर्णान् शिवमंत्रस्य संयमी ॥ योयां प्रार्थ
यतेविधां प्रकाशयति तत्र तां ॥२२॥ तस्य शिष्यवरो जातो धारणीधरसंयमी ॥ तस्मात्सा देहितोश्चात् … विज्ञानविभुतः ॥२३॥ वेदवेदांतसिद्धांतवेदिसर्वागमाकरः ॥ शिवभावैकनिरतो विनतेतर

भावतः ॥२४॥ सकृदाचिन्महातेजो श्रीशैलोत्तरदिङ्गते। क्षेत्रं महेश्वरं प्राप्य पंचरात्रमुवास हि ॥२५॥ नियमेन स्थितेनासि तत्र श्रीधरणीधरे। कृचिन्त्समाध्येवेलायां शिवदेवगुरुः स्वयं ॥२६
दर्शयित्वा निजं रूपं इहैकाग्निमहाशिला। तदंतर्लिंगरूपेण स्थितमुद्धृत्य मां मुने ॥२७॥ प्रतिष्ठापय तत्रैव त्वमुक्त्वान्तर्मुखिमुक्तिदः ॥ स तथेति प्रतिज्ञाय तत्र स्मात्ता नाग्निमौनपा ॥२८॥ कृपयन्त
त्रैतैः सार्कं तोरणं तत्स्थले शिलां भित्त्वा तल्लिंगमुद्धृत्य जगन्मंगलमव्ययं ॥२९॥ दक्षासाने पुल्लकन्तुष्ट्वा गङ्गयाऽऽगिरा। नत्वा संपूज्य जानीयप्रतिष्ठाप्य विधानतः ॥३०॥ प्रासादमंटपद्वार
प्राकारादि न कारयेत्। चिरं चैवं प्यापरं तत्र शिवदेवहरात्मकं ॥३१॥ संगीतवादित्रमादिविभवैर्विविधोत्सवैः। अर्चयन् शिवदेवेशमवसत्तत्र सुव्रतो ॥३२॥ तावेशाख्या धरणीधरो मुनिरसौ प्रसन्नमत्वाद
रात्। नैवेद्यं महितं ददाति शिवदेवेशायतस्मै सचामुक्तान कल्लिकालचोद्यविभुना दत्तं यथातत्क्षणे। गीतेनस्य तिनादगत्र महिमा तस्यैव भाति प्रभोः ॥३३॥ तत्सुत्रमप्ययसुधामरितामेवकार्येश्वादि
प्यतत्र शिवदेवमुपासमानः। वाग्भूरदर्शनमखाखिलसिद्धिसिद्धलामघुवासनगरींधरणीधरेंद्रः ॥३४॥ एवमेव तपः कुर्वन् मुनिर्वर्षशतावधि। अंते समाधिमविशन्महोयोगसमाधिना ॥३५
तस्मिन्मुनींद्रे धरणीधराय समाधिनिष्ठे जनयत्ये यथापरेतं। यथापिताततच्छिवदेवलिंगं भजत्वहारं विलयोरकांघे ॥३६॥ मल्लिनाथ शिवदेवनामकौ तत्सुतौ गुणनिधी बभूवतुः। तत्र जेष्ठतनयो
प्यवधूततमापयोयोगनिमग्नमानसः ॥३७॥ द्वितीयपुत्रः शिवदेवधीमान् संगीतसाहित्यकलाविलासितः। तत्त्वपाथोनिधिपूर्णचंद्रमा वभौ जगन्मोहनमूर्तिचंद्रमः ॥३८॥ तत्म
त्रयोगहठयोगलयाख्य योगश्रीराजयोगविदितः परमार्थवेत्ता ॥ मल्लोकपावनसमागतशंभुमूर्तिः सत्कीर्तिपूरयति पूर्णजगत्कारं उः ॥३९॥ वाक्तत्सिद्धू दूरम्भवतो स्मरणात् ज्वलानलतम न
तत्रैव स्थैः। ज्योतिः प्रकाशप्रमुखैरनेकैः प्रसिद्धमागच्छ वदेवयोगी। भक्त्या ग्राणितल्लोपशोवितरणं विनस्यवाः दे ॥४०॥ पुराभूतवृत्तविधातृसंभ्रममव शान्तिं नायय प्रज्ञास्सुधीः। सर्वज्ञे शि
वदेवसंयमिवरे रम्ये लपालोत्पदान्तो वेतत्स्यमहात्मनो विजरतो नाद्य प्रभावः कृतः ॥४१॥ आग्रस्यलूतिकाजालेजगत्स्यविवर्तं तद्वधु ॥ यावद्योगिसंसारे तावन्नास्ति महासनः ॥४२॥ गुरुणी
कृतमहारोपसरणी कृतजगत्रयः। स्मरणो कृतमहाकालः शिवदेवगुरुर्वभौ ॥५१॥ एवमेवाखिलान् भोगान् भुक्त्वांते संसमाधिना। आदिमापपरं ज्योतिर्बूलरं प्रकाशयन् ॥४२॥ श्रीशैले

शै०र०
२

रुद्रस्यैव देहोऽन्तं सुविज्ञेयं हि ते योगिनः सत्यदेहं स्वर्गा तेन तत्र वाहे प्रसन्नचरिते न ततो मिथ्यामाने ॥ न देहं तत्र वाहेपरिसरानितनयापूर्ववत्सर्वा निमत्ते ४ सारत्वं स्वशक्तत्वसंकृत्य नदृशो

न त्रिचिकार ॥ ४३ ॥ शिवदेवगृहद्वीरसिंधौ जातो व्यरज्यत । सोमनाथमहायोगी दिव्याद्धोपान्तरं यथा ॥ ४४ ॥ मकराणां पात्त नार्थं परि ल्लनक्रीला भस्मास्थिमाला कपालैः

स्तोमान्सौराष्ट्रनाथस्वयमिति सुभगः सोम्यसर्वज्ञमूर्तिः ॥ सोयं विश्वं भरायां व्यचरन्मुरसोमेश्वरो नामभूत्वा । नानाभूपालमौलिस्थपितमणिगणोद्योतपादारविंदः

४५ ॥ संसारकान्तारचरज्जनानां न खेदयनो दापचरन्धरण्यां । कलानिधिः श्रीगुरुसोमनाथो जगाम शांतिं परमां यथार्थां ते ॥ ४६ ॥ शिवदेवाग्रजातस्य मल्लिनाथस्य नंदनो ॥

धरयोगीन्द्रयोगिनां वर्यो विजेतुः ॥ ४७ ॥ योगिनां पः सनापः सगुणागमरागरोगः सर्वशास्त्रागमज्ञो योगी भोगी वियोगो भवभयदुरितैर्वीरमाहेश्वरो सो निर्मज्ञानसंपानिलवि ल

लिप्त्वा वपुरागमागमान्ध्वंदुरंते ॥ शैवाचारप्रज्ञातां विततमकरो चैव रत्नाकरात्मा ॥ ४८ ॥ वीरतंत्रे ॥ शैवसंस्कारिणां शैवज्ञानधर्मविदां सतां । अष्टाविंशति भेदोऽनंतनत्र शैवमि

ति स्मृतं ॥ ४९ ॥ कामिकं योगजं चिंत्यं कारणं त्वजितं तथा । दीप्तं सूक्ष्मं सहस्रं च अंशुमान सुप्रभेदकं ॥ ५० विजयं चैव विश्वासं स्वायंभुवमथानलं । वीरं च रौरवं चैव मकुटं विमलं तथा

॥ ५१ ॥ चंद्रज्ञानं च बिंबं च प्रोद्गीतं ललितं तथा ॥ सिद्धं संतानसर्वोक्तपारमेश्वरमेव च ॥ ५२ ॥ किरणं वातुलं चैव अष्टाविंशति संहिताः । आगमेषु सर्वेषु वेदांतो यत्रि वस्तु च ॥ ५३ ॥

शाखा सूक्ष्मशास्त्रेषु पुराणेष्वपि वस्तु च ॥ इतिहासेषु सतां येषु वसेये सर्वतः ॥ ५४ ॥ वीरमाहेश्वराचारो नदृष्टः प्रकल्प्यते । श्रीरुद्रभाष्यकृत्वा श्वेताश्वतरबृहदारण्यमोक्षदंतानिरम

कं बृहज्जाबालशिवसंकल्पसौगर्भकौस्मापनशुल्ककालाग्निरुद्र । कपालशाखोपगालववाजसनेयजाबालकैतेवहं स्ववृसानकैवल्यबोधायननारायणकंठ । अथर्वशिरः शिखाये

प्प्लिसोसौंननारायणवाज्जोनवेयपैंङ्गि । दुदुषिंदगुप्ति । मांडुक्यारुकमासुकरवेकरदयामावदेकररणविघातारह वेनाबजरकाहिरण्यकेशि धेयमुक्तेयपानवयाई वेयवेनेयवेधे

यचर्चकम्रवणसुरायणीय । जौनथाथायणीय । खल्वलस्राव्यमुद्रलवृल । आश्वलायनरेवत्यहि ॥ संख्यायनोपामैत्रायणीय । साम । तरिनवासुधायणीय ॥ नारायणीयासत्य

सत्पूत्रघात्रिदशो नक्री शातत्पवार्हस्पत्यमौं ऽकाहव्नवेति शास्त्रोपनिषदादिषु प्रकल्प्यते॥ स्मरन्तयः। ॐ। मन्वत्रिविष्णुहारितयाज्ञवल्क्योशनोंगिरयः। यमापस्तंबसंवर्तैः कात्यायनबृ

हस्पतिः। पराशरव्यासशंखलिखिता दक्षगोतमौ शातातपो वशिष्ठश्चार्थमशास्त्रप्रयोजनाः॥ इत्यादिधर्मशास्त्रेषु प्रकल्प्यते। ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा। तथान्यं नारदीयं

च मार्कंडेयं च सप्तमं॥ आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा। दशमं ब्रह्मवैवर्तं लैंग्यमेकादशं तथा। वाराहं द्वादशं प्रोक्तं स्कांदं [illegible] त्रयोदशं। चतुर्दशं वामनं च कौर्मं पंचदशं तथा। मात्स्यं च गारु

डं चैव ब्रह्मांडं च ततःपरं॥ इत्यष्टादशपुराणोपपुराणादिषु प्रकल्प्यते॥ ॐ श्रीमद्वीरशैवाचारनिरतैः रेवणसिद्धादिपरैः सदालिंगसंगहितैर्लिंगपादोदकप्रसादोपभोगसाधनैः शिवभक्तैः स

कलश्रुतिस्मृतीतिहासागमपुराणोक्तप्रकारेण। ॐ श्रीनंदिनाथवीरभद्रभृंगिरिटियुक्ष्मदंतस्कंदगणभरताहंगणभरतांडपारितवंदेश्वरः। दारुकरेणुकवीरकर्णविजयकर्णघण्टाकर्णरेणु

कर्णभीमकर्णशंखकर्णगोकर्णसुकेतुरूपमन्युभृगुदधिचिगोतमादिप्रथमगणैर्मुनिगणैः पुरातनभक्तगणैरेवमनुष्ठितत्वात् तदप्यर्पितैषां मार्गेणैवावलंब्य वर्तनं तस्मै वा एव नैरव

श्लोकैः सारभूत्य मदीरशैवमार्गावलंबिनां महेश्वराणां सुप्रबोधाय शैवरत्नाकरं वक्ष्यामः। ॐ। अस्मिन्नेव शैवरत्नाकरे वर्णाश्रमधर्मशैवभेदघोरमाहेश्वरभेदशिवाद्येकप्रकरणपंचा

क्षरमाहात्म्यं च भस्मप्रकरणं रुद्राक्षनिर्णयः श्रीविभूतिमाहात्म्यरुद्राक्षमाहात्म्यगुरुशिष्यलक्षणादीष्टप्रकरणं पंचाक्षरमाहात्म्यं लिंगोत्पत्तिर्लिंगलक्षणं॥ अंतर्योगविधिर्लिंगार्चनवि

धिलक्षणाचारविधिः। पादोदकमाहात्म्यं लिंगोत्पत्तिर्लिंगलक्षणं। अंतर्योगविधिः प्रसादमाहात्म्य॥ सदाचारप्रकरणं॥ प्राणलिंगस्थलं॥ जंगमस्थलं॥ शिवयोगीश्वरशरीरोक्तस्थलं॥ पात्रदेश

कालधर्मः। पदे[illegible]करणं। माहेश्वरमाहात्म्यनीत्येकविंशमध्यायः॥ ॐ॥ तत्रादौ वर्णाश्रमधर्मः॥ वायवीयसंहितायां। श्रीदेव्युवाच। केन वश्यो महादेव मर्त्यानां मंदचेतसां॥ अल्पसत्वो

ल्पबुद्धीनामल्पानाम[illegible]नाम्॥ ईश्वर उवाच। ५५। न कर्मणा न तपसा न जपैर्नासनादिभिः। न ज्ञानेन न चान्येन वश्योहं स्यात्कृपां विना। ५६। मम्मद्धेतु स्वधर्मस्य रक्षणं वर्णिनामिह। स्ववर्णाश्रमध

र्माणां वर्तने यत्नमानकं [illegible]॥ ५७॥ न [illegible] वर्तितुं मह्यं दामपि नान्यस्य कस्यचित्। ममाभांतिप्रसंगो यः सत्यमस्तेयमेव च॥ ५८॥ ब्रह्मचर्यं तपः क्षांतिर्वैराग्यं भस्मसेवनं। सर्वसंगनिवृत्तिश्च दशै

नातिविशेषतः॥५९॥ अध्यापनं चाध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं चेति कर्माणि ब्राह्मणस्य षट्॥ ६०॥ अध्यापनं याजनं च क्षत्रियस्याप्रतिग्रहः। रक्षणं सर्ववर्णानां युद्धे मृत्युवि-
धस्तथा॥ दुष्टपक्षिमृगाणां च दुष्टानां शासनं नृणां। अविश्वासस्सर्वत्र विश्वासो मम योगिषु। ६१। स्त्रीणां संसर्गकालेषु च मूर्छतो मेव चा। सदा संचारिनेत्रत्वे लौकिकवर्तनं नवेदनं॥ ६२
सदास्त्रमरणं चैव ममस्कंदधारणं। सज्ञापि वाश्रमस्थानामेव धर्मस्य संग्रहः॥ ६३॥ गोरक्षणं च वाणिज्यं कृषिर्वैश्यस्य कथ्यते। ६४। उपानत्करणं वै वमम स्वेत्रेतमा अपः कपिलात्सी-
रपाने न ब्राह्मणीगमने न च॥ ६५॥ वेदाक्षरविचारेण शूद्रस्य नरकं ध्रुवं। ब्रह्मचर्यवनस्थानां यतीनां ब्रह्मचारिणां। लिंगं गयोनां भूयोऽर्चाभि क्षालनं तथा। ६६। वानप्रस्थाश्रमस्थानां
यतीनां ब्रह्मचारिणां। लिंगं गयोनां भूयोऽर्चाभिक्षालनं समानमिदमिष्यते। धर्मपत्न्यानुगमनं गृहस्थस्य विधीयते। ६७। स्त्रीणां तु भर्तृशुश्रूषा धर्मो नान्यः सनातनः। मदर्चनं च कस्यानि-
नियोगो भर्तृराज्ञि चेन्न। ६८। या नारी भर्तृशुश्रूषां विहाय व्रतमाचरेत्। सा नारी नरकं याति नात्र कार्या विचारणा। ६९। अथ भर्तृविहीनानां वक्ष्ये धर्मसमासतः॥ व्रतं दानं तपः शौचं भूशय्यानक्त-
भोजनं॥ ७०॥ ब्रह्मचर्यं सदा स्नानं भस्मना सलिलेन वा। दंतैर्मौनं क्षमा नित्यं संविभागो यथाविधि। ७१। इति संक्षेपतः प्रोक्तो ममाश्रमनिवेविरणं। ब्राह्मणस्त्रिविशां देवि पतीनां ब्रह्मचारि-
णां॥ ७२॥ नैष्ठिकवानप्रस्थानां गृहस्थानां वसुंधरे। शूद्राणामपि नारीणां धर्म एषः सनातनः। ७३। आज्ञया सिद्धमखिलं धर्ममाश्रमिणामिह। ब्रह्मणा कल्पितं पूर्वं ममैवाज्ञापुरःसरं ७४
सतु पेता महोधर्मो बहुवित्तक्रियान्वितः। नास्य तत्फलमूर्ध्विष्व क्लेशायाससमन्वितः। ७५। न शक्यते चेतपः कर्तुं मत्स्यविहितैर्द्विजातिभिः। सुखोपायमयो ह्येष धर्मः काम्यार्थसाधनं। ७६। महा-
त्मनामनन्यानां मयि विन्यस्तचेतसां। अत्यधालसणं प्राकृमेमधर्माधिकारिणां। ७७। मद्भक्तजनवात्सल्यं पूजायां चानुमोदनं। स्वयमभ्यर्चनं चैव ममार्थे चांगवेष्टनं। ७८। मत्कथाश्रव-
णे भक्तिः स्वरनेत्रांगविक्रिया। ममानुस्मरणं नित्यं सर्वदा मपि के नवं॥ ७९॥ मत्केरह विर्धं वित्कृ यस्मिन् म्लेच्छेऽपि वर्तते। स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पंडितः। ८०। न मे प्रियश्चतुर्वे-
दी मद्भक्तः श्वपचोऽपि यः। तस्मै देयं ततो ग्राह्यं स च पूज्यो ममाज्ञया। ८१। ज्ञानं ज्ञेयमनुष्ठेयमधिकारो यसाधनं॥ साध्यं चेति षडर्थानां संग्रहस्त्वेष संग्रहः। ८२। गुरोरपि गतं ज्ञानं ज्ञेयं पाशः पशुः

पतिः लिंगार्चनापनुष्ठेयं भस्मैवापि कृतं द्विजैः ॥८३॥ साधनं शिवमंत्राघं साध्यं शिवसमानता ॥ षडर्थसंग्रहस्त्वस्य ज्ञानात्सर्वज्ञतो भवेत् ॥८४॥ इति श्री शैवरत्नाकरे प्रथमोऽध्यायः ॥१॥
वीरतंत्रे शैवाः सप्तविधा ज्ञेयास्तेषां भेदं शृणु स्वक ॥ अनादिशैवः प्रथमो ह्यादिशैवो द्वितीयकः ॥१॥ तृतीयस्तु महाशैवश्चानुशैवश्चतुर्थकः ॥ पंचमोऽवांतरः शैवः षष्ठः प्रवर उच्यते ॥२॥
सप्तमोऽन्त्यशैवस्तु शैवानां भेद उच्यते ॥ अनादिशैवो विज्ञेयो रुद्र एव न संशयः ॥३॥ आदिशैवा द्विजास्तु विप्रेंद्रा ह्यादिशैवाः प्रकीर्तिताः ॥ कौशिकः काश्यपश्चैव भारद्वाजोऽत्रिरेव च ॥ गौतमश्चैव वर्यं चे
ते पंचवक्त्रेभ्यो दिवि जाताः ॥ तेषां कुलीनां वंशे तु जाताश्चैव शिवद्विजाः ॥४॥ पुनर्दीक्षां न चार्हन्ति कृता चेत्तु निष्फला ॥ उपनीयं च काले तु मंडले पूजयेच्छिवं ॥५॥ स्थापनं चांगमुख्यं च कारयेच्च शिव
द्विजान् ॥ महाशैवाश्च विप्रास्तु शिवदीक्षासमन्विताः ॥६॥ आत्मार्थं वा परार्थं वा शिवदीक्षाविवर्जितः ॥ पूजयेद्यदि विप्रस्तु सर्वदेवलको भवेत् ॥७॥ विप्रक्षत्रियविट्शूद्रा दीक्षिताश्चानुशैव
नः ॥ आत्मार्थं यजनं कार्यं न कुर्वंत परार्थकं ॥८॥ सोमशंभोः अघोरात्मानुबंधैः शिवलिंगपरिस्थशैवेन ॥ कल्पकोटिसहस्राणि भवति कुलदानवः ॥९॥ वैदिके गर्भगेहे तु प्रविष्टे स्पर्शने कृते ॥
मङ्गानि विसृज्याथ पुनः पुण्याहमाचरेत् ॥१०॥ एतैस्तु लक्षसौर्ययुक्तो गर्हितः सर्वकर्मसु ॥ स्थिरलिंगे तु यस्त्र ज्ञात्वा कुर्वीत कराचनं ॥११॥ क्षत्रियाश्चापि वैश्याश्चत्वनुशैवा इति ॥ स्मृताः शूद्रोऽवांतरशै
वस्तु उच्यते क्रमशो ध्रुवा ॥१२॥ सवर्णो वर्णमध्यस्थ कुलालाः पार्श्वकास्तथा ॥ प्रवरं शैवमाख्यातमिदं मध्यं प्रवरस्तु स्वपि ॥१३॥ अन्येषां चैव जातीनां संत्यशैवमिहोच्यते ॥ वायवीयसंहितायां शैवे
माहेश्वरे श्चैव कार्यं मंत्रवर्हिः क्रमात् ॥१४॥ शैवा माहेश्वराश्चैव नास्यं नमिह भिद्यते ॥ यथा नयानभिद्यंते शैवा माहेश्वरा अपि ॥१५॥ शिवाश्रितेषु यज्ञेषु ज्ञानयज्ञरता नराः ॥ माहेश्वराः समाख्या
ताः कर्मयज्ञरताभुवि ॥ तस्मादभ्यंतरे कुर्युः शैवा माहेश्वरा बहिः ॥१६॥ वाह्ये वाभ्यंतरे वापि यत्र स्यान्नसोऽस्तिः ॥ प्राग्वासनावशादेव तत्र निष्ठां समाचरेत् ॥१७॥ बहिर्यागोपचारेण देवं देवि च पूज
येत् ॥ अथवांतर्गृहश्चैव पूजयेत्परमेश्वरं ॥१८॥ अथ वीरतंत्रे ॥ ज्ञानगम्यं रहस्यं च कलेवलस्य पदकारणं ॥ वीरशैवमिति प्रोक्तं एतत्त्वं शृणु मुच्यते ॥१९॥ एकएवायते नास्मिन् सर्वस्मिन् जगतीतिह ॥
विशिष्टमीर्यते यस्माद्वीरश्च त्वभिधीयते ॥ शिवेन कृतसंबंधे शैवमित्यादरं तं बुधैः ॥ उभयोः संपुटीभावाद्वीरशैवमिति स्मृतं ॥२०॥ शैवं तु द्विविधं प्रोक्तं श्रौतमश्रौतमेव च ॥ श्रुतिसारमयं शैवं ॥ तंत्रवतंत्रमित

स्मृतं॥२२॥ यतो वाचो निवर्तन्ते अप्राप्य मनसेति यत् श्रुतिस्मृत्यादिवर्णितत्वाद् अन्यो न मितिगीयते॥२३॥ अथ शैवागवक्ष्ये च कालेन क्षीणकर्मणां॥ अनहं तामिमेनतत्स्वयमेतत्स्वयमेवाहि संभवे
त्॥२३॥ पूर्वसंस्कारमासाद्य कर्मपाकं परिस्पृचाः॥ जातिधर्मानुरोधेन शैवमन्यो न माचरेत् कर्मजाः सर्पदेहेभ्यो विभक्ता यस्य जायते॥ न तत् धर्मं त्यजेत् अन्यो वेत्सु धीरपि विपद्यते॥२४॥ इति श्रीशैवरत्नाकरे
द्वितीयोध्यायः॥२॥ गंधर्व उवाच॥ त्वं विश्वकर्ता न च नास्ति कर्ता त्वं विश्वभर्ता न च नास्ति भर्ता त्वं विश्वहर्ता न च नास्ति हर्ता त्वं विश्वनाथस्त्वं च नास्ति नाथः मेते योश्रावयां श्रुतिः॥१॥ नास्मर्थे संगृहे। त्वं
ब्राह्मणास्त्वदुपधावनमेव कार्यं त्वं ब्राह्मणो नित्यनरेणाभवं समुपास्याः। त्वं ब्राह्मणो न वरं चरित्रं निषेवणो न संभाव्ययेन दिवसः प्रवरं प्रमाणं॥२॥ वाक्यं तत्रैव॥ ब्राह्मणाः कथ्यते रुद्रः क्षत्रियः कमलोदरः
वैश्यः कमलगर्भश्च शूद्रस्याल्काकशासनः॥२॥ वीरतंत्रे॥ ब्राह्मणस्य शिवो देवः क्षत्रियस्य जनार्दनः॥ वैश्यस्य भास्करो देवः शूद्राणां सर्वदेवताः॥३॥ पाराशरपुराणे॥ ततो विप्रत्वसंबंधः शिवे नैव
हि पुज्यते॥ शंकरः सर्वदेवाश्च वत्सल पुरंदरः॥४॥ पितामहस्तु वैश्यश्च क्षत्रियः परमो हरिः। ब्राह्मणो भगवान् रुद्रः सर्वेषामग्रजो मतः॥५॥ ब्रह्मभावोपि रुद्रस्य ब्राह्मणत्वं नैव हेतुजं। ब्राह्मणो
वै सदा लोके ब्राह्मणं चोपधावति॥६॥ महाब्राह्मणमीशानमुपधावेत्त चेतरं। सदा महांतमात्मानं विदित्वा स द्विजोत्तमः॥७॥ वायुतंत्रे॥ रुद्र एव सदा साक्षाद्ब्राह्मणो ब्रह्मभावनः। ब्राह्मणाः प्रतिनित्य
स्मातं ब्राह्मणो रुद्र एव वै॥८॥ प्रजानां पालको राजा विष्णुः सर्वस्य पालकः॥ तेन राजा हरिस्तस्मात् स राजा न द्विजोत्तमः॥९॥ राजाधिराजः सर्वेषां त्र्यंबकस्त्रिपुरांतकः॥ तस्यैवानुचराः सर्वे ब्रह्मविष्णु
रोगमाः॥१०॥ स्कांदे॥ विष्णुसंज्ञास्त्वसंख्याता ह्यसंख्याताः पितामहाः॥ असंख्याताः सुरेंद्राश्च नित्य एको महेश्वरः॥११॥ शिवरहस्ये च गर्गांसे इति वचनं। मग्ध्येदुचूडचरणांतराणि विहाय यवघोनवद्धि
धिहरींद्रमुखान्सुरांश्च॥ सेवंति गाढतमसेकविनाशहेतुमूढा हितेषु तरं मरभक्तिहीनाः। व्यासविष्णुसंवादे॥ विष्णुरुवाच॥ जगाम शरणं देवं सर्वभावेन शंकरं॥ संत्यज्य तत्र वत्सं वै ब्रह्मविष्णू हि कं तथा
१२॥ यो महादेवमन्यैन हीनं देवेन्द्रमेति। स लक्ष्मा धारणं कूलेसोः त्यजानां स्वजो त्यजः॥१३॥ कर्ताहं सर्वजगतां मम कर्ता महेश्वरः तस्य देवाधिदेवस्य कर्ता कोपि न विद्यते॥१४॥ महेश्वरपरा सत्संस्थानं
भवति सं परं॥ यथाह तं दधीचे न विष्णोर्वै स श्रीयः परं॥१५॥ अत्र मे वचनं व्यास श्रुणु मूर्ख यथार्थवत्। यच्छ्रुत्वा सर्वभूतानां शिव एव भवेन्मतिः॥१६॥ किमत्र बहुनोक्तेन शिवं ध्यायेच्छिवकरं शिवार

मंत्रपरित्यक्तस्य देवतं मुक्तिमुक्तये ॥ १७ ॥ सौरसंहितायां । सर्वान्देवान्परित्यज्य पञ्चस्वं चाप्सु मोक्षार्थं । सर्वान्मंत्रान्परित्यज्य जपेन्मंचाक्षरीं परां ॥ १८ ॥ शिवमेकं परित्यज्य योऽन्यदेवमुपासते । त्यक्ते नोजातन्त्वौ
नीरे कूपं खनति दुर्मतिः ॥ १९ ॥ पराशरपुराणे । विहाय सांबमीशानं यजन्ते देवतान्तरे ॥ ते महाघोरसंसारे पतन्ति परिमोहिताः ॥ २० ॥ शिवधर्मे । महेश्वरकृतं सर्वं त्रैलोक्यं सचराचरं । तेन कृते घंभविष्यंतियेन
भक्ता महेश्वरे ॥ २१ ॥ दधीचिवीरभद्रगौतमादिभिः ॥ दक्षाध्वरादिषु शैवेतरवैदिकानां श्रौतस्मार्त्तानुष्ठानं वा स्यात्तैर्वा यारणपतनं भवति इति शिवभक्तिष्वनजायतइति । पूर्वमेव वचनमुक्तं भवति । यथा
कर्मसु उक्तं । किं सा सारे भवंति बहुधा विप्रा विद्याभ्यासे न जन्मना । आचारेण च नामानि तेषां वक्ष्ये पृथक्पृथक् ॥ २२ ॥ जातिसंस्कारमनुष्ठानं सदाचारेण मा प्रमाः । यं चैते संति यस्मा सोऽस ब्राह्मण इतीरि-
तः ॥ २३ ॥ विप्रोक्तसर्वसंस्कारैर्वारेणान्वितस्त्रपः । शुद्धब्राह्मणदंपत्योर्जातो विप्रइतीरितः ॥ २४ ॥ वेदमध्यापयेच्छिष्यान्स्वाध्यायध्यापकस्तु तं । वेदशास्त्रेषु विख्यातो योऽसौ भट्ट इतीरितः ॥ २५ ॥ वर्णेर्वेदधरो
योऽसौ त्रिविरित्यभिधीयते । एकां शाखामधीते यः स वै श्रोत्रियसंज्ञकः ॥ २६ ॥ सर्वांगमधि ये सावमूचानाभिधानकं । कल्पज्ञो ऋषिकल्पस्याद्दृषिणः सूत्रार्थवाचकः ॥ २७ ॥ समस्तश्रुतिमंत्रज्ञो योगाभ्यासलग्न
योगवित् । स राग्निहोत्री वीराख्यः कविः कार्यं करोति यः ॥ २८ ॥ कार्यं करोति यो देवान् प्रतिधर्मायशासनं । स विप्रः सत्कविर्ज्ञेयः पुरस्ताद्द्विवंशजः ॥ २९ ॥ मन्त्रार्थं यो द्विजो मर्त्यान् प्रतिकार्यं करोति यः । स दुष्क-
विरिति प्रोक्तो द्विजातिषु कनीयसः ॥ २९ ॥ आधानं कृतवान्योऽसावाहिताग्निरितीरितः । सपत्नं तु कृतो येन सोमयाजी स उच्यते ॥ ३० ॥ चतुर्दश विप्रवरा योऽप्याप्तोनक्रियास्वमी । एतैः कृतानि कर्माणि सकलानि
भवंति वै ॥ ३१ ॥ न ज्ञातो विधवापात्र जातो विप्रस्तु गोलकः । नष्टे वोपपतेर्जातः कुंडस्थो भवेत्योऽपि विद्भिः ॥ ३२ ॥ न पैवजातः कन्यायां विप्रात्कानीनसंज्ञकः । भवंति जन्मना विप्रास्त्रयामी गोलकादयः ॥ ३३ ॥
येषां विप्रोक्तसंस्कारा न स्युराधानपूर्वकाः । कथंचिदप्ययोग्याः स्युर्विप्रेणांस्पर्शनादिषु ॥ ३४ ॥ पत्रे कगोत्रयोर्जातोऽप्लिष्टपुंसोर्यः प्रमादतः । स चंडाल इति ज्ञेयो योग्यश्चंडालजातिषु ॥ ३५ ॥ यस्यां कन्यां च ब्राह्म-
णं जातः स स्यादिन सुयः । स चंडालस्तथा विप्रात्सुष्ववस्यां समुद्भवः ॥ ३६ ॥ श्रुत्यानुष्ठानरहितो योऽसौ व्रात्य इतीरितः । संस्कारहारि ब्रात्यस्य स्त्ववकीर्णहतव्रतः ॥ ३७ ॥ दुःशीलश्चेत् त्विवनाना त्वो वीरहास्य
कपातकः । यः करोति हि मे ब्रजं भजये देवतार्चनं ॥ ३८ ॥ चंडिकाराधनं चैते त्रयः पतितसंज्ञकाः । ये तेनाचारदुष्टाः स्युरेवं केचिद्भवंति ॥ ३९ ॥ चंडिकाराधनं चैते त्रयः पतितसंज्ञकाः । ये तेनाचारदुष्टाः स्युरेवं के

श्रै०१० ५

चिह्नं वहति हि ॥३९॥ जन्मनाभावतो भ्रष्टाः पतिता इह ते स्मृताः । यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् ॥४०॥ स शाखारंडसंज्ञः पतितोपमितिः स्मृतः । कितलोकबली भर्तोग्रामानेचाचद्दुःकविः ।४१। सेव
कोनन्त्यदैवज्ञः षष्टमी पतिताकृपाः । मठाधिपः शाकुनीको दैवानुष्ठानविक्रयी ।४२। महापातकीनः पंचनवैते पतिताकृपाः । सत्राधिकारियो विप्रो नपस्यान्यस्य याचनया ।४३। पतितः सतु विज्ञेयः कन्याविक्र
यिकस्तथा देवांस्तीर्थं प्रयानीयकारपि न्याचकाहमिः ।४४। प्रतिमाविक्रयं योसौ कुरुते पतितः स्मृतः । जीवनार्थं परास्थीनि धृत्वा नीर्थं प्रयाति यः ।४५। गृहपितोर्विनाशोपि पतितश्चेतिकीर्तितः । अथ
वास्थि मतां मुखे मन्त्रयोस्तु ह्यातिपः ।४६। तैर्थसपतितो ज्ञेयो पस्य कस्यचित्तपा । चंडालारंभजातेर्वा प्रतिग्रहं गृह्णाति यो द्विजः ॥४७॥ अज्ञानान्निवृत्यपंगछेत्पतितः सोपि कीर्तितः । ज्ञात्वैवज्ञातियो विप्रो गमनं च
प्रतिग्रहं ॥४८॥ गच्छेद् गृहीत्वा मुंडे तस द्विजातिर्भवंत्यति ॥ तांबूलवाटिकां कृत्वा तयाजीवतियो द्विजः ॥४९॥ पतितः सतु विज्ञेय तलकु विक्रयिकस्तथा । वेश्यामाश्रित्य तद्द्व्यमुपजीवति यो द्विजः ।५०। निरंतर
मासमेकं तु नसपतितः स्मृतः । महिषीत्युच्यते भार्या सा चैवाभिचारिणी ।५१। तां वीक्ष्य तु क्षमास्ते यः स तु स्यान्महिषीपतिः । वेदेभ्यश्च सकर्मेभ्यः पतनान्माहाकः स्मृतः ।५२। दानकर्मानुपात्रेत्व मेतेषां नहि विद्यते
पतितेष्वेषु पदत्तं दातार्दुर्गतये स्मृताः ।५३। अकृतीनां नमस्कारे योग्यास्तु पतिता अपि । तेभ्यः श्रेष्ठा इतिज्ञेया वक्ष्यामि विधावपि ।५४। अज्ञो हि पतिता नेतान्ज्ञानात् सद्भुक्तलगादयः । नार्चयेद्यदमी श्रेष्ठा यदि तेषां
तु दुर्गतिः ।५५। पतितोपि वरो विप्रो नहि शूद्रो जितेंद्रियः । कुपीस्त्यज्यगां दुष्टां स्वशीलांगर्धवतो दुहेत ।५६। स्वस्यायोग्यक्रियायुक्तो पदि शूद्रस्तपश्चरेत् । कृतं ते तपस्तस्य नरकाये वकल्प्यते ।५७। शूद्रेकिमपि मंत्रं यो द्वि
जो गृह्णाति यद्यपि । सशूद्र इति वक्तव्यो नरवाश्चांडालसंज्ञकः ।५८। एवं ज्ञात्वा स्वधर्मेण ब्राह्मणो ब्राह्मणांयजेत् । ब्राह्मणानां विशेषेण ब्राह्मणो वै गतिर्मतिः ।५९। अनेकजन्मसंभवानां पोतस्मात्तानुवर्ति
नां नारणां सोरायायानां शिवे भक्तिः प्रजापते ।६०। बहुधा कृतस्य कर्मफलसंयोगात् कर्मसु सत्सु शेषो भवेद्भक्तिपुनरावृत्तिकारिणी ।६१। ततो विषयवैराग्यं वैराग्याज्ज्ञानसंभवः । ज्ञानेन हि परा भक्तिः प्रसा
दस्तदनंतरं ।६२। प्रसादान्मुच्यते जंतुर्मुक्तः शिवसमो भवेत् । वेदः साक्षाच्छिवो वेदो वेदाध्यायी सदाशिवः ।६३। तस्माद्वेदपरो नित्यं वेदाध्यायिनमर्चयेत् । यो नावैति शिवं तत्त्वं निराभासं निराकुलं ।६४॥ शास्त्र
श्रवणात्सर्वे तापि चतुर्वेदीपपुलकः । मनुष्येषु च ब्राह्मणो यथा विशिष्टो भवति । तथा देवतिविह महाब्राह्मणः परमेश्वर एव विशिष्टः ॥ इति श्रीमेवरत्नाकरे तृतीयोध्यायः ॥३॥ शिवधर्मशास्त्रे ॥ पूर्ण

वेधोरेनष्टे स्थावरजंगमे। विवादः समहानासीद्ब्रह्मविष्णोः परस्परं ॥१॥ अहं कर्त्ताहं कर्त्ता चास्यो योजगतः प्रभुः। एवमाहतुरेवं तु ब्रह्मा ब्रह्माणं च हरिस्तथा ॥२॥ तयोर्दर्पापहारार्थं प्रबोधार्थं परे तयोः।
मध्ये समुत्थितं लिंगमैश्वरं तैजसं परं ॥३॥ ज्वालामालावृतं दिव्यमप्रमेयमनौपमं। योजनायतविस्तीर्णं स्थितं तद्दिव्यमभवत् ॥४॥ ज्वालाभिर्मोहितौ तस्य लिंगस्य सुरसत्तमौ। तत्र विस्मयमापन्नौ
पश्यंतावप्रमेयधियौ ॥५॥ गतौ तु ऊर्ध्वमधस्तस्य संप्राप्य परस्परं। कृतांजलिपुटौ भूत्वा लिंगं तुष्टुवतुस्तदा ॥६॥ नमस्ते ज्ञानलिंगाय शिवलिंगाय लिंगिने। नमस्ते गूढलिंगाय नमः ॥८॥ एवं स्तुत्वा महादे
वं प्रणम्य शिरसा पुनः। ब्रह्मविष्णू समापन्नौ भक्त्या परमया युतौ। जिज्ञासया फललाभेन वेदितौ सिद्धिपत्सया। तस्मिंस्तत्प्रमनोपम्यं कृत्वासौ तिमहार्णवं ॥१०॥ लिंगमध्ये परं लिंगं स्थितं प्रादेशसंमितं ॥ स
माधिस्तौ तु संपन्नौ दृष्टवंतौ शिवात्मकं ॥११॥ नेवलत्कांचनं रौप्यं ताम्रं स्फाटिकमौक्तिकं। लक्ष्मात्र स्थितं शांतं केवलं तच्छिवात्मकं ॥१२॥ तयोस्तुष्टो महादेवः प्रदेशे वरमुत्तमं। स्पर्शं कुरुष्व हे ब्रह्मन्
त्वं पालय जनार्दन। कारणत्वमनुप्राप्य तत्रैवांतर्धीयत। प्रांजली प्रणतौ भूत्वा ब्रह्मविष्णू मतः परं ॥१३॥ पूर्वं लिंगं समभ्यर्च्य पश्चात्कार्यं गणाचकन्तुः। ब्रह्मा ब्रह्मासुरेर्देवैर्लिंगं पूजयते सदा ॥१४॥ गंधपुष्पा
दिभिर्नित्यं विष्णुः पूजयते शिवं। तदा प्रभृति ब्रह्माद्याः प्रतिष्ठाप्य सुरासुराः ॥१५॥ तल्लिंगान्तु कृत्वा लिंगमीडिता मनुजः सदा। परं गूढं शरीरस्थं लिंगस्तेऽमनादि तत् ॥१६॥ पदापमे ऐश्वरं तेजसं लिंगं पंचसंज्ञकं
कल्पांते तत्संदेवस्य लीयंते सर्वदेवताः। दक्षिणे लीयते ब्रह्मा वामभागे जनार्दनः ॥१७॥ हृदये चैव गायत्री सर्ववेदास्तमोत्तमा। लीयंते मूर्ध्नि वेवेदाः सर्वांगपरक्रमाः ॥१८॥ जठरे लीयते सर्वं जगत्स्था
वरजंगमं। उत्पद्यते पुनस्तस्माद्ब्रह्माद्यं सचराचरं ॥१९॥ आकाशं लिंगमित्याहुः पृथ्वी तस्याधिपीठिका। आलयः सर्वभूतानां लयनाल्लिंगमुच्यते ॥२०॥ तस्माल्लिंगं प्रतिष्ठाप्य सर्वं विश्वोद्भवोद्भवो। स्था
पितं तेन सर्वस्यामूर्तितं च तत्संशयः ॥२१॥ अथ वानुत्तमं तेन तत्त्वपरत्वे। लिंगपीठप्रकारेण क्रमे सामान्यलक्षणं। नादो लिंगमिति ज्ञेयो बिंदुः पीठमुदाहृतं ॥२२॥ नादबिंदुयुतं रूपं क्रमे साराख्यमुच्य
ते। चत्वारिकं तु रूपाणि केवलं नादमुच्यते ॥२३॥ लिंगं शंभुरिति ज्ञेयं पीठं शक्तिमुदाहृतं। योनिलिंगप्रकारेण जगत्सर्वप्रकारणं ॥२४॥ कलासंयोगभावत्वात्क्रमे रूपमुदाहृतं। बिंदुमध्यगतो नादो नादस्य
ध्येत मूर्तयः ॥२५॥ मूर्तिमध्यगतं तत्त्वं तत्त्वमध्यगतः शिवः। एतच्छिवमयं लिंगं सर्वं तत्त्वालयं स्थितं ॥२६॥ लिंगे तु जायते तत्त्वं जगत्स्थावरजंगमं। तस्माल्लिंगं विशेषेण क्रमे रूपमुदाहृतं ॥२७॥ क्रमो

रयाद्वसद्विस्याल्कर्मातेसंतत्निर्मवेत्। तानल्कर्मशतं पंनसाद्विस्थितिस्तया वहं ॥२८॥ पंचसाराख्यसंयोगं कर्मसाराख्यमुच्यते। कर्षणादिक्रियायानुसा कर्मेति निगद्यते ॥२९॥ तस्माद्वै स्थापनादीनि क
र्मवृंदानि कारयेत्। अथ वक्ष्यामि सारोऽशिवस्य पूजास्थानानि प्रवक्ष्यामि ततः शृणुत सपीठं शिवलिंगं यतः द्विविधमिति कीर्तितं ॥३०॥ पूजार्थं भुवि देवेशो योसौ स्थलमुदाहृतं। तत्रापि द्विविधं विंवं स्थिरं च
रमिति स्मृतं ॥३१॥ स्वयंभुव चलं तं विंबमिति शास्त्रविचक्षणैः। स्थिरे वेरवा लिंगार्चा कर्तव्याऽहरहः सदा ॥३२॥ स्वयंभु विज्ञेनापि यथालभ्येयथाविधि। लिंगस्वयं समुद्भूतमरण्यादि यथा स्वनि ॥३३॥
लिंगं यत्स्वयंभूः स्याद्ब्रह्मं भुक्तिमुक्तिदं। ऋषिभिः स्थापितं लिंगमार्षमत्युदाहृतं ॥३४॥ देवैः प्रतिष्ठितं लिंगं दैविकं समुदाहृतं। एवं स्थिरस्थावरूपालिंगं सर्वत्र तिष्ठति ॥३५॥ तद्वत्तेऽपि संपूज्यते बाणिवार्ष
सिद्धिदं। नवाष्टसप्तहस्तोच्चलिंगं स्यादुत्तमं त्रिधा ॥३६॥ षट्पंचचतुर्हस्तोच्चलिंगं तन्मध्यमं त्रिधा। त्रिद्वेकहस्तमानं यल्लिंगं स्यादधमं त्रिधा ॥३७॥ एवं नवविधं लिंगमुत्तमादि प्रभेदतः। चलविस्तु कर्मयद्ये
श्वनुरथास्वर्तस्लेः ॥३८॥ स च चलस्व सहितं लिंगं यत्तत्स्थिरं स्मृतं। स्थिरलिंगं स्थिरं यत्र सालयं वाप्यनालयं ॥३९॥ तत्रैव पूजकः पूजां कुर्वीत च तत्रतत्र। स्वयंभुं च चलं तं लिंगे चेति द्विविधं स्मृतं ॥४०॥
नर्मदाजनितं श्रेष्ठं शिवनाम्नाहृपं तथा। महानदिजं श्रीशैले तिर्थेष्वपि च संभवं ॥४१॥ स्वयंभुलिंगमित्युक्तं भुक्तिमुक्तिफलप्रदं। श्वेतं रक्तं सुवर्णाभं कृष्णं चेति चतुर्विधं ॥४२॥ लिंगं विप्रादि वर्णानां चतुर्णां
न्क्रमशः स्मृतं। पीठं तस्य तथा ज्ञेयं स्वस्वजाति शिलामयं ॥४३॥ तदलाभे तु लोमेन वर्ते नैवाश्मनापि वा। लिंगस्यादिहमाने न पीठमध्ये नगोमरवा। वृत्तं वा चतुरस्रं वा पीठं स्वस्य यथा रुचि। वृत्तं समगा
कारं सपममयं कुंभकं। चतुरस्रमिदं चलं न पीठे ये वै द्विधा स्मृतं ॥४५॥ एवं तचेत्स्वजात्युक्तं कृष्णलिंगमथापि वा ॥ सर्वेषामेव वर्णानां भुक्तिमुक्तिप्रदं स्मृतं ॥४६॥ लिंगस्य शिवनाभेतु तत्पीठं प्रकल्पितं। तथाधा
रः शिवे वास्य तनु पीठमिति स्मृतं ॥४७॥ स्थिरासनं मध्यनाभिहेमरेखाविराजितं। लिंगं तेत्र पिपंयत्र शिवनाभि स्तदुत्तमं ॥४८॥ उत्तमं मध्यमं नीचमिति लिंगं त्रिधोच्यते। त्रिकोणं फलकाकारं स्मृतं लिं
गं जर्जरं मतं ॥४९॥ कपिलं चापि यल्लिंगं तद्गृहस्थो न पूजयेत्। सुवर्णरौप्यताम्रैश्च रत्नैश्च नवभिस्तथा ॥५०॥ स्फाटिकाद्यं कृतं सम्यग्यत् लिंगं चरं स्मृतं। अथ शिवधर्मशास्त्रे। इंद्रनीलमयं लिंगं वि
ष्णुः पूजयते सदा। विष्णुत्वं प्राप्यते तेन साद्गुनेकं सनातनं ॥५१॥ चूला पूजयते नित्यं लिंगं शैलमयं शुभं। तस्य संपूजनात्तेन प्राप्तं चुलत्वमुत्तमं ॥५२॥ मुक्ताफलमयं लिंगं सोमः पूजयते सदा। तेन सोमास

नं प्राप्तः सोमत्वं चतनोज्ज्वलं ॥५३॥ शक्रोपि देवराजेंद्रो लिंगं मणिमयं शुभं । भक्त्या पूजयते नित्यं तेन शक्रत्वमाप्तवान् ॥५४॥ लिंगं रत्नमयं चापि वरुणोर्चयते सदा ॥ तेन तद्वरुणत्वं हि प्राप्तं वृध्यास
मन्वितं ॥५५॥ लिंगं हेममयं कांतं धनदोर्चयते सदा ॥ तेनासौ धनदो देवो धनरत्नमवाप्तवान् ॥५६॥ वसवः कांस्यकं पुस्यं सर्वान्कामानवापुः ॥ नागाः प्रवालजं लिंगं पूज्य राज्यानि लेभिरे ॥५७॥
सर्वे देवाः सगंधर्वाः सयक्षोरगराक्षसाः । पूजयंति सदा कालं मोक्षार्थं सुरनायकं ॥५८॥ सर्वलिंगमयं लोके सर्वं लिंगे प्रतिष्ठितं ॥५९॥ तस्मात्सं पूजयेल्लिंगं यदीच्छेत्सिद्धिमात्मनः ॥ तथा च बृहद्विष्णुवादि
पुरंदरपुरःसराः ॥ सर्वे देवाः सुराः स्वकीयां पदवीमयेष्य लिंगाकारं परमेश्वरमेव सदा यजंति ॥ तथैव श्रीनंद्यादि प्रथमगणाः श्रीरुद्रगणाः पुरातनभक्तगणाश्च मर्त्यजयार्थं मनश्वरपदप्राप्य
र्थं त्रियंबकं यजामहे इति वचनप्रामाण्यात् सोमं सूर्यं परमेश्वरमेव सदा कालं यजंति ॥ शुक वामदेव सनक सनंदन वसिष्ठागस्त्यादि मुनींद्राश्चापवर्गार्थे स्वयावृत्तलोकपराश्चैवोऽहं पद्मनाभास्य
इति वचनप्रामाण्यात् परमेश्वरमेव सदा यजंति ॥ गर्भरक्षार्थं सर्वज्ञ मृत्युंजय मरणादुःखोपशमनार्थे पुनः संसारनिवृत्त्यर्थं यदि योग्याः प्रमुच्यामि तं प्रपद्ये परमेश्वरमिति वचनप्रामाण्यात् योग्याः मुक्ति
निष्क्रम्य परमेश्वरं यजामहे इति गर्भगता एवं स्मरंतीति ॥ ॐ । वृत्ता विष्णुलया शक्रो लोकपालाश्च देवताः । लिंगार्चनरतास्ते स्तने मानवेषु च का कथा ॥ तस्मात्तद्वोपि वा काशं सुधार्थं रावदयेत्वि वं ॥
त्यक्त्वा लिंगार्चनं मूढो मुक्त्यार्थी विजितं यथा ॥५९॥ इति श्रीशैवरत्नाकरे चतुर्थोध्यायः ॥ ४ ॥ क्रियासारे । अथ पंचभूतानि एव यानि द्रव्याणि चार्चये । तानि तेषां प्रवक्ष्यामि लक्षणानि शृणु क्रमा
त् ॥१॥ गंधाक्षतपुष्पाणि पात्रयोस्तां वराणि च । यज्ञोपवीतं तांबूलधूपदीपकसाधनं ॥२॥ घंटा पंचमहाशब्दो नैवेद्याभरणानि च । एतानि पूजाद्रव्याणि प्रोक्तानि चतुराणि च ॥३॥ उत्तमं स्नानसेतोयं
नदीकांभसं मध्यमं ॥ कनिष्ठं कूपसलिलं स्नानादिषु यथाक्रमं ॥४॥ तत्र स्वादुपयः स्वेऽलं वर्णाभः फेनीयसं ॥ मध्यमं मिश्रसलिलमिति वारि त्रिधास्मृतं ॥५॥ सुरवादु वर्येत्लाभे तु मिश्रैरपि चकार
येत् ॥ सालंकसपंकसा स्थिसविरसुतं सर्जागतं ॥६॥ सोचितिष्ठंसास वंवाग्नि सशवांभः परित्यजेत् ॥ यानि कार्याणि कर्माणि वत्स पूतेन वारिणा ॥७॥ तानि सर्वाणि कुर्वीत देवतारधनेसदासिद्धार्थं कुस
मं दूर्वाकोष्ठलाम ज्ञकं शशि । अमूनि चाक्षद्रव्याणि पायसकं यथं ते पवित्र ॥८॥ कुशाग्रतिलसिद्धार्थयवं वीहियवां स्तिचा । द्रव्याणि पंमूनि वरप्राद्गुरर्घ्यस्य मुनिपुंगवाः ॥ ॥ पत्रं लक्चोरकर्पूरकोष्ठका

शमीरकानि च ॥ अमृत्याच मनोपसद्ध्यात्प्रवदं निबद्ध ॥१०॥ स्नापनेचरलिंगस्य पंचाढमितं वलं गंधप्रसवकैरलमंत्रतो पान्यमृत्ति च ॥११॥ तनानि ताम्रकुंभेषु पंचप्रस्थमितेषु वा वस्त्रपूतानि
तोयानि समापूर्याभिनिक्षिपेत् ॥१२॥ तत्र तु भद्राणि भिः सुशीलासुमनालया ॥ गावः शिवपुराणे च पश्चिलिंगप्राशाः शिवाज्ञया ॥१३॥ गोमयं रोचनं मूत्रं दधि क्षीरं घृतं गवां ॥ बंधगाणि पवित्राणि सर्वसि
द्धिकराणि च ॥१४॥ पयो दध्याज्य मधिक्षुरसैर्मूलेन पंचभिः ॥ ततो गोधुमचूर्णेन ध्रुव्वा कोष्णेन वारिणा ॥१५॥ स्नापयेद्धनसिद्धैर्वा मुद्गचूर्णैरलाभतः ॥ स्नापयेद्यगंधाद्भिः पुष्पाद्भिः स्नापयेद्यार्हि
स्नापयेद्धमाद्भिरलाद्भिः स्नापयेद्वा स्नापयेद्धमंत्राद्भिः क्रमेणैव समाचरेत् ॥१७॥ शिवधर्मशास्त्रे प्रनाम्यं गेन लिंगस्य देहे न्सर्वं न संशयः ॥ कल्पकोटि सहस्रेषु यत्पापं समुपार्जितं ॥१८॥ कु
प्रस्थमाघृतं स्नानं कृत्वा लिंगे सकृन्नरः ॥ कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥१९॥ दशापराधं तोयेन क्षीरेण शतं क्षमेत् ॥ सहस्रं क्षमते दध्ना घृतेनायुतं क्षमेत् ॥२०॥ लिंगाभिषेकं
यः कुर्याद्वस्त्रपूतेन वारिणा ॥ समुनिः स महासाधुः स योगी च शिवेनैव पूजेत् ॥२१॥ मंत्राक्षरान्तजोत्पन्नविमलेनांभसा शिवं ॥ स्नापयित्वा सकृद्भक्त्या शिवलोके महीयते ॥२२॥ पाटलोत्पलपद्मा
नि करवीरणि सर्वदा ॥ स्नानतोयेषु योज्यानि शिवलोके महीयते ॥२३॥ कर्पूरागरुतोयेन यो लिंगं स्नापयेत्सकृत् ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥२४॥ सितेन भस्मना स्नाप्य भक्त्या लिं
गं प्रमोदते ॥ वर्णाम्बुनिर्मलश्रीमान् शिवलोके महीयते ॥२५॥ पट्टदुकूलगचीनादि विचित्राणि तराणि वा ॥ सितानि सूक्ष्मवासांसि रक्तानि पीतिकस्य तु ॥२६॥ कृतशास्त्रोक्तविधिना प्रशस्तानि
पितामह ॥ श्यामागतानि नूतनानि दक्षिणापाणि रञ्जनि च ॥२७॥ अंशुकानि विशुद्धानि प्रशस्तानि शुभ्रनाभ्यपि ॥ जीर्णानि दग्धं छिन्नं स्थूलमाखुदष्टं संप्रकं ॥२८॥ देवस्येदं क्रियापुंके वस्त्रेष्वेव वि
र्धं स्वजेत् ॥ वासांसि सुविचित्राणि सारवं निम्रदूनि च ॥२९॥ धूपितानि शिवे दद्यात् कृशानि नवानि च ॥ यावन्तस्तन्तवस्तेषां प्रतिसंख्या समन्वितः ॥३०॥ तावद्वर्षसहस्राणि शिवलोके महीयते कृत
शास्त्रोक्तविधिना सो वर्णदेवमानतः ॥३१॥ सकाल धौतं वै कस्यमुपवीतमिति स्मृतं ॥ अयवा ॥ सद्गुणकूलसपीतं च पट्टसूत्रादिनिर्मितं ॥ दत्वोपवीतं लभ्यापभवद्दुर्गतिकः सुखी ॥३२॥ चंदनाग
रुकर्पूरकुंकुमादयनुलेपनं ॥ संमान्य मूर्तिद्रव्याणि नयोग्यानीतराणपि ॥३३॥ गंधानुलेपनाम्यग्रत्वेद्धि गुणं चंदनस्य च ॥ चंदनाद्गरोर्ज्ञेयं पुण्यमष्टगुणाधिकं ॥३४॥ कृष्णागरोर्विशेषेण द्विगुणं फल

मिष्यते न स्नानं च गन्धं पुरयं कुंकुमस्य विधीयते ।३५। चंदनागरुकर्पूरैः मृगनाभिविशेषैः सकुंकुमैः । लिंगपर्याप्तमानेन शिवलोके महीयते ।३६। सौवर्णनारिकेरो वा पीठे पर्यधरे त्ववि । शोभार्थं
पटिः तद्रूपे राम सेरितं तो पिवा ।३७। स्वर्णेन वा प्रतीप्येण स्नानसौगन्धके न वा । कलावुद्बुदवत्स्त्रस्य च पकार हारसंमितान्वा ।३८। तारं च भ्रं द्विजयं कुर्यात्स्येस्येकं सकलान्यपि । रत्नेन प्रोन्नमालां वा हारस्यो
परि वंधयेन्नृ ।३९। येषां नरत्नमाला वा कररापाधनेश्वरैः । अभिन्नाः शंखवच्छेत्ताः सुस्निग्धा वृत्तिमुक्ताः ।४०। देव्युवाच । रत्नाः सुरार्चने योग्या नेत्र एतन्नरान्नरा । पुष्पैः कतिविधैः पूजा क
र्तव्या कथयस्व मे ।४१। पुष्पैरारामसंभूतैः पत्रैर्वा गिरिसंभवैः । अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ।४२। आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवं । अर्कारग्वरनीरेजनं घवर्नं कजानपः
।४३। करवीरवकद्रोणा वृहती नवमालिका मल्लिकोत्पलपुंनागकदंवाशोकचंपकाः ।४४। सेवन्ती कर्णिकारश्च त्रिसंध्याकेसरः । सितकांचनदुत्तरं तथा लोहितकांचनः ।४५। पलाशः पाठ
लीतिषां प्रशस्ताः प्रसवाः स्मृताः । विल्वापमार्गकभ्रूतो दमनो मरवोर्जकः ।४६। दूर्वा तुलसीकांकोलो गौरी सुरभिका शमी । मुंडिकांतारदमनो भृंगारः पारिभद्रकः ।४७। जंवकुशाग्रदलं चैते प्रशस्ताः
पत्रसंग्रहे । पूर्वोक्तकुसुमालाभे पत्रैरेतैः शिवं यजेत् ।४८। पत्राणामप्यलाभे तु पुष्पजातिदलैर्यजेत् । विना दुरुनीरेजपलाशोत्पलकांचनात् ।४९। सनालैः सदलैः पक्वैः प्रत्यग्रैर्नयनप्रियैः । पुष्पै
र्यो चिनेरेवंविधैराराधयेच्छिवं ।।५०।। यान्यश्चद्वानि पुष्पाणि पत्राणि पितथैव च । तानि देयानि मंत्रेण वक्ष्यशोभार्थमर्पयेत् ।५१। परं दुर्देवांगचीनानां रत्नं चन्दनाभतः । कार्पासं पुष्पसंदर्भे स्या
नो चोद्वल्कलं तु वा ।।५२। पुष्पजातिविशेषेण भवेत्पुण्यं ततोऽधिकं । अर्कस्य पुष्पमेकं तु शिवाय विनिवेदयेत् ।५३। तपःशीलगुणोपेताय वेदस्य पारगे । दश दत्वा सुवर्णानि यत्फलं तदवाप्नुयात् ।५४।
अर्कपुष्पसहस्रेभ्यो करवीरं विशिष्यते । करवीरसहस्रेभ्यो विल्वपत्रं विशिष्यते ।५५। विल्वपत्रसहस्रेभ्यो पद्ममेकं विशिष्यते । अपंपद्मसहस्रेभ्यो वकपुष्पं विशिष्यते ।५६। वकपुष्पसहस्रेभ्यस्त्वेकं
कुरंटकं परं । दुत्तुरकसहस्रेभ्यो वृहत्पुष्पं विशिष्यते ।५७। वृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते । द्रोणपुष्पसहस्रेभ्यो पयामार्गं विशिष्यते ।५८। द्रोणपुष्पसहस्रेभ्योऽप्यपामार्गं विशिष्यते ।।
अपामार्गसहस्रेभ्यो कुशपुष्पं विशिष्यते । कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ।५९। शमीपुष्पसहस्रेभ्यः श्रीमल्लोलोत्पलं परं । नीलोत्पलसहस्रेभ्यो भंडिरेकं विशिष्यते ।।६०।। नीलोत्प

लसहस्रेण यो मालां संग्रथ्य निशि शाय विधिवद्दत्यात्तस्य पुण्यफलं शृणु। ६१। कल्पकोटिसहस्राणि कल्पकोटिशतानि च। विशेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः। ६२। करवीरसमा ज्ञेया जातिविजयपाटला। नागचंपकपुन्नागकुरकुसुमास्तथा। ६३। श्वेतमंदारकुसुमं सितपद्मसमं भवेत्। कनकानि कदंबानि रात्रौ देयानि शंकरे। ६४। दिवाशेषाणि पुष्पाणि दिवारात्रौ तु मल्लिका। पूहरं नित्यमेज्ञातो करवीरमहर्निशं। ६५। बिल्वपत्रैरखंडैश्च सलिंगं यः प्रपूजयेत्। सर्वपापविनिर्मुक्तः शिवलोके महीयते। ६६। पुष्पाणामप्यलाभे तु पत्राण्यपि निवेदयेत्। पत्राणामप्यलाभे तु फलान्यपि निवेदयेत्। ६७। फलानामप्यलाभे तु तृणगुल्मौषधैरपि। औषधीनामलाभे तु भक्त्या भवति पूजितः। ६८। केतकीजातिमुचकुंदपुधिकरंवकाः शिरीषसर्जबंधूककुसुमानि विवर्जयेत्। अंकोलपत्रकुसुमं करंजं कलहद्भवं॥ ६९। बिभीतकानि पत्राणि कुसुमानि विवर्जयेत्। गंधहीनमपि ग्राह्यं पवित्रं पलुशादिवत्। ७०। गंधवत्स्यपवित्राणि यानि तानि विवर्जयेत्। सद्गंधकंटकैः पत्रैर्जलजैरपि नार्चयेत्। ७१॥ अन्योक्तपत्रपुष्पाणि छिन्नानि न शिवं पजेत्॥ क्रीटकैरपि विद्धानि जीर्णपर्युषितानि च। ७२। स्वयं पतितपुष्पाणि संजेद्दुपहतानि च। मुकुलैर्नार्चयेद्देवमपक्वैर्न निवेदयेत्। ७३। फलं कुत्सितविद्धं च पतनस्थमपि त्यजेत्। अज्ञातज्ञाततो वापि विहृत्कुसुमार्चनं। ७४। आत्मार्थं वा परार्थं वा तत्सर्वं नाशमाप्नुयात्। मल्लिकोत्पलपद्मैश्च जातिपुंनागचंपकैः॥ ७५। अशोकश्वेतमंदारकर्णिकारबकैरपि। करवीरार्कमंदारशमीनागरकेसरैः। ७६। कुशापमार्गकुसुमैः करंवद्रोणकैरपि। पुष्पैरन्यैर्यथालाभं यो नरः पूजयेच्छिवं। ७७। स यत्फलमवाप्नोति तद्देकान्नमवाप्नुयात् सर्वकोटिप्रतीकाशैर्विमानैः सर्वकामिकैः। ७८। पुष्पमालापरीक्षिप्तैर्गीतवादित्रनादित्रनादितैः नृत्तमधुरवाद्यैश्च स्वच्छंदगमनालयैः। ७९। रुद्रकन्यासमाकीर्णैर्दिव्यतनवदुर्लभैः। सेधूयमानैरमरैस्तूयमानः सुरासुरैः॥ ८०। गच्छेच्छिवपुरं दिव्यं पत्रवाहश्चिरं भवेत्। लिंगे। गवां कोटिप्रदाने न विधिवत्ते न यत्फलं। लिंगे न्यस्यैकस्य पुष्पस्य सहस्रांशेन पूर्यते। ८१। यो दद्यात्कांचनं मेरुं सस्यपर्णं वसुंधरां। लिंगे न्यस्यैकपुष्पस्य सहस्रांशेन पूर्यते। ८२। मातापितृसनिविप्रभ्रातृगोसंचितोवधः। सर्वपातकसंहारमेकपुष्पं शिवार्चनं॥ ८३॥ जलं वा पुष्पमेकं वा लिंगस्योपरि निक्षिपेत्। अमंत्रो वा समंत्रो वा कुलकोटिं समुद्धरेत्। ८४। किंचिद्दलं वा चुलकोदकं वा देवेरलक्ष्मीं ददासि। आदाननाने जगदेकबंधो मुग्धो भवान्सर्वविदेवदेवा॥ ८५॥ नरि

मात्रं तु योऽर्घादेवल्लिंगस्य मूर्धनि ॥ ८६ ॥ स्यादर्घासनं तावद्यावद्विंशाङ्गुलं दश ॥ ८६ ॥ यः कुर्यात्त्रिशिवाग्रमम्भाः शुचित्वादिशोभितं । पावनं सर्वदेवार्घं कुसुमबीजपूर्णं फलानि च ॥ ८७ ॥ तावद्दर्भसह
स्वाग्राग्रिवल्लोके महीपते । ॐ । देवार्घमेकं पात्रं तु पुष्पादिद्रव्यसंचयं ॥ ८८ ॥ सौवर्णं राजतं ताम्रमिति पात्रं त्रिधा स्मृतं । सार्धप्रस्थमितं पात्रे मर्घाद्यखिलकर्मसु । अर्घादीनां त्रिपात्राणां सामान्यप्रा
ल नात्रयन् ॥ ८९ ॥ शाखस्वर्णादिपात्राणां स्पृष्टिदोषा न विद्यते । तत्रसात्र्ययोगेषु स्पृष्टदोषोऽस्य जातिभिः ॥ ९० ॥ देवालत्रये क्रोडिर्वर्जनात् शौचादिर्गर्हनात् । अस्पृस्या ह्यात्मनात् । स्पृष्टो मीमिर्यदि
संस्पृजेत् ॥ ९१ ॥ कांस्यपात्रमपि ह्येमम लाभे मृण्मयं तु वा । अर्घादीनां न योग्यानि भिन्नपात्राणि जातु चित् ॥ ९२ ॥ अभिन्नानि विशुद्धानि पात्राण्येवं भवेत्रिधा । ताम्रस्फाटिकशंखैः सुवर्णैकलधौतन
योः ॥ ९३ ॥ न विद्यते भिन्नदोषो ह्येष्वन्येषु विद्यते । शंखः शुद्धो भवेन्नचनवेभ्यो घर्षणेन वा । आम्लेन ताम्रकं भस्मना कांस्यं चूर्णेन पित्तलं ॥ ९४ ॥ पलाल भस्मना व्रीहीणां पात्रे पित्तललोहके संघर्षयेद्वि
मृत्स्नार्थे कांतिप्रसरणाय वा ॥ ९५ ॥ वस्त्रार्थेनानि पात्राणि वारिणा क्षालयेत्ततः । ऐरूप्यशैलाः शुद्धास्युः केवलं क्षालनाज्जलैः ॥ ९६ ॥ पात्रं गोकर्णवत्कुर्यात्तद्वत्तिलमात्रकं । येषामलाभे पात्राणां नारि
केलकपालकं ॥ ९७ ॥ सुवर्णरजतताम्रकांस्यलोहं च पित्तलं । चार्चनार्थं कुर्वीत यथाक्रमेणेत्यनुमुखं ॥ ९८ ॥ खदिरो मधुको ह्यस्थः प्लक्षः सुरमहीरुहः । उदुंबरः पीतसारो न्यग्रोधोऽपि विकंकतः ॥ ९९ ॥ जंबू
कदंबबकुलबिल्वपुंनागचंपकाः ॥ पलाशः पाटली चूतः कर्णिकारश्च कांचनः ॥ १०० ॥ एते सप्रशस्तास्युः पीठकर्माणि वा विधे ॥ सर्वेषामेव वृक्षाणां प्रशस्तो रक्तचंदनः ॥ १ ॥ तेन पीठं कृतं श्रेष्ठं चर
लिंगसमर्चने । चतुरस्रं च चतुष्पादं पूर्ववत्प्रोक्तविस्तरं ॥ २ ॥ उपर्यधः समाकारं पत्रपद्मासनं स्मृतं । पूर्वोक्तविस्तरायामं वृत्तं समष्टास्त्रकृतिः ॥ ३ ॥ परितः पत्रवल्लक्ष्यं पत्रस्वस्त्यासनं स्मृतं । पिष्टे स्वपीठं पञ्चके
कारपित्वे सरा प्रियं । चरलिंगस्य पूजार्थं तद्दृष्टो यामि नामह । ॐ । धूपः । कालागरुगंधसारो गुग्गुलुश्च सितागरुः । लोसावित्वं फलं सर्पिर्मधु सर्पिर्मधुसर्जरसः शशी । साधनानि दशैतानि धूपस्य च
तुरानन ॥ ४ ॥ चंदनो मधुको ह्येचनखसर्जः कचोरकः ॥ रान्तद्रुसमानेन धूपं भवति चोत्तमं ॥ ५ ॥ शार्केणनखगंधं च जटामांसि लघुः समं । सौह्रेणसहसंमिश्रं धूपं भवति चोत्तमं ॥ ६ ॥ व ॥ अगरुत्तत्पकुष्ठं
शैलजं शर्करास्याङ्भय घनपुरस्ताच्चंदनैलाश्च सामान्यात् । त्वचनखरमुसिरं मांसि कर्पूरनालि ॥ सल्लर्जलकचोरं जातिपुष्पधूपराजः ॥ ७ ॥ कृष्णागरुं सकर्पूरं धूपं ध्यात्म हेम्वे । नेरंतर्ये राप्यो मासं तस्यपु

शै॰र॰
९

रापफलं स्मृतं ॥९॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च । भुक्त्वा शिवपुरे भोगान् तत्स्थाने समहीपतिः ॥ ६ ॥ गुग्गुलं घृतसंयुक्तं साक्षाद् दहति शंकरः । मासार्धमात्रदानेन शिवलोके महीपते ॥१०॥
फलमाप स चतुर्दश्यां यः साक्षाद्गुग्गुलं दहेत् । अपराधसहस्रैश्च मितापुत्रकृतं क्षमेत् ॥११॥ प्रियपत्रं गुग्गुलुर्नित्यमाज्ययुक्तो विशेषतः । दशसहस्रेषु फलानां तु महिषाख्यगुग्गुलः ॥१२॥ धम्मागवाज्यमिश्रं
तु शिवसाम्यः प्रजापते । देवदारुमं कं चसर्जं श्रीवासकं दहेत् ॥१३॥ श्रीफलं चाज्यसंमिश्रं दद्यात् ज्योतिपरं प्रियं । ये धूपः सौगंधिकं धूपं दद्यात् दहेत् गुग्गुलोत्तरं ॥१४॥ अगरुं दशसाहस्रं दिग्गणं चासितागरुं ॥ हेमरौ
प्येन ताम्रे रात्र्या लोहे न वापि च ॥१५॥ धूपप्रदीपपात्रे द्वे कारयेत्सहलक्षणे । धूपपात्रोत्तमं सर्वं ससार्धांगुलकं स्मृतं ॥१६॥ पात्रेऽमलगाकारं सपिधानं सनालकं । पात्रपात्रे मलं च समानं चतुरंगुलं ॥ द्वि
गुणं तु नयोरुंगं तन्मध्ये ग्रीवमंगुलं ॥ एवं मलगाकारं ग्रीवनालं प्रकल्पयेत् ॥१८॥ नालायतं नालमात्रं मागशेखरमूषितं । तद्वा कुट्टलं वापि पद्मशोभं तु कारयेत् ॥१९॥ आस्योत्तमं पिधानस्य पात्रवत्सम
रिकल्पयेत् । पादांगुलं तदूर्ध्वे तु शेषं च शिखरं घनं ॥२०॥ पात्रपार्श्वे पिधानं च सर्वे च षटकवत् स्मृतं । घनं तस्य समं तस्य पवमात्रं प्रकीर्तितं ॥२१॥ पिधाने धूपनिर्गमैर्यंरंध्राणि विदधीत वह्नि । लक्षणं धूपपात्रस्य
समाख्यातं चतुर्मुखं ॥२२॥ सार्धांगुलं आस्यपात्रस्य खंगलोन्नतं । तस्याः पृष्ठे विलग्नैसं धं तदर्धेकांगुलांगुलं । पिधानं पिशिखरं नालं घनं रंध्राणि पूर्ववत् ॥ एवं च कारयेद्बुधो धूपपात्रं तदुत्तमं ॥२४॥ पात्रे स्यैवं वि
धस्यास्य त्वलाभे मृण्मयं तु वा । कर्पूरे घृतवर्तिश्च द्विनपं दीपसाधनं ॥२५॥ २५॥ ॐ ॥ दीपः ३ तमे कपिलासर्पिमध्यमं मुश्रगो घृतं । अश्वासोसर्पिरधमं मिश्रितं त्रिविधमीरितं ॥२६॥ घृतदीपप्रदानेन शि
वाप शतयोजनं । भूम्यंतं लभते मर्त्यो विमानं सूर्यसप्रभं ॥२७॥ यः कुर्यात्कार्तिके मासे शोभनं दीपमालिकां ॥ फलमाप्नोति चतुर्दश्यां ममावस्यादिनेपि वा ॥२८॥ सूर्यो पुत्रप्रकोटीनां कोश तेजसा भासयन् दिशः तेजोरा
शिविमानस्थः कुलमस्थ तत्र सर्वशः ॥२९॥ यावन्तः दीपप्रस्थानं धने नापुर्य वो दिनं । ताव युगसहस्राणि रुद्रलोके महीपते ॥३०॥ दीपवृक्षं समुत्थाप्य शार्वस्यायतने शुभं । पूर्वस्माद्द्विगुणं पुण्यं लभ्यते नात्र सं
शयः ॥३१॥ कार्पासवर्तिं कृत्वा च गवाज्येन प्रदीपयेत् । उत्तमं दीपपात्रस्य समस्तं सत्यांगुलं ॥३२॥ सार्धांगुलोन्नतं पीठं नालं सार्धांगुलं द्वयं । शिखरं त्र्यंगुलं चैव क्रमाद्दूत्र षडंगुलं ॥३३॥ तस्मात्रपीठवि
स्तारमुदितं चतुरंगुलं । पात्रं चांगुलं आसं तद्दूनं यवमात्रकं ॥३४॥ पात्रांतः परितो दीपस्थानान्यष्टौ प्रकल्पयेत् । दीपसंचपात्रे स्यादेम महीरितं ॥३५॥ चतुरंगुलमुत्सेधं नालं सार्धांगुलं स्मृतं ॥ देसा

धैंगले पात्रे पारुद्या समंगलं ॥३६॥ स्वर्णादिबुधपाल श्रेपात्रमेवामलाभतः। श्रीगृहपरुच्छिन्नारदीपानप्यवासंप्रदर्शयेत्॥३७। एवं यथावलम्पितं दीपपात्रस्य लक्षणं॥ ॐ। घंटालक्षणं। दण्डा
स्वत्रिशला चतुरंगुल कुसुमोपमा। पासासोराष्ट्रकमयो घंटानः कोरा संमृतं॥३८॥ आयतं घंटिकापालमोक्तमंगलपंचकं॥ तद्वन्मुष्ठिप्रमाणं स्यात्कंठः कद्वयसंवृतं॥३९॥ तदूर्ध्वं त्र्यंगुलमितं विस्तीर्णं त्रि
शलकं॥ तस्यायतनविस्तारं षडंगुलमितिस्मृतं॥४०॥ घंटायाः सकलं दैर्घ्यमंगुलानां त्रयोदश। एवं नेत्रप्रियां घंटां मासमानेन कारयेत्॥४१॥ अथ कहला॥ कहलः॥ बदरः शंखो भेरी च जयघंटिका॥४२॥
एते पंचमहाशब्दा मंगलध्वनयः स्मृताः। सुवर्णैरेप्यत्ताम्रैर्बुधपालखेनसंपुताः॥४३॥ लोकमानं स्मृतं पुष्पवल्लकहलाहयः। स खंगुलं चतुस्तालमायतं काहलस्य तु। चतुरंगुलविस्तारं स्यात्स्यान
वर्तुलं॥४४। प्रसंगुलं तद्वानाहमनुस्थूलं तदाहितः। तथैव विस्तारं तस्य यथाशोभं तु कारयेत्॥४५॥ पंचांगुलं हिकारं तु दीर्घं विस्ताहियस्य तत्। सार्धत्र्यंगुलविस्तारं तस्यस्यात्स्य वर्तुलं॥४६॥ अन्यत्सर्वं यथा
पूर्वं वितलं कहलालकं। एवं लक्षणमाख्यातं समस्तं कहलचिह्नके॥४७॥ ॐ। पटहः॥ आसनं बदरः श्रेष्ठा बावपिवारकवंदनं। त्रयोमीपटहस्योक्तास्तरवोबाघवेदिभिः॥४८॥ पंचतालसमाख्यातमायतं पट
हस्य तु। द्वितालं मध्यमस्थूलं तालमात्रमुखं द्वयं॥४९। सर्वमेरगास्समाख्यातमुखयुग्मं यथा॥ कठोरत्वचा हन्याद्यत्ततत्काले तु नादयेत्॥५०। शंखः॥ गोक्षीरधवलस्निग्धो दीर्घनालो वृहत्तनुः। एतौ यो दक्षि
णावर्तः सोऽब्धिजः शंखसंज्ञकः॥५१। पूर्वोक्तलक्षणोपेतो वामावर्तो यथोऽब्धिजः। शंखोऽयं सोऽपि सुलभा पूर्वोक्तो जीव दुर्लभः॥५२। शंखरंध्रस्थूलता नाह्यावतावत्त्रायतस्मृतं॥ तस्यार्धं नालकं च
स्य सर्वशंखः श्रेष्ठउत्पन्ने तद्यथैमावजोपस्याः शंखोभवति मध्यमः। शंखोयमितरो लध्वः सकृन्निष्ठः प्रकीर्तितः॥५४। भित्तः क्रिमिहतो रक्तः सरंध्रः कमलं स्थविः। स्वनालः सशंखो ये तयोर्भ्यो नादकर्म
णा॥५५॥ ॐ। अथ दुंदुभिः॥ दुंदुभिर्द्विविधा प्रोक्ता स्थावरो जंगमेति च। नाहायों स्थावरे केनयाहायो जंगमास्मृता खदिरः पीतसारश्च शिरीषो रक्तचंदनः॥५६॥ मधुको ... भिर्दुंदुभेः स्मृताः। आया
मं स हस्तालस्यात् संचतालं तु विस्तरं॥ मुखं त्रितालविस्तारं मुखस्य घनमंगुलं। शेषं तत्र्यंगुलं घनमन्यत्सर्वं विस्तृतं वहिः॥५८। सवृतं लोहपट्टेन मुखमध्यानि वेष्टयेत्। मुखस्य परितः सम्यक् कीलाः नयोम
यान्॥५९। मुखं सचर्मणा गाढं घनत्वलूतेनावेष्टयेत्। यथाकथं समाख्यातं लक्षणं स्थिरदुंदुभेः॥६०॥ ईदृग्दुंदुभिनिर्घोषः शंभोः प्रीतिकरः सदा। षट्तालमयतां तालं नालादंशाश्चि येशलेः॥ चतुस्तालं तु वि

श्री·र·
१०

स्तारं मुखसार्धं छिन्नालकं विलंघनं च पापूर्वं रत्नं वा चतुराननना: ६१॥ रत्नदेवं विधप्रोक्तं लक्षणं स्फटिकं रुदुभेः॥ आसने निर्मितं स्थाप्य गोपुरे सारदा हमेः ६२॥ विमानस्याथवास्थाने ऽप्सरो वासरोत्तम
चतुःपार्श्वं चतुः श्रृंगमध्ये प्रोक्तमासनं ६३॥ भूमाश्च नस्य स्थाने श्रृंगमध्ये तु रुदुभेः॥ चतुस्तालप्रमाणेषु चतुरस्रं नाल पंचकं ६४॥ वरं तद्विस्तारसमानं द्वादशांगुलं॥ सुवर्णं तलं समंता चतुष्पमर्धांगुलं
समंतां ६५॥ एवं यथावत्कथितं लक्षणं वरं रुदुभेः॥ स्थूलो नताभ्यां स्वदशामहार्हस्य विनिर्मिता ६६॥ एवं धीमयपार्श्वे सोमे रौप्याद्वैतु रुध्वनिः॥ चाष्टसौ रन्ध्रकं द्वतां चतुर्मंडलं चतुर्दशांगु द्विनाल विस्तारया
माजपघंटास्मतां कृत्या ६७॥ द्वौ शंखौ काहलौ चत्वारि तोजपघंटिकाः॥ येकेकः पटहो भेरीसंख्यैषामेवमीरिताः ६८॥ केचिदेतास्म हाशंखा न्यवतेपंचलक्षणः॥ नीततो याकोस्मतालशंखकाहलनिस्वना
नाः ६९॥ अतोक्तसंख्यापि कृत्वा वा पात्रामुत्तमोत्तमा स्यात्तलमेयपालध्याशं खानां विभवप्रमा॥ ७०॥ स्यात्सार्धं नेष्ट स्थाने सामान्ये स्थावरे पि च॥ स्वाने धूपे प्रदीपे च॥ नैवेद्ये च धोषः प्रबोधयोः ७१॥
घंटापंचमहाशंखाद्य प्रयुंजीतोत्सवेषु च॥ स्नानकाले त्रिसंध्या च पंकुर्याद्भेरीवादनं ७२॥ नार्यं वाभुरव वाद्यं वा नस्यपुरायफलं स्मृतं॥ यावन्त कानि कुर्तेये नरमार्गवादनं ७३॥ तावद्युग सहस्रा
णि तत्र लोके महीयते॥ नैवेद्यं ॐ॥ निवारतंडुलाश्रेष्ठास्तवैवा व्रीहितंडुलाः॥ होमोक्तधान्यजातीयातंडुला मध्यमास्मृताः ७४॥ त्यानानाभिन्नान्कराणात्कोनदंगंधान्करिनाशकान् प्राचोनव्रीहि
कोश्चेना न तंडुलान्सप्त वर्जयेत् ७५॥ अभिन्नाधवला स्निग्धाविस्फुटास्तनताः शुभाः॥ तंडुलास्सु रमोश्रेष्ठा निवेद्य परिकल्पने ७६॥ व्रीहीणां द्विशतं पंचविंशत्याशालिरिष्यते॥ तलेषुकुंचः प्रसृतिकुडु
व प्रस्थतोंतलिः॥ ७७॥ प्रस्थः पात्रस्त्वाढकश्च शिवो द्रोणाश्चरवारि संयुताः॥ शिवप्रमाणस्त्वधमानिवेद्यपरिकल्पने॥ निवेद्यकरणे चोक्ताः श्रेष्ठाश्चाढकतंडुलाः॥ ७८॥ केचनिष्पीड्य निष्पन्न्यचोदशान्
स्थालयेद्बुधः॥ सार्धाढकप्रमाणो येतं डुलानां प्रकीर्तितं॥ ८०॥ विस्फुलिंगकृताकाष्ठाः लकेशाः प्राशिसप्रताः॥ एताल्विनेनतैः काष्ठैः पचनेदीपयेद्बुधिः॥ ८१॥ केवलान्नमितिप्रोक्तमिदमन्नं सपाचितं
परमान्नं हारिद्रान्नं दध्यन्नं कृशरोदनं॥ गुडोदनं च मुद्गान्नमिश्रान्नं षाड्गुर्ध्वंस्मृतं॥ तंडुलत्रिगुणांभागं दुग्धार्धं जीवनयक्तं॥ ८२॥ तदर्धं मुद्गमिन्नं तु परमान्नमिति स्मृतं॥ तंडुलार्धं मुद्गमिन्नं वारिणा सह संपचे
त्॥ ८४॥ द्विवह्निर्दपापुक्तं मरीचीजाति संयुतं॥ ताद्वक्तं हारिद्रान्नं पक्वं पाचितं तत्पाचयेत् मधुरान्स्लेनगोध्वधा प्रोक्तमन्नं विमिश्रितं॥ तवराद्वैक्तं संमिश्रमेतद्धोरन्नं स्मृतं॥ ८६॥ तंडुलार्धं मुद्गमिन्नं वारिणा

सहसंपचेत्। पक्के मरीचचूर्णं तिलचूर्णं विनिक्षिपेत्॥८७॥ इंडरसनामान्नमिमाख्यातं सुरेश्वरः। पूर्वोक्तपायसे पुंस्याद्गुडखंडकं॥८८॥ नरर्धमाज्यमेलवायाफलमेतद्गुडोदनं। तंडुलस्य त्रिभागं च मु
द्गखंडं च मिश्रितं। ८९। पक्कं पदे न्नमुद्गान्नमाख्यातं चतुर्मुख। विनासुधान्नमेषां प्रदानान्नं च गुणं वुधः। ९०॥ क्लिन्नाहारान्नमाहारान्नं दुग्धाहारभिः सदा पुण्यमाहारभोजं च प्रपलेन विवर्जयेत्। ९१॥ विमुद्गभांड
संस्विन्नमपलं मुद्गमज्वलं। असनं यत् दुग्धं निवेदयेत्परिकल्पयेत्। ९२। चत्वारिंशत्स्ववधा स्यान्निग्रहो यान्नसुपक्कमेणि। महाकल्पवत्वाख्या माषाचान्नानि वर्जयेत्। ९३। नत्रापि नित्यं च श्रेष्ठाः
सत्वचो मध्यमास्सनतः। प्राक्तनान्क्रिमिसंयुक्तान्म्लानान्हीनान्परित्यजेत्॥९४॥ पनसः कदली चूतो निकुचो नारिकेलकः। नारंगो मातुलुंग आम्रफलान्येषा वराणि च। ९५। खर्जूरः स्वम्बरः सूक्ष्मकंद
कपित्थालः कंनिवेदकं॥ चत्वारो मी प्रशस्ताश्च कंदास्सुः पक्ककर्मणि। ९६। कूश्मांडकारवल्ली च पटोली च बृहती बला। अलाबुः सूक्ष्मबृहती चर्मकोशातकी ह्ययं॥९७। उर्वारुः कष्यनेतेषां फलानि प्रव
राणि च। स्वादूस्यष्यविदूरहानि फलानि स्मानि निस्पृशः। ९८। मरीचिजीरकासर्पिर्लवणान्नकसर्वदेः॥ उपदंशान्सर्वथा योग्यं पचेदपि च हिंगुला। ९९। पत्रोपत्रोपदंशाये सर्वे नान्नं विधिवत्सर्जयेत्॥
अन्नप्रोक्तान्नपानानां व्यंजनानां समाव्रजः। शिरसि दुग्धमन्नभोज्यं पनकं हित्वा निवेदयेत्। १००। उत्तमं कपिला सर्पिर्मध्यमं शुद्धगोघृतं। अन्या गो सर्पिरधममिति त्रिविधमीरितं। १। सद्यः पक्कसुगंधाढ्यं
विशुद्धं नयनप्रियं। शुद्धभांडार्पितास्पृष्टं शुद्धसर्पिः शुभं स्मृतं। २। सकेशं कल्कपुत्तकं सदुर्गंधं पुराणं तं। अस्पृश्यैः प्राणिभिस्स्पृष्टं दुर्मांसस्थं घृतं त्यजेत्। ३। एवं ज्ञात्वा दधिक्षीरे गृहीते स्यान्न कर्मणि॥
निवेद्य च प्रयोक्तव्ये शस्ते चाभिसंभवेत्। ४। श्रेष्ठं स्यात् स्वकाष्ठं संस्थं मध्यं तदाधमं॥ कनीयसं नरदधं स्यात् यथा लक्ष्मलाभतः॥५॥ चंगलः पतितो रोगी पापी पाखंडवल्लोत्सजः। गणिसुतिकोदस्ये
वृत्तभ्रष्टश्च कुक्कुरं दीविद्भूक्तरः खरः। काकः षंढश्च स्पृश्यास्सकः। त्वाज्याय विकृयीस्मे नेत्रस्य स्याः सह्यान्नं निर्दिष्टं ता॥७॥ श्रीशालितंडुलप्रस्थं कुर्यादन्नं ससंस्मृतं। शिवाय च चरुं दद्याद्वेत्तुं दश्यां वि
शेषतः। ८। हरिद्रकुसरीमुद्गयापसंपावनं तथा। गुडखंडेश्च संमिश्रं गव्याज्यसंसुकल्पितं॥९॥ यावंतस्तंडुलास्तस्मिन्नन्ने वै प्रपरिसंख्यया। तावद्वर्षसहस्राणि शिवलोके महीयते। १०। गुडखंडकृता
न्नां च भक्ष्याणां च समर्पणात्। घृतेन पाचितान्नां स्यादत्वा कोटिगुणं फलं॥११॥ नारिकेलकफाः पक्काणि कंठकस्य फलानि च। मुक्ताफलसकर्पूरं तां वल्लमिति कीर्तितं। १२। पंचसौगंधिकोपेतं प

श्रे. र.
११

स्तां वल्लं निवेदयेत्। शिवाय गृहवे चैव नस्य पुण्यफलं लभेत् ॥१३॥ सुगंधदेहस्तेजस्वी सर्वावयवसुंदरः। पुण्यको दिसहस्रो भोगैः शिवलोके महीयते ॥१४॥ यस्तु देवांगचीनानि खितानान्युत्तमानि वै। कार्पा
संधवलं वस्त्रं मध्ये कमलभूषितं। एतन्मौक्तिकमालाढ्यं पंचितानमपि वा भवेत् ॥१५॥ मयूरपक्षरंदं तां वल्कलैरतिपांडुरैः। सौवर्णरजतैर्दंडै रत्नजालविभूषितैः ॥१६॥ हस्तमात्रप्रमाणेन तु निर्मितत्वेन शो
भितं। चामरं चैतद्व्याख्यातं युग्ममेकं प्रपूजयेत् ॥१७॥ चमरीवालकेशैश्च तत्र चाकुर्वीत पांडुरैः चामरं द्वितयं स्वर्णरत्नदंडसमायुतं ॥१८॥ छत्रं द्वितालविस्तारं पूर्वोक्तं शुक्लनिर्मितं। पूर्वोक्तदंडसंप्रोतं चतुस्ता
लायते शुभे ॥१९॥ तालवृंतमिति ख्यातं चित्रैरश्वैर्विभूषितं। एतद्द्वयं ये युग्मं सद्भक्त्या परिचक्षते ॥२०॥ दुर्गारूपेवं समाख्याकं सदोषाणि परित्यजेत्। निर्दोषाणि च सौम्यानि सगरस्तो पा
यथाविधि ॥२१॥ एतद्भक्त्याऽत्रयालाशरोप्यकांचनपात्रकैः ॥ एवं स्नानादिनैवेद्यांतं लिंधूपादिभिः क्रमात् ॥२२॥ पापात्रां तरविशेषेण पुण्यं स्यादुत्तरोत्तरं। हेमपात्रप्रदानेन यत्पुण्यं वेदपारगे ॥२३
रोप्यपात्रप्रदानेन तत्स्याच्छतगुणं नवे ॥ एवं देवार्पिमामानि येद्रव्याश्च कुसुमादिभिः ॥२४॥ नार्चयेदितरं देवं परिसार्चाकृताव्यया। सर्वदेवार्चमिस्येन न्युष्यादिद्रव्यसंचयः ॥२५॥ यः कुर्वीत महाद्रव्ये
स्तत्फलाभेयजेच्छिवं। शिवार्चनविशिष्टानि योग्यान्यन्यामरार्चने ॥२६॥ अन्यामरार्चाशेषाणि न द्रव्याणि शिवार्चने। देववाक्तुद्भवं पुण्यमन्यद्वार्चनसाधनं। बलात्तदायचोर्या हि तत्प्रयुंजीत विवा
बुधः ॥२७॥ पत्रैर्नैवेद्यनिर्माल्यसंकीर्णकलशादिभिः। स्नानं तं क्षिपते यस्मात्तत्तदाहाति शंकरः ॥२८॥ देवकार्यं गुरोः कार्यं गणकार्यं तु योगिनां। स्वतनोस्सारतं सर्वं कृत्वा पापैर्न लिप्यते ॥२९॥ दक्षाः
पुष्पांगपत्राद्येरपयुक्ताः शिवार्चने। शेवश्च वगच्छंति तद्बलोकं न संशयः ॥३०॥ पूजितं पूज्यमानं वा यः पश्येद्भक्तितः शिवं। स्तुत्वानुमोदते यस्मात्सचपागफलं लभेत् ॥३१॥ कुशलाः सर्वभक्ताश्च
देवकार्यवियोजिताः। प्रयांति स्वामिनां सार्धं श्रीमच्छिवपुरं महत् ॥३२॥ भुक्त्वा तु विपुलान्भोगान् भत्स्ववर्गसमन्विताः। कालात्सुनरीतापातः पश्चिमामेकतः भवेत् ॥३३॥ ब्राह्मणः क्षत्रि
यो वैश्यः शूद्रो वाविभवान्वितः। विभावानुमतद्रव्यैः पूजयेदन्यथा वृथा ॥३४॥ अग्निस्यर्थं वा पवी पसंहितानां। आढ्यो वा यदरिद्रो वा स्वकां शक्तिं मवंचयन्। द्रव्येर्न्यायार्जितैरेव भक्त्या देवं सम
र्चयेत् ॥३५॥ भक्त्या विनानुसारेण शिवमुद्दिश्य यत्कृतं। अल्पे महति वा साम्यं फलमादपदरिद्रयोः ॥३६॥ भक्त्या प्रचोदितः कुर्याद्स्यवित्तोपि मानवः। महाविभवसारोपि न कुर्याद्भक्तिवर्जितः ॥३७॥

सर्वस्वमपि यो दद्याच्छिवे भक्तिविवर्जितः। स तेन फलभाग्न स्याद्भक्तिरेवात्र कारणं॥३८॥ पद्यदिष्टं समुत्कृष्टं स्वायप्रासं च यद्भवेत्। शिवायतन्निवेद्यं स्याद्भक्त्यानंतफलार्थिभिः॥३९॥ अथ स्वाया

र्जितंश्चापि मत्स्या चेच्छिवमर्चयेत्। नतस्य प्रसन्नायोस्ति भाववश्योपतः प्रभुः॥४०॥ स्वापार्जितैरपि द्रव्यैरभक्त्या पूजयेद्यदि। नतत्फलमवाप्नोति भक्तिरेवात्र कारणं॥४१॥ शिवमुद्दिश्य यद्दानं सर्वका

रणकारणं। तदनंतफलं दत्तं नुभवतीति किमद्भुतं॥४२॥ सर्वेषामपि पात्राणाम्मतिपात्रो महेश्वरः। शिवे दत्तं हुतं जप्तं भक्त्या च विनिवेदितं॥४३॥ सर्वं तदक्षयं प्राहुरागमार्थविशारदाः। एकमप्यं

नफलदं तद्भवेन्नात्र संशयः॥४४॥ इतिश्रीवातुलोत्तरे पंचमोध्यायः॥५॥ उपचाराः। उपचारानथो वक्ष्ये पुराणस्मृतिसंमतान्। कोटेर उपचारस्वरूपं प्रोक्ताः पंचाष्टौ दश षोडश। चतुर्विंशद्द्वात्रिंशद्

पचारा गृहीतिनाः॥१॥ स्नानं पूजां च नैवेद्यमुपचारत्रयं क्रमात्। प्रदक्षिणा नमस्कारः पंचैते संप्रकीर्तिताः॥२॥ पाद्यं वार्घ्यमसपाद्यं वर्मत्रैः समर्चनं पंचोपचारमित्युक्तं बुध लगायरमेष्ठिनाः

संगीतनृत्यवाद्यैस्तैरुपचाराष्टकं मुने। अर्घ्यं पाद्यमाचमनं मधुपर्काचमानकं॥४॥ गंधादयो निवेद्यांतं उपचारदशक्रमात्। आवाहनासने पाद्यमर्घ्यमाचमनीयकं॥५॥ स्नानमाचमनं वस्त्रं नया

चामोपवीतकं। आचामो गंधपुष्पे च धूपदीपनिवेदनं॥६॥ प्रदक्षिणा नमस्कारो वालस्यात्तोपवर्णनं ततः॥ उपचाराः षोडशोक्ताः स्कांदेन च महात्मना॥७॥ आवाहनासने पाद्यमर्घ्यमाचमनीयकं। स्नानं वस्त्रं चो

पवीतं मधुपर्कं गंधपुष्पकं॥८॥ धूपं दीपं च नैवेद्यं फलं तांबूलकं स्तुतिः। प्रदक्षिणा नमस्कारश्शय्यासंगीतवाद्यकं॥९॥ नृत्यं चास्यात्तोपवर्णं चतुर्विंशोपचारकाः। आवाहनासने पाद्यमर्घ्यमाचमनीयकं॥१०॥

स्नानं वस्त्रं चोपवीतं भूषणं चानुलेपनं। तिलाक्षता पुष्पधूपदीपनैवेद्यकानि च॥११॥ मुखवासं नीराजं दर्पणं च फलानि च। तांबूलं प्रदक्षिणो च नमस्कारस्तुतिस्ततः॥१२॥ पुराणपठणं छत्रं व्यजनं चा

मरं तथा॥ शय्या संगीतनृत्यं च वाद्यानि च नतेयेव च। आत्मसमारोपणं चेति द्वात्रिंशदुपचारकाः। आवाहनं तु यो दद्यात्स चक्रनफलं लभेत्॥१४॥ आसनं हविरं दत्वा शक्रत्वं च समाप्नुयात्। पाद्येन पातकं हत्वा

र्घ्येण प्रोमन ऋर्षतां॥१५॥ ततश्चाचमनं दत्वा शुचित्वमुखतां व्रजेत्। स्नानं व्याधिभयं हत्वा वस्त्रेण पुष्पवर्धनं॥१६॥ उपवीतं तु यो दद्यात्स वेदत्वमेव च। भूषणानि च यो दद्यात्स्थानपदमवाप्नुयात्॥१७॥

नानापुष्पप्रदानेन स्वर्गराज्यमवाप्नुयात्। धूपो दहति पापानि दीपो मृत्युविनाशनः॥१८॥ सर्वमानस्तु नैवेद्यं दत्वा तृप्तिरतो भवेत्। मुखवासनदानेन कीर्तिमान्भवति ध्रुवं॥१९॥ नीराजनेन शुद्धात्मा सर्वदोषेन

प्रकाशयेत्। फलदः पुत्रवान्मर्त्यः स्नात्वा लात्स्वर्गमाप्नुयात्॥२०॥ प्रदक्षिणां तु यः कुर्यात्पदंहंति पदे पदे। दश प्रणामं यः कुर्याद्देवमुद्दिश्य सन्निधौ॥२१॥ वर्षाणि वसते स्वर्गे देहते रोगसंख्यया॥ स्नेत्रेणाद्ध्यरे
होपि वाग्मी भवति कीर्तनात्॥२२॥ पुराणपठनेनैव सर्वपापक्षयो भवेत्॥ छत्रं दत्वा महेशाय नंदीश्वरसमो भवेत्॥२३॥ ततः कशालिं निंप्राप्य सार्वभौमो नृपो भवेत्। तालवृंतेन संवीज्य वायुलोके महीयते॥२४॥ मायूरचामरं दत्वा मायूरगणराज्य भवेत्॥ दत्वा वै चामरं देवं विज्यते पंपि वपुरे॥२५॥ पुगकोटिशतं भुक्त्वा चांते राज्यमवाप्नुयात्। संगीतनृत्यं यः कुर्यात्सर्वफलं लभेत्॥२६॥ मदशप्यापद्दाने नचाप्तनं
परमाप्नुयात्। सुवर्णवर्णं तां गच्छेद्धावेन शिवसन्निधौ॥२७॥ दर्पणं दत्वा शिवे स्थाप्य शिवत्वं प्राप्नुयाद्ध्रुवं। एवं संक्षिप्य कथितं मुपचारमनुत्तमं॥२८॥ भ्रुस्यान्यपचारं श्च मूलेनैव तु स्थापयेत्। इति श्रीशैवर
त्नाकरे षष्ठोध्यायः॥६॥ ॥ छ॥ ॥ पिंडोत्पत्तिः॥ अथ पिंडोत्पत्तिक्रमं वक्ष्यामि॥ संसारदीपिके शास्त्रे॥ श्रीगंतं त्वं हत्वभावं च सर्वदानं स्वविग्रहं॥ मेरवे विश्वंभररूपं भगवंतमुमापतिं॥१॥ देवदेवं जगन्नाथं योगिनो च क्र
नायकं॥ प्रणम्य शिरसा देवी पप्रच्छ नीरं विमुक्तये॥२॥ देव्युवाच॥ इत्तरं देवदेवेश संसारं भोनिधिं प्रभो॥ सुखोपायेन यशवत्तरं ति च प पावद॥३॥ ईश्वरः। साधु साधु महाभागे शोभनं कथितं त्वया॥ अधुना संप्रव
क्ष्यामि देहस्य लक्षणं यथा॥४॥ कुलज्ञानं सुरश्रेष्ठे निश्चितं कथयामि ते। गत्वा सारतरं गुर्वं कुलालं यथा प्रिये॥५॥ नधाने लक्षयोगेन चराचरकमले धारणेन कंहसेनाकाशो वा पुनत्वेस्मितिरनलजलेषु द्
र्शनेन घोषे भ्रुसंते विंदुनादे न चकाररालये नादि मध्यावसाने रभिरुद्ध्वा ने विमुक्तेः सकलतनुमयं सर्वगं तन्न मामिदं कुलस्य ज्ञानमातेराण सर्वज्ञत्वं प्रजापते। चैतन्यं चौजरूपं च शुक्लं रक्तं तथा जलं॥७॥ येकी भूतं पराका
लेन तदा कालेप्ररोहति। कललं तत्वे करणेत्रेणापंचरात्रेण तु बुद्बुदं॥८॥ शोणितं तदशरात्रेण मांसपेशि त्रिपंचके। पुनर्मांसं च विंशत्या हे गर्भस्थो वर्द्धते क्रमात्॥९॥ पंचविंशति संपूर्णा फलं पंचांकुरापते। मासेनैकेन संपूर्णा पंच
तत्वानि धारयेत्॥१०॥ मासद्वयेन संपूर्णा मांसमेदः प्रजायते॥ मज्जास्थीनि त्रिभिर्मासैः केशांगुलयश्चतुर्थके। कर्णौ चिनासिकास्यानिदिरं ध्राणि मासपंचके। कंठरंध्रोदरं च षष्ठे गुह्यं च सप्तमे॥ सर्वांगसंधि संपूर्णो मासैः
स्यादष्टभिः प्रिये॥१२॥ मासे तु नवमे प्राप्ते गर्भस्य स्मरति स्वयं। मन श्चाहं पुनर्जातो जातः श्वाहं मृतः पुनः॥१३॥ नानायोनिसहस्रेषु भ्रमकारं श्रमने कशः। चिकित्सा जायते तस्य गर्भवासं परीमजेत्॥१४॥ रक्ताधिक्ये भवेन्नारी
नरः शुक्लाधिके स्मृतः। नपुंसके समेद्युक्ते त्रिविधं पिंडसंभवः॥१५॥ इत्कित्रयविशालांगं षड्कोशिकस्थाप्रिते। षट्कूर्मयोये तं ब्रह्मांडेपुस्मत्विते॥१६॥ पंचकर्मेंद्रियेषु कंदशनाडि मिहर्जितं दशानिलगणोपेतं योजना

नि संयोगवित्॥१७॥ मज्जास्थिशुक्लधातुश्च रक्तमांसत्वचं तथा। षट्कौशिकमिदं पिंडं नस्यां नेयांच योनिकं॥१८॥ पंचभूतमयो येनं बुद्धिंद्रियसमन्वितं। क्षितिर्वार्येग्निरनिलस्पाकाशनिक्रमात्॥१९॥ स्थूलभूतानि
मे पंचसंख्यास्य अंतरस्थिताः॥ अस्थिमांसत्वचौ नाडी रोमाणि इति पंचकं॥२०॥ क्षितेः पंचगुणा ये ते समासात्परिकीर्तिताः॥ लालामूत्रं तथा स्वेदः शुक्रं शोणितमेव च॥२१॥ अपां पंचगुणा ये ते समासात्कथिता मया
क्षुधा तृष्णा तथा निद्रा घ्राणालस्यं कांतिरेव च॥२२॥ तेजः पंचगुणाः प्रोक्ताः ज्ञातव्याहि विशेषतः॥ धावनं वल्गनं चैव समाकुंचप्रसारणं॥२३॥ निरोधः पंचमः प्रोक्तो वायोः पंचगुणाः स्मृताः॥ रागद्वेषौ तथा लज्जा भयं मोह
स्तथैव च॥२४॥ व्योम्नः पंचगुणा ये ते समासात्परिकीर्तिताः॥ श्रोत्रं त्वक्चक्षु जिह्वाघ्राणं बुद्धीन्द्रियाणि च॥२५॥ वाक्पाणिपादपायू च गुह्यं कर्मेंद्रियाणि च। इडा च पिंगला चैव सुषुम्ना च तृतीयका॥२६॥
गांधारी हस्तिजिह्वा च पुष्पा चैव पयस्विनी॥ अलंबुषा कुहूश्चैव शंखिनी दशमी स्मृताः॥२७॥ पिंडमध्ये तथा ह्येताः प्रधाना दश नाडयः॥ कुलपिंडसमाख्यातं विभवं कथयामि ते॥२८॥ ब्रह्मांडे ये गुणाः संति ते
शरीरे अवस्थिताः॥ पातालभूधरा लोकास्तथान्ये द्वीपसागराः॥२९॥ आदित्यादिग्रहाः सर्वे पिंडमध्ये व्यवस्थिताः॥ पादाधस्त्वतलं विद्यात् पादोर्ध्वं वितलं तथा॥३०॥ जानुभ्यां सुतलं ज्ञेयं नितलं संधिबंधने॥
तलातलमथोर्वोस्तु गुह्यस्थो ने रसातलं॥३१॥ पातालं कटिबंधे तु पादादौ लक्षयेद्बुधः॥ भूर्लोकं नाभिमध्ये तु भुवर्लोकं हृदि स्थितः॥३२॥ स्वर्लोकः कंठदेशे तु महर्लोकस्तु तालुके॥ जनलोकस्तु भ्रूमध्ये तु तपोलोको
ललाटके॥३३॥ सत्यलोकः कंठदेशे तु महर्लोकस्तु तालुके॥ जनलोकस्तु भ्रूमध्ये तु तपोलोकोऽललाटके॥३३॥ सत्यलोकः शिरस्थाने भुवनानि चतुर्दश॥ त्रिकोणे संस्थितो मेरुरधः कोणे तु मंदरः॥३४॥ कैलासो
दक्षिणे कोणे वामकोणे हिमालयः॥ निषधश्चोर्ध्वभागे च दक्षिणे गंधमादनः॥३५॥ विंध्यस्तु रोमरेखायां सप्तैते कुलपर्वताः॥ अस्थिस्थाने स्थितो जंबुर्मज्जास्थः प्लक्षसंज्ञकः॥३६॥ कुशद्वीपः स्थितो मांसे क्रौं
चद्वीपः शिरासु च॥ त्वचायां शाल्मलीद्वीपो गोमेधो रोमसंचये॥३७॥ नखस्थं पुष्करं विद्यात् सागरास्तदनंतरं॥ क्षारोधश्च तथा मूत्रे क्षीरे क्षीरोदसागरः॥३८॥ दध्याख्यं च तथा श्लेष्मे मज्जायां सर्पिरर्णवः॥ रसो
दधिर्वसायां च शोणिते च सुरोदधिः॥३९॥ स्वादूदं लंबिकास्थाने गर्भोदः सप्तसागराः॥ नादचक्रे स्थितः सूर्यो बिंदुचक्रे च चंद्रमाः॥४०॥ लोचनाभ्यां कुजो ज्ञेयो हृदये च बुधः स्मृतः॥ गुरुस्थाने गुरुं विद्यात् शुक्रे शु
क्रः समाश्रितः॥४१॥ नाभिस्थाने स्थितो मंदो मुखे राहुः समाश्रितः॥ नादस्थाने स्थितो केतुर्भित्वा धात्र्यपत्रयं॥४२॥ विभवश्चाससाख्यातमाया दन्तलमलकं। हृदिस्थाने स्थितो ब्रह्मा कंठे विष्णुः समाश्रि

नः ॥४३॥ भ्रूमध्ये संस्थितो रुद्रस्तस्योर्ध्वे ईश्वरः स्मृतः। सदाशिवो ललाटांते पंचैते भूतनायकाः ॥४४॥ इति संसारदीपिकायां पिंडोत्पत्तिनिर्णयः। श्रीसांबादिः। वृत्ताधाराष्टवर्णनाम्ने देवदेवस्य धीमते नमः। पशवः परिकीर्त्यं
ते संसारपरिवर्तिनः ॥१॥ तेषां पतित्वाद्देवेशो रुद्रः पशुपतिः स्मृतः। अनादिनिधनो ह्येष भगवान् विमुक्तये यः ॥२॥ मायापाशेन बध्नाति पशून् तान् परमेश्वरः। स एव मोचकस्तेषां ज्ञानयोगेन सेवितः ॥३॥ अविद्यापाश
बद्धानां नान्यो मोचक इष्यते। तं मत्वा परमात्मानं शंकरं परमेश्वरं ॥४॥ बुद्ध्यादिस्तं चतुर्विंशत्पशून्बध्नाति महेश्वरः। त्रिभिर्गुणमयैः पाशैः कार्यकारणसंयुतं ॥५॥ ध्यानेन भक्तियोगेन पशुभिः समुपासितः। मोचयित्वेव
नान्यः शंकरः परमेश्वरः ॥६॥ धर्माधर्ममयैः पाशैर्बद्धानां देहिनामयं। मोचकः शिव एवैको भगवान् परमेश्वरः ॥७॥ चतुर्विंशतितत्त्वानि मायाकर्मगुणा इति। विषया इति कथ्यंते पाशा जीवस्य बंधनाः ॥८॥
तेभ्यः कार्पण्यमज्ञो वक्ष्यंते सर्वदेहिनः। पंचक्लेशमयैः पाशैः पशून्बध्नाति शंकरः ॥९॥ स एव मोचकस्तेषां भक्त्या सम्यगुपासितः। सुधारसामयं देवो रागमोहादिवर्जितं ॥१०॥ जराजाड्यमन्यच्च खेदशोकमदोर
ति विस्मयं जननं निद्रालस्यमष्टादशाध्वगं ॥११॥ विभूतिमाहात्म्यं। शुभानामशुभानां च कर्मणां वापि संचयं। करोति भस्मसाद्भक्तिर्दहत्यग्निरिवेंधनं ॥१॥ संचितं जन्मलक्षेण पापं नृणां निरंतरं। करोति भस्मसाद्भ
क्तिस्तस्य शंभोरनुग्रहात् ॥ भक्तिः शिवे यदि भवेत्तत्कस्माद्भक्तिचेतसः यं भवार्णवं नास्त्येव प्रसादाच्छूलिनो मुने ॥२॥ तीर्थयात्रा बहुविधा यत्साध्य विविधाः क्रतुः। ये तु जन्मसहस्रे च प्रसादाच्छूलिनो मुने ॥३॥ तीर्थयात्रा
बहुविधा यज्ञाश्च विविधाः कृताः। ये तु जन्मसहस्रेषु तेषां भक्तिर्भवेच्छिवे ॥४॥ लिंगे चांद्रायणसहस्रं च प्राजापत्यं शतं तथा। मासोपवासाश्चान्ये च भवभक्त्या मुनीश्वरः ॥५॥ भक्तिस्वरूपं। भक्तिरष्टविधा ज्ञेया यया सर्वे
शास्त्रेषु दृश्यते। तामहं कथयिष्यामि भवपाशविनाशिनीं ॥६॥ मद्भक्तजनवात्सल्यं पूजायां चानुमोदनं। स्वयमभ्यर्चनं भक्त्या यमार्थे अंगचेष्टनं। मत्कथाश्रवणे भक्तिः स्वरनेत्रांगविक्रिया। ममानुस्मरणे नित्यं यच्च
मामुपजीवति ॥७॥ प्रसादो देवता भक्तिः प्रसादो भक्तिसंभवः। यथैवांकुरतो बीजं बीजतो वा यथांकुरः ॥८॥ वीरशैवे। कामं भक्तिरतो कुर्यात्क्रोधं चाधर्मकर्मणि। लोभं शिवार्चने कुर्यान्मोहं भक्तजनेषु च। मात्सर्यं करणे
ष्वेवं मदं मायापराभवे। व्यसनं शिवतत्त्वे च लिंगस्यैव निरीक्षणं ॥११॥ इत्येतत्सात्त्विकं प्रोक्तं भक्तिरूपं प्रदर्शितं। सकलं निष्कलं चैव द्विविधं स ज्ञानं स्मृतं ॥१२॥ कालकूटसनं देवि सज्जनं मुद्दशे वकं ॥ ॐ। नमः शिवाय
सोऽमाय षट्त्रिंशत्तत्त्वरूपिणे। अग्निष्टोमात्मने मत्स्यज्योतिर्वेशांतजे नसे ॥१३॥ सर्वोऽपि च शास्त्राणि पुराणानि विशेषतः। श्रुतिस्मृतीतिहासादिनन्यान्यालोच्य कृत्स्नशः ॥१४॥ भस्मतत्त्वस्य विस्तारं वि

धानं च षुष्टिलं रं। माहात्म्यविस्तरं ल्यो तत्र व्यालो त्कमार्गतः ॥१५॥ तत्र ब्रह्मा क्रोधेन रुद्रस्य सारमादाय संगृह्य। विभूतिमहीमात्कल्परलस्तारसमुच्चयं॥१६॥ काश्यामलत्र्यपंचत्वमतस्ततपनं तथा। अपव
र्गपदं नेतुं क्रियते भूतिपद्धतिः ॥१७॥ जाबालोपनिषदि। सद्योजातात्पृथिवी तस्या निवृत्तिः। तस्याः कपिलवर्णा नंदा तस्या गोमयेन विभूतिर्जाता।१८। वामदेवादुदकं तस्मात्प्रतिष्ठा तस्याः कृष्णवर्णा भ
ग्रे वर्तते यस्य सफलं तस्य जीवितं ॥ ६८ ॥ इति शैवरत्नाकरे शिवाष्टकरणं नाम दशमोध्यायः ॥ १० ॥ श्रीपंचाक्षरे । सर्वज्ञं तेषु संपूज्य देवदेवमुमापतिं ॥ जपेत्पंचाक्षरीं विद्यां विधिनैव द्विजोत्तमाः ॥ १ ॥
जयादेव मसंदेहो वृत्तानावैविशेषतः ॥ समाप्ते नोत्यथा न स्माज्जपेत्पंचाक्षरीं शुभां ॥ २ ॥ ऋषय ऊचुः । कथं पंचाक्षरी विद्या प्रभावो वा कथं वद । क्रमो वा पमहाभाग श्रोतुं कौतूहलं हि नः ॥ ३ ॥ पुरा देवेन रुद्रे
णादेवदेवेन शंभुना । पार्वत्यै कथितं पुण्यं प्रवदामि समासतः ॥ ४ ॥ पार्वत्युवाच । भगवन्देवदेवेश सर्वज्ञ परमेश्वर । पंचाक्षरस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ ५ ॥ श्रीमहादेवः ॥ पंचाक्षरस्य माहात्म्यं वर्ष
कोटिशतैरपि ॥ न शक्यं कथितुं देवि तस्मात्संक्षेपतः शृणु ॥ ६ ॥ अल्पाक्षरं महार्थं च महासारं विमुक्तिदं । आज्ञासिद्धमसंदिग्धं वाक्यमेतच्छिवात्मकं ॥ ७ ॥ नानासिद्धियुतं दिव्यं लोकचित्तानुरंजनं । सुनिश्चिता
र्थं गंभीरं वाक्यं तन्मारमेश्वरं ॥ ८ ॥ मंत्रं सुखमुखोच्चार्यं मशेषार्थप्रसाधनं ॥ तद्बीजं सर्वविद्यानां आद्यमंत्रं षडक्षरं ॥ ९ ॥ अतिसूक्ष्मं महार्थं च ज्ञेयं तद्वटबीजवत् । देवः स त्रिगुणातीतः सर्वज्ञः सर्वतः
प्रभुः ॥ ॐ मित्येकाक्षरं मंत्रे स्थितः सर्वगतः शिवः ॥ १० ॥ वाच्यवाचकभावेन स्थितः साक्षात्स्वभावतः ॥ वाचः शिवः प्रमेयत्वान्मंत्रस्तद्वाचकः स्मृतः । वाच्यवाचकभावोयमनादिः संस्थितस्तयोः ११
देवे शिवागमे चायं मूमपत्रं षडक्षरः । मंत्रः स्थितः सदा मुख्यो लोके पंचाक्षरः स्मृतः ॥ १२ ॥ किं तस्य बहुभिर्मंत्रैः शास्त्रैर्वा बहुविस्तरैः । यस्योन्नमः शिवायेति मंत्रो यं संस्थितो हृदि ॥ १३ ॥ शिवस्तानानि

पार्वतिविधास्थानानियानिच॥षडक्षरस्य सूत्रस्य तानि भाष्यं समासतः॥१४॥ कोविद्वान्वेदवित्सम्यगधीते वेदविज्ञानकः॥एतावद्धि शिवज्ञानमेतावत्परमं पदं।१५। येनोन्नमः शिवायेति ज्ञानं वा
क्यं षडक्षरं। विधिवाक्यमिदं शैवं नार्थवादः शिवात्मकं॥१६॥ पंचाक्षरस्य प्रणवोमंत्रोयं तद्रूपमम॥ गुह्याद्गुह्यतरं साक्षान्मोक्षज्ञानमनुत्तमं १७ प्रमाणं वेदवाक्यत्वात्परमार्थप्रकाशितं॥वेदानां यज
षां चैव शतरुद्रेप्यवस्थितं॥१८॥ ख्यातं यदितं यस्मात्स्वरं वैदिकं नोत्रिकं॥ ख्यातं वेदवाक्यत्वात्स्मार्त्तं तत्कालतथा।१९। वैदिकानामिदं देयं जप्यं नैरवशोधने॥शूद्राणां वेदबाधानां नास्तिकानामध
र्मिणां॥२०॥ कृतघ्नानामभक्तानां नोपदेश्यं कथंचन॥दासस्यापि च भक्तस्य हितप्रियकरस्य च॥२१॥ शूद्रस्यापि प्रदातव्यं नमोन्तं प्रणवं विना॥ विनाप्रणवकं मंत्रं स्त्रीशूद्राणां प्रसाधनं २२ प्रणवे
न समायुक्तस्त्वयोर्देवी विशेषमः॥ नकारश्च मकारश्च शिकारो वकारएव च।२३। यकारः पंचमो मंत्रः प्रणवेन षडक्षरः। श्रीमहादेवः।अस्य मंत्रस्य वस्यामि ऋषिश्छंदोधिदेवतं। बीजं शक्तिः स्वरं वर्णं स्था
नंचैवाक्षरं प्रति।२४। वामदेवो नाम ऋषिः पंक्तिश्छंद उदाहृतं॥देवता शिवएवाथ मंत्रस्य वरानने।२५। नकारादीनि बीजानि पंचभूतानि कानि च। आत्मानं प्रणवं विद्धि सर्वव्यापिनमव्ययं॥२६॥
नकारः पृथिवी ज्ञेया मकारस्तायमुच्यते।शिकारोग्निरिति प्रोक्तो वाकारो वायुरुच्यते॥२७॥ यश्चाकाशमिति प्रोक्तः पंचभूतमिति स्मृतं। अकारश्च उकारश्च मकारश्च क्रमेण वै। त्वदीयं प्रणवं के
चिन्मदीयं प्रणवं तथा॥२८॥ प्रथमं नारकी रूपं द्वितीयं रुद्रमुच्यते॥ तृतीयं कुंडलाकारं चतुर्थं चार्धचंद्रकं।२९। पंचमं नादबिंदुश्च प्रणवं पंचलक्षणं नारकी वृत्तरूपं दंडकोविष्णुरुच्यते॥३०। कुंडलो
रुद्रसंसक्तो अर्धचंद्रं तदीश्वरः॥ बिंदौ सदाशिवः प्रोक्तः प्रणवं पंचलक्षणं॥३१॥ त्वदीयं देवि मंत्राणां शक्तिभूतं न संशयः॥ अकारोकारमकारमदीयप्रणवे स्थिताः।३२। छंदो देवी च गायत्री परमात्मा
धिदेवता॥ ओंकारस्य त्वहं तातो ऋषिर्ब्रह्मापि तस्य च।३३। उदात्तः प्रथमस्तस्य चतुर्थश्च द्वितीयकः॥ पंचमः स्वरितः शेवमध्यमो निहितस्वरतः ३४ नकारः पीतवर्णश्च स्थानं पूर्वमुखं स्मृतं। इंद्रोधि
देवतं छंदो गायत्री गौतमो ऋषिः॥३५॥ मकारः कृष्णवर्णश्च स्थानं वै दक्षिणं मुखं। विश्वामित्रो ऋषिस्त्रिष्टुप्छंदो विष्णुश्च देवता।३६॥ वाकारो हेमवर्णश्च स्थानं वै चोत्तरं मुखं। बृहस्पतिर्दैवतं छंदोबृ
हती चांगिरा ऋषिः॥३७॥ यकारो रक्तवर्णश्च स्थानमूर्ध्वमुखं विराट्छंदो ऋषिर्भरद्वाजः स्कंदो देवतमुच्यते।३८। एवं लक्ष्यापरं मंत्रमाज्ञां चैव गुरोस्तथा जयेन्नित्यं संचसं कल्पपुरश्चरणपूर्वकं॥३९॥

श्रै०२०
२३

यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्रकं । अनन्यचित्तस्यैव त्वा नित्यजापोऽयमुच्यते । जपेत्स्फटिकसंवेष्टनुमुणिरमारणात् । रक्तरसोत्तं पमोयः सयोरश्चरणाकृस्मृतः ॥४१॥ कृतेनैलस्रजपं कुर्यात्रेतायां
द्विगुणं भवेत् । द्वापरे त्रिगुणं प्रोक्तं कलौ स्याच्चतुर्गुणं ॥४२॥ प्यावज्ञानविधायां सपुरश्चरणो यो वा नित्यजापी भवेन्नरः । अचिरं सिद्धिमाकांक्ष्यन् तयोरन्य नरो भवेत् ॥४३॥ यः पुरश्चरणं कृत्वा नित्यजापी
भवेन्नरः । तस्य नास्ति समो लोके स सिद्धः सिद्धिवशी ॥४४॥ आसने रचिरं बद्ध्वा मौनी नीचैकाग्रमानसः । प्राङ्मुखो रङ्मुखो वापि जपेन्मंत्रमनुस्मरेत् ॥४५॥ आद्यं तं योजपस्मात्पूर्वकुर्यात्त्रिप्राणसंयमं
नतोंते च जपेद्बीजं शतमष्टोत्तरं सुधीः ॥४६॥ चत्वारिंशन्त्समावृत्य प्राणानायम्य मानसे । पंचाशत्स्यमंत्रस्य प्राणायाम उदाहृतं ॥४७॥ प्राणायामाद्भवेच्छिप्रं सर्वपापस्य वै क्षयः । इंद्रियाणां वशित्वं
च तस्मात्प्राणान्संयमेत् ॥४८॥ कौशे पंचमे वा कुर्यान्नीलं चैलमथापि वा ॥ दारवं तालपर्णं वा आसनं परिकल्पयेत् ॥४९॥ वंशासने दारिद्र्यं पाषाणे व्याधिसंभवः । धरण्यां दुःखसंभूतिर्दौर्भाग्यं दारुका
सने ॥५०॥ तृणासने यशोहानिः पल्लवे चित्तविभ्रमः । पद्योवितेष्वासनेषु निषिद्धानि परित्यजेत् ॥५१॥ कम्बले वै शोधितं प्रोक्तं वंशादिष्वासनेषु वै । मंत्रग्लानिस्तयो हानिस्तेषु सामान्यतो मताः ॥५२॥ कृष्णा
जिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि । स्यात्स्याद्ब्धिकार्दि कौशेये शांतिकं वेत्रविष्टरे ॥५३॥ वस्त्रासने व्याधिनाशं कंबले दुःखमोचनं । अभिचारिकं नीले रक्ते वश्यादिकं भवेत् । धवले शांतिकं मोक्षः सर्वापे
क्षित्रकं वले ॥५४॥ गृहे जपं समं विद्यात्गोष्ठे शतगुणं भवेत् । नद्यां शतसहस्रं च सत्यं नंतं शिवसन्निधौ ॥५५॥ समुद्रतीरे प्रासादे गिरौ देवालये तु चा पुण्याश्रमेषु सर्वेषु जपं कोटिगुणं भवेत् ॥५६॥ शिवस्य सन्निधौ
चाप्येत्सूर्यस्याग्रे गुरोरपि दीपस्यापि जपस्यापि जयकर्म प्रशस्यते ॥५७॥ नत्पूर्वाभिमुखं वश्यं दक्षिणं चाभिचारिकं । पश्चिमं धनदं विद्यादुत्तरं शांतिकं भवेत् ॥५८॥ माहात्म्यं वाचिकस्यैवं जपयज्ञस्य कीर्तितं ॥ त
स्माच्छतगुणोपांशुः सहस्रो मानसस्मृतः ॥५९॥ यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः । मंत्रमुच्चारयेद्वाचा जपयज्ञः स वाचकः ॥६०॥ शनैरुच्चारयेन्मंत्रमीषदोष्ठौ प्रचालयन् । किंचित्कर्णगतं विद्यादुपांशुः
स जपः स्मृतः ॥६१॥ धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं । शब्दार्थचिंतनं भूयः प्रोक्तो मानसो जपः ॥६२॥ त्रयाणां जपयज्ञानां श्रेयस्यादुत्तरोत्तरं । भवेद्यन्नविशेषेण वैशेष्यं तत्फलस्य च ॥६३॥ मनः संहर
णं शौचं मौनं मंत्रार्थचिंतनं । अव्यग्रत्वमनिर्वेदो जपसिद्धेस्तु हेतवः ॥६४॥ सर्वत्र व्याप्ति वक्ता नं ज्ञात्वा जपविधिं क्रमं । जितेंद्रियो जितक्रोधः शिवज्ञानपरायणः ॥६५॥ सदा चारो जपन्नुद्भुत्थाय नम इंसमश्नुते

शृणुध्वं सर्वयज्ञेभ्यो जपयज्ञो विशिष्यते ॥६६॥ हिंसया त्वा प्रवर्तन्ते जपयज्ञस्त्वहिंसया॥ यावंतः सर्वयज्ञास्तु वृत्तानि च तपांसि च ॥६०॥ सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीं ।६७॥ जपेन देवता नित्यं स्तूयमाना प्रसीद
ति। प्रसन्ना विपुलान्भोगान्दद्यान्मुक्तिं च शाश्वतीं ।६८। रक्षो यक्ष पिशाचाश्च ग्रहाः सर्पाणि भीषणाः। जापिनं नोपसर्पन्ति भयभीताः समंततः ।६९। जपेन पापं च क्षपयेदशेषं यद्यत्कृतं जन्मपरंपरासु। जपेन रोगान्
जयते च मृत्युं जपेन सिद्धिं लभते च मोक्षं ।७०। वायवीयसंहितायां॥ सत्यमेतत्त्वया प्रोक्तं तथापि शृणु सुंदरि। रहस्यमिति ज्ञात्वैतत्क्वापि नैव मया पुरा ।७१। अमंत्रः कर्मपतितः पूजयेद्यदि मोहितः। नारकी स्यान्न
संदेहो मम पंचाक्षरं विना ७२ अभक्तो वा प्रभक्ताश्च ये चान्ये वृत्तकर्षिताः। तेषामेतेन वृत्तेनास्ति मम लोकसमागमः ।७३। भक्त्या पंचाक्षरेणैव योपि मां सन्नर्चयेत्॥ सोपि गच्छन्महास्थानं मंत्रस्यैव तु गौरवात्॥
७४॥ तस्मात्तपांसि यज्ञाश्च वृत्तानि नियमास्तथा। पंचाक्षरार्चनस्यैते कोट्यंशेनापि नो समाः॥ ७५॥ अबद्धो वापि बद्धो वा सकृत्पंचाक्षरेण यः। पूजयेत्पतितो वापि मूढो वा मुच्यते नरः ।७६। षडक्षरेण वा देवि
पंचाक्षरेण वा। अलब्ध्वा लब्धवत् वैषकोटिकोटिगुणाधिकः ।७७। तस्माल्लब्ध्वैव मां देवि मंत्रेणानेन पूजयेत्। लब्ध्वा संपूज्यते यस्तु मैत्र्यादिगुणसंयुतः॥७८॥ ब्रह्मचर्यरतो भक्त्या मत्सायुज्यमवाप्नुयात्। किमत्र
बहुनोक्तेन भक्ताः सर्वेधिकारिणः ।७९। मम पंचाक्षरे मंत्रे तस्माच्छ्रेष्ठतरो हि सः। त्रिपंचके न वा मूलविधया प्रणवेन वा ।८०। पूजां कुर्यात्प्रयत्नेन त्रिकालं नित्यमेव वा। त्रिपंचकं यजेद्देवं सुगंधपुष्पवर्धनं॥
८१॥ किं करिष्यति मां मन्तुर्मृत्योर्मृत्युरहं तथा। ॐ अस्य मृत्युंजयमंत्रस्य वशिष्ठ ऋषिः मृत्युंजयो देवता अनुष्टुप् छंदः मृत्युंजयप्रीत्यर्थे जपे विनियोगः। क्रियासारे ईश्वरः। अथ वक्ष्ये समासेनायाल्लक्षणघटना
क्रमं। जपे फलविशेषश्च स्थापनं कमलासने॥८२॥ घटिका मालिका यासा प्रशस्ता सशिखा मणिः। पिशाखा मणिमयं वृत्तं सौम्याभूतो न संख्यया। ८३। सहजप्यो विधिस्तासां स्यात्तस्याघांत यो स्वजः॥८
प्रासस्य विशेषोस्ति मणिमालाक्षतो मता ८४ तथैवांगुरुहारास्य कुशग्रंथे पद्मवृत्ता प्रवालकाः स्फटिकावैडूर्यः सद्रुद्राक्षाणि च नवविधः ।८५। श्वेतरक्तसुवर्णाभ तत्सवर्णाक्रमाद्भवेत्। यतेस्तु सर्वासु रागाश्चे
षो जपमालाक्षतोभ्यशो ।८६। अत्तामस्तु त्रिजातीनामपि वा स्वस्य जातयः। अतिस्थूलानि सूक्ष्माणि अस्फुटितानि मंगुरे लघु ।८७। भिन्नं पुराणं जीर्णं रुद्राक्षो न वरस्तनः॥ प्रयोगे त्यां जपं कुर्या
नातिस्थूलाम् मणयो विलाः॥ ८८॥ दंडा दंष्ट्रिपियो विद्याः वृत्ताः श्रेष्ठा इति स्मृताः॥ मणेः पदन्ते तस्थानं नमस्व वपक्षे तु निन्नके॥ ८९॥ कमलासस्ववरस्माशं सर्विंडा हिजपस्तुरवे। सविंडकांचस्य

शै॰ क॰
२७

ला कुंभकमागमिति स्मृतं ।९०। एवं ज्ञात्वा नतं यत्नं कुर्यात् भोः हितमुखयोः । यदि वेदे कदिग्वक्त्रा भणिता नखदेत यष्टि वर्तनात् ।९१। सर्वेषामंतरे ग्रंथिः कर्तव्या वर्तने द्वया । अन्योन्यग्रथितं यच्च ग्रथितं वा जपविनाशकृत् ।९२।
त्रिविधं छेदनसूत्रेण संप्रोच्य जपमालिकां । वाक्या नाम त संस्कारं यथाविधि समाचरेत् ।९३। प्रक्षाल्य पंचगव्येन ततः पापं चामन्ते न च । ससतानयूतो वा पितो ये न पिता कुंभ स्थिते न च ।९४। सकुचे मूलमंत्रेण गंधपुष्पाक्षता
दिभिः । धूपदीपनिवेद्यादि त्वा यावच्छत ते स्पृशेत् ।९५। मूलमंत्रं जपेत्पश्चादृंबन्धागावेत्सुधः ।। एवं पासंस्कृता माला जपकर्मणि सर्वदा ।९६। अभीष्टफलदा मंर्थे सा सर्वापद्विनाशनी । मध्यमानामिकां गृह्ये र
सूत्रमालामणि एणी न स्पृशेत् ।९७। एवं जपस्य चैव कस्य अंगुमोयं चालये ज्जपे । अंगुष्ठेन तु मोक्षाय तर्जनी शत्रुनाशनी ।९८। मध्यमा धनदा शांतिकरी सेष्टा यनामिका ।। कनिष्ठा रक्षणो शस्ता जपकर्मणि शो
भने ।९९। अंगुष्ठेन जपेज्जप्यं मध्यमे रंगुलिभिः सह । अंगुष्ठेन विना कर्म कृतं यत्फलं च यत् ।१००। मोक्षार्थं पंचविंशत्या न्सप्तविंशति योषिके ।। त्रिंशच्च धनसंपत्ते पंचदश्याभिचारिके ।१। जस्वाक्ष मालां सकलां
अमयेदंगशिखामणोः ।। प्रदक्षिणं पुनर्वक्त्रं प्रारम्येवं समाचरेत् ।२। स्वयं वामे न हस्ते न जपमालां न संस्पृशेत् । आदिक्षिततोद्विजो वापि स्पृष्ट्वा च शुद्धिमाचरेत् ।३। न धारयेत्करे मूर्ध्नि कंठे च जपमालिकां ।। जपका
ले जपं कृत्वा सरःस्थमुक्त स्थले निक्षिपेत् ।।४।। अलाभे जपमालायाः करशाखासुपर्वभिः । मध्यमांगुल्यग्रपर्वाद्दिक्षादक्षिणपक्रमेण तु ।५।। अथवा करशाखाभिर्जप्त ओजापकेर्जपः । अंगुल्या जपसंख्यानमेक
मुक्तं ततः ।६। रेखापाठ गणं विधास्तु त्रजीवे दशाधिकं ।। शतं स्पाक्षं खमणिभिः प्रवालैस्तु सहस्रकं ।।७।। स्फाटिके दशसाहस्रं मौक्तिके लक्षमुच्यते । दशलक्षं राजताक्षैः सौवर्णैः कोटिरुच्यते ।।८।। कुशग्रंथ्या
च रुद्राक्षैरनंतगुणितं भवेत् । प्रदक्षिणानमस्कारौ जपश्चेति त्रयो मया ।९। संख्याहीनं कृतं सर्वं त्वसम्पत्तमपार्थितं । अतश्च संख्यया विद्वान् जपेत्स फलसिद्धये ।।१०।। संख्याफलविशेषश्च जपस्तु जपाद्
वेत् ।। जपमालाविधिस्त्वेवं प्रोक्तः कमलसंभव ।। एवं सर्वपरिज्ञाय फलार्थी सततं जपेत् ।११। इति श्रीशैवकल्पद्रुमे पंचाक्षरमाहात्म्ये एकादशोऽध्यायः ।।१२।। ० ।। अथ यागः शिवधर्मशास्त्रे ।। सर्वेषा
मेव यज्ञानां ध्यानयज्ञः परः स्मृतः । नित्यं शुद्धिः प्रसन्नश्च सर्वदोषविवर्जितः ।।१।। सूक्ष्मः सूक्ष्मः परः सूक्ष्मः सुविशुद्धः समाधिजः । ध्यानयज्ञः परो यज्ञः स्थूलयुक्तु कर्मिणां ।।२।। विमुक्तः साधनैः सूक्ष्मो ध्या
नयज्ञः प्रसाध्यते ।। यस्मात्तस्माद्विमुक्त्यर्थं अपवर्गफलप्रदः ।।३।। असंयोगोपचारेण यो पूजयति शंकरं । ध्यानयज्ञेन सततं स याति परमां गतिं ।।४।। वायवीयसंहितायां । कर्मयज्ञस्तपोयज्ञो जपयज्ञस्तदनंतरः ।।

ध्यानयज्ञो ज्ञानयज्ञः पंचयज्ञाः प्रकीर्तिताः ॥५॥ कर्मयज्ञरताः केचित्तपोयज्ञरताः परे। जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥६॥ ज्ञानयज्ञरताश्चान्ये विशिष्टाः उत्तरोत्तरं। कर्मयज्ञस्तपोयज्ञात् विशिष्टो दशभिर्गु
णैः ॥७॥ जपयज्ञस्तपोयज्ञाद् ध्यानयज्ञः शताधिकः। कर्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥८॥ कामान् कामितपरो भुक्त्वा कामासक्तः पुनर्भवेत्। अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युतः ॥९॥ तपोयज्ञरतो भू
त्वा जायते नात्र संशयः। तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा पुनश्च्युतः ॥१०॥ जपध्यानरतो भूत्वा जायते भुवि मानवः। जपध्यानरतो मर्त्यस्तद्वैशिष्ट्यवशादिह ॥११॥ ज्ञानं लब्ध्वा चिरादेव शिवसायुज्यमा
प्नुयात्। तस्मान्मुक्तैः विरक्तैस्तु कर्मयज्ञोपि देहिनां ॥१२॥ सकामः कामसंयुक्तो बंधायैव भविष्यति। तस्मात्सर्वेषु यज्ञेषु ध्यानयज्ञरतो भवेत् ॥१३॥ ध्यानं ज्ञानं च यस्यास्ति तीर्णस्तेन भवार्णवः। हिंसादोष
विनिर्मुक्तो विशुद्धश्चित्तसाधनः ॥१४॥ ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः। पूजयापि विपुलैराज्यैरग्निकार्यैरसंपदः ॥१५॥ जपेन पापसंशुद्धिर्ज्ञानं ध्यानेन मुच्यते। प्रक्षीणाशेषपापस्य ज्ञाने ध्याने
भवेन्मतिः ॥१६॥ पापोपहतबुद्धीनां तद्वार्तापि सुदुर्लभः। बाह्यैः कर्मरताय छन्नातीवफलभागिनः ॥१७॥ दृश्यानंदं भवेन्नेन दृश्यापि कर्मिणः। ध्यानिनां हि वपुः सूक्ष्मं भवेत्प्रत्यक्षमैश्वरं ॥१८॥ यथेह क
र्मिणां स्थूलं मृत्काष्ठाद्यैः प्रकल्पितं। ध्यानयज्ञपरास्तस्माद्देवान्पाषाणमृण्मयान् ॥१९॥ नात्मस्थं तं प्रपद्येत पश्चाद्देवात्मवेदनात्। सर्वत्रावस्थितं शांतं यो न पश्यति शंकरं ॥२०॥ ज्ञानचक्षुर्विहीनत्वा
दंधः स एवाप्युदितं ॥ अग्नौ क्रियावतामप्सु व्योम्नि सूर्ये मनीषिणां ॥२१॥ काष्ठादिष्वेव मूर्खाणां हृदि लिंगं तु योगिनां। आत्मस्थं यः शिवं त्यक्त्वा बहिरभ्यर्चयेन्नरः। हस्तस्थं फलमुत्सृज्य लिहेत्कूर्परमात्म
नः ॥२२॥ एवं काष्ठानि जर्पासि यज्ञान् कूशात्मकानात्मफलप्रदं ॥ संत्यज्य सर्वाणि हृद्योगमेकं ध्यायेत्परं मुक्तिकरं विशुद्धं ॥२३॥ तस्माद्बहुश्रमस्त्वनीयमनित्यं वाह्यसाधनं ॥ यज्ञाद्यं कर्म संत्यज्य योगम
त्यर्थमभ्यसेत् ॥२४॥ नित्यानि नियतानि कर्माणि विहितानि शरीरिणां ॥ तेषामस्मास्त्यनुष्ठानं मानसाय बहिर्विना ॥२५॥ गच्छन्तिष्ठन्स्वपन्नश्नन् जाग्रन्नुन्मिषन्निमिषन्नपि ॥ शुचिर्वाप्यशुचिर्वा
पि शिवलिंगं सुचिंतयेत् ॥ सोऽपि सर्वत्र विज्ञाता धातुरेवाहपद्धते ॥ यातत्वे निश्चलाचिंतां शैवध्यानं प्रवर्तते ॥२७॥ द्विधा भवति तद्ध्यानं सगुणं निर्गुणं तथा। सगुणं वर्णभेदेन निर्गुणं केवलं विदुः ॥२८॥
अश्वमेधसहस्राणि वाजपेयशतानि च। एतस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीं ॥२९॥ अंतश्चित्तो बहिश्चक्षुरधिष्ठाय सुखासनं ॥ समत्वं च शरीरस्य ध्यानमुद्रेति सिद्धिदा ॥३०॥ बद्धासनो निस्पंदवक्त्र

शै॰ र॰
२५

कायोयोमानसंप्राणासमंनियम्य। उद्धृदत्संकजकर्णिकायांध्यायत्पजेनत्परमेसमुत्कं। ३१। तथैवदहस्यनिस्तोत्रे॥ प्राणायामनिर्वचितानिलगणादुत्तानितानाहृत्तां भोजेष्वंतरनादवद्‌पदरवेवाया
दिहंसाहृते॥ यान्निर्भातिनिर्वातदीपसुभगंज्योतिः षडंगान्वितं। तेनेजोमयमंः स्वत्रयपरंतन्मोमितत्त्वंशिवं। ३२। योगशास्त्रे॥ आराधयामिमणिसन्निभमात्मलिंगं मायापुरे हृदयपंकजसन्निविष्टं॥ श्रद्धान
दीविमलचित्तजलाभिषेकैर्नित्यंसमाधिकुसुमैरपुनर्भवाय। ३३। ज्ञानात्स्यात्तं भवेध्यानात् ज्ञानंभूयः प्रवर्तते। तदुभाभ्यांभवेन्मुक्तिः तस्माध्यानरतोभवेत्। ३४। शिवधर्मशास्त्रे। चिंतयेत्स्वस्पे पूर्वं क्रमाद्वा
धिगुणत्रयं। तमः प्रच्छादयेत्सत्वेनाच्छादयेद्रजः। ३५। ध्यायेत्त्रिमंडलं पूर्वं क्रमशं रक्तं सितं क्रमात्। सत्वोपरि गुणातीतं पुरुषं पंचविंशकं। ३६। ध्यायेतत्वात्मशुद्धं च तस्य क्रमशुद्धं विचिंतयेत्। तेश्वरं पंकजं रव्ये
पुरुषोपरि संस्थितं। ३७। द्वादशांगुलविस्तीर्णं शुद्धं विकसितं सितं। नालमष्टांगुलं तस्य नाभिकंदसमुद्भवं। ३८। पद्मपत्राष्टकं ज्ञेयं अणिमादिगुणाष्टकं। कर्णिकाकेसरंज्ञानं नालवैराग्यमुत्तमं। ३९।
शिवधर्मस्तु तत्कंदमितिपद्मं विचिंतयेत्। ज्ञानैश्वर्यं च वैराग्यं शुद्धं धर्ममयं परं। ४०। ज्ञात्वापद्मासनं सर्वं सर्वदुःखांतमाप्नुयात्। तन्मध्ये कर्णिकामध्ये शुद्धदीपशिखाकृतिं अंगुष्ठमात्रममलं ध्यायेदों
कारमीश्वरं। ४१। कदंबगोलकाकारं नानारूपसमन्वितं। ध्यायेद्वारस्मिजाले न दीप्यमानं समंततः। ४२ ध्यायेद्वासनं शांतं ववपुमारोरूपकं। जयेध्यायेच्चुसततमोंकारं शिवरूपिणं ४३ ध्यानं
निर्मयनाम्प्रासादेवं पश्यनिगूढवत्। नेत्रधारमिवाच्छिन्नं दीर्घघंटानिनादवत्। ४४ अवाच्यं प्रणवस्यांगं यस्तं वेदस वेदवित्। वेदः शिवः शिवोवेदो वेदाध्यायी सदाशिवः ४५ तस्मादेवपरंनित्यं वेदाभ्या
पिनमर्चयेत्। अंगुष्ठोदरमात्रस्तु विशिष्टः पद्मजो मणिः समणिः सर्ववांतसूक्ष्ममहत्स्वर्थ्यासाधकः। ४६। अहिंसाः प्रथमं पुष्पं पुष्पमिंद्रियनिग्रहः सर्वभूतदयापुष्पं क्षमापुष्पं च तत्पंकं। ४७। ध्यानपु
ष्पं तपः पुष्पं ज्ञानपुष्पं तु सप्तमं। सत्यं चैवाष्टमं पुष्पं येभिस्तुष्यति शंकरः। ४८। एवमष्टविधं ज्ञात्वा मानसं शिवमर्चयेत्। यदहंतश्चारागांप्रियाः स्मर्नवहिश्चराः। तथांतर्या ननिरताः प्रियाशंभोर्नेक
र्मिणः। यथांतरूपवारेणनरस्त्री भूप्रसीदति। ४९। तथांतर्यानविधिनाप्रसीदतिमहेश्वरः॥ वायवीयसंहितायां। अंतर्यागरतः पुंसो वाह्यं कुर्वीतवानवा। रतिरयं तरे यस्य नवाह्योपुरप्यगोरवात्। ५०॥
ज्ञानामृतेनतत्तस्य मंत्राच्चविवशात्मनः नांतरं नचवाह्यं हृद्यः कृत्यमस्तिकदाचन। ५१। तस्मात्क्षेमेणसंस्मृत्यवाद्यमभ्यंतरंतथा। ज्ञाने ज्ञेयमात्मो क्ष्यज्ञाने चापियरस्यजेत्। ५२। नैकाग्र्यं चच्छिद्धवेचि

तं किंचिन्नापि कर्मणा ॥५३॥ तस्मात्कर्माणि कृत्वा वाऽकृत्वा वाऽन्तर्बहिः क्रमात् । येन केनाप्युपायेन शिवे चित्तं निवेशयेत् ॥५४॥ शिवे निविष्टचित्तानां प्रतिष्ठितधियां सतां । परत्रेह च सर्वत्र निर्वृतिः परमा भवेत् ॥५५॥
अथवा । बाह्ये वाभ्यन्तरे वापि यत्र स्यान्मनसो रतिः । प्राग्वासनवशादेव तन्निष्ठां समाचरेत् ॥५६॥ बहिर्यागोपचारेण देवं देवीं च पूजयेत् । अथवान्तर्यागहृत्स्थे वा पूजयेत्परमेश्वरं ॥५७॥ अशक्तः शिवपूजायामन्या
देवेव शंकरं ॥ इतः प्रभृति संस्थानं वक्ष्येऽहं नियमादिति ॥५८॥ इति शैवरत्नाकरेऽन्तर्यागप्रकरणो नामाध्यायः ॥१२॥ छः ॥ शिवपूजाक्रमः । बाह्योपासनमनिबाधाबुध्या बुद्धिपूर्वकं । जितकामसंगरागलिबुद्धिपूर्व
कं लब्ध्वा काशस्थिमुपासते ॥ अन्तराराधनपूर्वकं गत्वाप्युपत्यक्षरणमाह । यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोतीति वेदवाक्यप्रमाणेनान्तराराधनाद्दूर्ध्वं जपेज्जपाद्दूर्ध्वं बहिराराधनं करो
तीति वीरमाहेश्वराचार्या निर्णयः । तथा शिवपासोरे ईश्वरः ॥ लिंगार्चनविधिं वक्ष्ये शिवस्य परमात्मनः । सर्वपापक्षयकरं सर्वतीर्थफलप्रदं ॥१॥ समस्तयज्ञफलदं सर्वयज्ञफलप्रदं ॥ समस्तभोगफल
दं साक्षात् मुक्तिप्रदायकं ॥२॥ तस्मात्सर्वप्रयत्नेन शिवे काम्यमानसः । शिवपूजाविधिः कार्यो यदिच्छेच्छिवमात्मनः ॥३॥ स्वगृहे वादिजावासे सरितीरे गृहे वने ॥ मठे तटाके सरोमं रम्ये गृहे गुहा ४
आरामे पर्वताग्रे वा स्थानं मनोहरं ॥ चार्चनस्य स्थानानि प्रशस्तानि चतुर्दश ॥५॥ गृहस्येशानदिग्भागे पूजास्थानमितिस्मृतं । आलये वेदिकान्तत्र पूजार्थं कारयेद्बुधः ॥६॥ चरलिंगार्चने देवपूर्वादिवरतं
मुखं । स्थिरलिंगे यथाकूलं संमुखमासनं तदर्चयेत् ॥७॥ रत्नसौवर्णराजतपीठे वा चंद्रकान्तके ॥ स्फाटिके दारवे वापि स्थापयेल्लिंगमूर्पिणं ॥८॥ आसीनं लिंगे ... मितिनियमं स्मृतिचोदितं ॥ इत्यागमेतिहासा
दिसिद्धं नियमाचारान् ॥९॥ उपचारपरत्वाच्च शिवस्यैतान् प्रकल्पयेत् । गुरोपदिष्टमार्गेण वा यशात्तांगशक्ति संकल्पितासने ॥१०॥ शिवलिंगे विनाभावसंबंधामर्चनं मतं ॥ एकैकानन्तरं कुर्यात्कल्पितावा
मनीयकान् ॥११॥ विनियोगोपचारेण संतुष्यति सदाशिवः । दीक्षितानां द्विजातीनां स्त्रीशूद्राणां तथैव च ॥१२॥ लिंगे स्वगृहणादिते पूज्य नान्यत्र चोदिताः । देवलः प्रास्य ... शीलत्व स्थानादिदुर्जनैः ॥१३॥
स्थानान्युपहतान्यत्र पूजां यत्नेन वर्जयेत् । प्रक्षाल्य चरणौ हस्तौ सपवित्रकरद्वयः ॥१४॥ श्वेतवस्त्रश्चोपवीती सुस्नातः सितवेष्टकः । आचम्य विधिवत्सम्यक् त्रिपुंड्रमथ धारयेत् ॥१५॥ मूर्ध्नि ध्यंगेषु हस्ता संध्या
दुकेष्वेतन्नक्रमात् । देवदक्षिणदिग्भागे शासनं उदङ्मुखः ॥१६॥ ततः प्रसादपीठस्थ प्राणायामं समाचरेत् ॥१६॥ स्नपने चरलिंगस्य पंचाष्टकमितं जलं ॥ गंधप्रसवकेरलमंत्रेनोपान्यमूर्तिना ॥१७॥ स्नानानि नान्यकुं

शै॰र॰
२६

मेषु पंचप्रस्थमितेषु च॥ वस्त्रपूतानि तोयानि समापूर्य विनिक्षिपेत्॥१८॥ गंधपुष्पाक्षतैः सार्द्धं ततद्द्रव्याभिमंत्रतः॥ सामान्यमंत्रसंस्कारं पंचैवेषु तथा चरेत्॥१९॥ अष्टोत्तरशतं मूलमंत्रेणैवाभिमंत्रयेत्॥
तन्मंत्रसलिलं प्रोक्तं पंचमं स्नपने स्थिरं॥२०॥ सामान्यपयसा पात्रेष्ववहार्यं प्रपूर्य च॥ गंधादीनि विनिक्षिप्य तत्र प्रागवन्निमंत्रणं॥२१॥ स्थानद्रव्याणि चास्त्रेण प्रोक्षयेत्तेन वारिणा स्थानद्रव्यविशुद्ध्यास्य
स्य ज्ञानेन कर्मणा॥२२॥ अर्घ्याचमनपाद्यानां पात्राण्यद्भिः प्रपूरयेत्॥ ततः सामान्यपात्रं वत्ततः क्षालनपात्रकं॥२३॥ पूरयित्वेषु पात्रेषु गंधपुष्पाक्षतानूक्षिपेत्॥ पत्रैर्नैवेद्यनिर्माल्यसंकीर्णं कृत्तशाखादिभिः
॥२४॥ स्नानं त्वृद्धिपते भत्त्यानतः स्नाहानिशं करः स्थौडिलेपि वालिंगे च गंधपुष्पाक्षतादिभिः॥२५॥ इष्ट्वेरभ्यर्चयेद्देवं यथाविभवविस्तरं॥ मध्यमानामिकामध्ये पुष्पं संगृह्य पूजकः॥२६॥ अंगुष्ठतर्जन्य
ग्राभ्यां निर्माल्यमपनोदयेत्॥ अशून्यमस्तकं लिंगं सदा कुर्वीत पूजकः॥२७॥ अरिणस्थो महावह्निर्मथने नैवदृश्यते। तथैव लिंगे मंत्रेण दृश्यते परमेश्वरः॥२८॥ ज्योतीरूपं सर्वगतमद्वितीयमनौपमं॥
ध्यात्वोंकारेण तल्लिंगे प्रक्षिपेत्कुसुमांजलिं॥२९॥ पाद्यं वाचमनं चार्घ्यं वस्त्रं यज्ञोपवीतकं॥ गंधाक्षतप्रसूनानि धूपमनुक्रमात्॥३०॥ दत्वाथ मूलमंत्रेण पंचाशत्कृज्जपं जपेत्। सपुष्पं शीर्षं तल्लिंगं ततः
स्नपनमाचरेत्॥३१॥ पयोदध्याज्यमध्विक्षुरसैर्मूलेन पंचभिः॥ ततो गोधूमचूर्णेन पश्चात्कोष्णेन वारिणा॥३२॥ स्नापयेदिक्षिपिष्टैर्वा मसूरचूर्णैरलाभतः। स्नापयेद्गंधाद्भिः पुष्पाद्भिः स्नापयेदथ॥३३॥ स्ना
पयेदथ हेमाद्भिरत्नाद्भिः स्नापयेत्ततः॥ स्नापयेदथ मंत्राद्भिः क्रमेणैव समाचरेत्॥३४॥ सर्वाण्यमूनि स्नानानि मूलेन त्वभिमश्चरेत्॥ एवं संस्नाप्य विधिवद्दत्वाप्याचमनं ततः॥३५॥ तन्मयात्मासने देवं क
ल्पिते संनिवेशयेत्॥ उक्तद्रव्येषु दश सुपल्लवं पात्रपावनं॥३६॥ विनिक्षिप्याथ तद्रूपं सुसंस्कृत्यं निवेदयेत्॥३६॥ प्रपमाभिर्हिते पात्रे स्थापितं दीपसंचयं॥ पूर्वोक्तसाधनोपेतं तत्प्रोक्ष्य समर्पयेत्॥
३७॥ पूर्वोक्तविधिनासिद्धान्नं नानाव्यंजनमस्तरौ॥ घृतमिश्रं च धान्याज्ञेः सहदध्याज्यगुडेन च॥३८॥ सौवर्णे राजते ताम्रे पात्रे कांस्येथवा शुभे॥ दर्शनीयं च पात्रस्थमन्नं निवेद्यं निवेदयेत्॥३९॥ मूलमंत्रे
जपं कुर्याद्दष्टाविंशति संख्यया॥ पानीयं च ततो दद्यात्सुगंधमतिशीतलं॥४०॥ ततश्चाचमनं दद्यात्करवासानुलेपनं॥ दत्वा पात्रे यतांबूलं संनिधाय समर्पयेत्॥४१॥ ततो दद्याद्भूषणानि विकिरीटादि
खिलान्यपि॥ प्रदद्याद्दर्पणं छत्रं तालवृंतं च चामरं॥४२॥ ईश्वरस्य यथा पूर्वमुपचारान् कृतान्हितान्। तथा देव्याः प्रकुर्वीत तन्मंत्रेणैव चाखिलान्॥४३॥ एवं संपूज्य देवेशं कुर्यादावरणार्चने

पंचवक्त्रं षडंगानि गर्भावरणदेवताः ॥४४॥ देवस्य पश्चिमे सद्यं वामं सोम्ये समर्चयेत् ॥ दक्षिणे घोरवक्त्रं च माध्यं तत्पुरुषं यजेत् ॥४५॥ ईशानमीशादिग्भागे यथाविधि समर्चयेत् ॥ अथाग्नेशासुरमरुत्कोणेष्वि हृदेव
वारुणे ४७। चतुष्कं कुसुमांगानि षट्कं क्रमेण समर्चयेत् ॥ गर्भावरणमेवं स्यात्पूजयेद्दिशदक्षः स्तदा ॥४८॥ ईश्वरस्य पुरस्तात्तु ततो नाभाग्निकं चरेत् । मूलमंत्रं जपेत्पश्चाद्दशोत्तरसहस्रकं ॥ अष्टोत्तरशतं वापि
यथाशक्तिप्रसन्नधीः ॥४९॥ सुगंधाक्षतपुष्पाढ्यं जलमादाय पाणिना । तद्दानं देवपादाब्जे प्रेतत्सार्पणं स्मृतं ॥५०॥ चुलुकोदकप्रदानेन प्रीत्यात्तद्भाषितं बुधैः ॥ एवं यः कुरुते भक्त्या तीर्थार्पणस्तेभवार्णवः
५१॥ एवं स्वात्मार्पणं कृत्वा स्तोत्रैर्यद्भक्तितो जपेत् ॥ प्रदक्षिणनमस्कारं यथाशक्त्या प्रसन्नधीः ॥५२॥ कृत्वा तु प्रार्थयेद्देवं मंत्रेणानेन भक्तितः ॥ अपराधसहस्राणि क्रियंतेहर्निशं मया । दासोहमिति मां मत्वा क्षंतव्यं
क्षमस्व भक्तवत्सल ॥५३॥ एवं संप्रार्थ्य विधिवद्देवदेवं महेश्वरं ॥ तस्यायं प्रसवप्रसादं धारयेद्बुधः ॥५४॥ दद्याच्च चरणांभोजे भक्त्या पुष्पांजलित्रयं ॥ आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनादिकं ॥५५॥ अन्यस्य कारये
द्यस्तु निष्फलत्वमवाप्नुयात् ॥ लिंगे मंत्रेण यद्वस्त्रं तल्लेहमविनेनराननात् ॥५६॥ समर्प्योपगतं द्रव्यं निर्माल्यमिति कीर्तितं । संपूज्याथ शिवं भक्त्या गुरुपंक्तिं समर्चयेत् । ५६। समर्प्योपगतं द्रव्यं निर्माल्यमिति
कीर्तितं । संपूज्याथ शिवं भक्त्या गुरुपंक्तिं समर्चयेत् ॥ स्वगुरुं परमगुरुं परमाचार्यसंज्ञितं ॥५७॥ प्रारंभावसाने तु प्रतिकर्म पुनः पुनः ॥ जलं सालनपात्रस्थं स्पृष्ट्वाचमनं समाचरेत् ।५८। प्रारंभावसाने तु
तं सर्वे मौनेन कारयेत् ॥ भाषणं भाविचेत्तत्र वदेत्संस्कृतया गिरा ॥५९॥ अर्चनारोपवनिकां दत्वेशार्चनमाचरेत् ॥ दत्वा देवाय तांबूलं दत्वा पवनिकां हरेत् ॥६०॥ कदाचिदपि लिंगस्य नोपरि भ्रामयत्करं ॥ लिंगेह
स्तमवष्टभ्य नासिकारोधकस्तथा ॥ अन्योन्यपूजां द्वारेणमत्वा मे वापि संकटे ॥ पुष्पप्रदानमात्रं वा कुर्याद्भावपुरःसरं ॥६२॥ एककालं द्विकालं वा त्रिकालं सर्वदापि वा । भक्त्या अहरहः कुर्यान्नियमेनेश्वरार्च
नं ॥६३॥ सर्वपापविनिर्मुक्तः सर्वपुण्यफलान्वितः । भोगानिहाखिलान्भुक्त्वा प्राप्नोत्यंते सदाशिवं ।६४॥ अथ मंत्रपरो धर्माचारेण सहितो भवेत् । अनभ्यर्च्य न भुंजीत देवमाप्राणसंचरात् ।६५। अज्ञानाद
थवालस्यात्त्वकृतेनीश्वरार्चने ॥ तिर्यग्योनिशतं गत्वा संसारे वर्तते चिरं ॥६६॥ पिवरहस्ये । वीरशैवाभिषिक्तानां भक्तानां महेशस्य हि । गर्भावरणमीशस्य मुच्यते सत्सुरूपताः ॥६७॥ अनादिशैवमार्गेण
दीक्षितः परमं शिवं ॥ ईशानाद्यस्त्रपर्यंतमेकावरणमर्चयेत् ।६८॥ प्रथमं सिंहासनं च पद्मासनं द्वितीयकं ॥ विमलासनं तृतीयं स्यादासनत्रयमाचरेत् ॥६९॥ पंचवक्त्रं शिवांगेश्च पूजयेत्पूर्ववत्ततः ॥ एकाव

शै॰र॰

२७

रणामेवोक्तं पूजयेद्दीक्षितस्तथा॥७०॥स्वगृहे पूजयेन्नित्यं गंधपुष्पाक्षतादिना॥सर्वर्तेत्र मार्गेणैक्तनियमो नियतेंद्रियः।७१।अप्रमत्तः शिवाचारो लिंगाराधनको भवेत्।एकान्ते मन्त्रगदाधारी लिंगे विश्वात्मके पुनः॥७२
स्वर्गादिश्चिन्हैः संसारैर्विमुक्त्वमुपपद्यते॥अविधानधालिंगं च कृतसंस्कारसंयुतं॥७३॥यः पूजयति वै यस्मात् हृल्लिंगार्चकः स्मृतः॥स्कंदे। उमामहेश्वरसंवादे॥ साधु साधु महाभागे भक्तानां भक्तिवत्सले॥ शृणु दे
विप्रवक्ष्यामि लिंगार्चनविनिर्णयं।७४।मृत्स्यं मिश्रं तु संकीर्णं त्रिविधं लिंगपूजनं। मृद्वन्तु लिंगगतस्त्वातं मिश्रं चैव सदाशिवं॥७५।संकीर्णं प्रतिमाकारं लिंगत्रयमिदं शृणुः। योर्चयामर्चयेद्दुंपूर्णं वर्षश
तं नरः॥७६॥ एवं च दिवसं लिंगे सममेतन्न संशयः। अन्यार्चनेन तुष्यामि नयादेविनगात्मजे॥७७॥लिंगेर्चिते यथा स्वर्थं परितुष्यामि पार्वति। यज्ञरूपं प्रतिमार्चायां युगकोटिशतेरपि॥७८॥तस्मात्
मतेदेवि लिंगेनु घटिकार्धकं लिंगं पूजयंते नित्यं सर्वदेवनमस्कृतं।७९। पूजये न तु लिंगे न सर्वे देवाः प्रपूजिताः। स्थावरे जंगमे वापि भूग्रामे च चतुर्विधे॥स्वर्गे प्ययच पाताले त्रैलोक्ये सचराचरे। नास्ति लिंगात्स
रं दैवं मूढात्मा स्वयं निचा न्यथा।८१।ग्रामे वा परि वारण्ये जले वापि स्थले पि वा। यत्र वा रमते लिंगं सर्व तीर्थानि तत्र वै॥८२॥चंडालश्वपचागारे लिंगं तिष्ठेन्महत्तरं। तन्नामं शिवलोकं स्यात् तद्गृहं शिवमंदिरं॥८३॥
लिंगमध्ये महादेव साक्षाद्देव अवस्थितः। अनुग्रहाय लोकानां तस्माल्लिंगं प्रपूजयेत्॥८४। देवदानवगंधर्वसिद्धकिंनरगुह्यकाः। लिंगमेकं परं नास्ति तस्माल्लिंगं प्रपूजयेत्।८५।ऋषयो योगिनो विप्रा ज्ञानिनो वृ
त्तवादिनः॥पूजयंति सदा कालमीशानं सुरनायकं।८६। सदा पूजति पद्मे न सदा दानं प्रयच्छति। सदा वे वायुभक्षः स्यात्सकृल्लिंगार्च्चयेच्छिवं॥८७॥अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः॥शिवलिंगार्च
नस्यैते कोट्यंशेनापि नो समाः॥८८॥यानि कानि च तीर्थानि आसमुद्रान्सरांसि च।स्नानात्फलमवाप्नोति सकृल्लिंगार्चयेच्छिवं॥८९॥प्रयागसंगमे चैव गंगासागरसंगमे। तत्फलं संभवत्येव यत्सुलिंगार्चनेरतः
९०॥धर्मोदेशपरस्यामो लोको गोत्रं गृहं वनं तत्। यत्र त्वं देव देवेश पूज्यसे सुकृतात्मभिः॥९१॥ तत्र देशे दुर्भिक्षं न च मारि प्रवर्तनं। न काले म्रियते राजा एत्यमेते पत्रशंकरः॥९२॥जन्मकोटिसहस्राणि सुकृतं ज्ञा
नयोनिजः। सकृदभ्यर्चनाल्लिंगे मुक्तः संसारबंधनात्॥ सकृल्लिंगार्चनेन गर्भजन्म न विद्यते॥९३॥सततं चार्चयेद्यस्तु स याति परमां गतिं॥ सकृत्पूजयते लिंगं वर्षकोटिशतत्रयं।९४। कैलासशिखरे रम्ये मातृज्ञाः
पितृज्ञाः स्थिताः। अर्चयंति सदा हृद्यं तेन मुक्ति मानुषाः।९५। तद्लोकान्स्यारभ्यास्ते तु नात्र संशयः। मेरुमंदरमात्रोपिराशिः पापस्य कर्मणः।९६। ईश्वरं येन मासाय नश्यंते कुष्ठरोगवत्।९७॥ब्रह्मा

दिशत्वं पर्यंतं शिवयोगमुदाहृतं॥ लिंगार्चनविहीनानां कुतो मोक्षः कुतो दिवं॥ ९७॥ स्मशानं तदहं घोरं सदेशः प्रेतभूमिकाः। म्लेंछाः सर्वेपि ते लोकाः शिवो यत्र न पूज्यते। ९८। श्वपचोपि मुनिश्रेष्ठो ब्रा
ह्मणाः श्वपचाधमः॥ संसारदुःखकांतारे निमग्नस्यास्य तत्पदः। ९९। वक्रवक्त्रमिवे देवि लिंगार्चनविवर्जितः। किंतेन ज्ञानमात्रेण भूभारेणात्र शत्रुणाः। १००। अपूज्यापि त्वा चेशानं तु यो भुंक्ते नराधमः॥
पापानामन्नरूपाणां तस्य भोज्यं न मुच्यते॥ १०१॥ नास्ति लिंगार्चनं यस्य म्लेंछयोनिषु जायते। लिंगार्चनमुखं पापिनं दुःखं गरगमुख्यतां॥ २॥ तस्मात्सर्वं परित्यज्य शिवेकाग्रेन मानसः। शिवपूजाविधिः
कार्यो यदिच्छेत्सिद्धिमात्मनः। ३। दुर्लभं प्राप्य मानुष्यं योर्चयंति शिवं नाकिनां तेषां वै सफलं जन्म कृतार्थास्ते नरोत्तमाः ४ भवभक्तिपरा ये च भवप्रणतचेतसः। भवं संस्मरिणो ये च न ते दुःखविभागिनः। ५।
भवज्ञानि मनोज्ञानि विभ्रमाभरणानि च। पाः। धनं चा तारोम्य पर्यंतं शिवपूजाविधेः फलं। ६। ये वांछंति महाभोगान्राज्यं च त्रिदशालये। तेर्चयंति सदाकालं शिवस्य चरणांबुजं। ७। सौभाग्यं कांतिमद्रूपं सत्वं
त्यागः प्रभावतः। शौर्यं च जगति ख्यातिः शिवमर्चयतो भवेत्॥ १०८। अपारसंकल्पमत्स्या पूज्य ध्वंसराशिवं। निकृष्टास्वर्गस्यं ते कृतांतनरकमाः। १०९। त्वरितं जीवितं याति त्वरितं याति यौवनं त्वरितं व्याधि
रभ्येति तस्मात्पूज्यं पिनाकधृक्॥ १०॥ यावन्नायाति मरणं यावन्नाक्रमते जरा। यावन्नेंद्रियवैकल्यं तावत्पूजय शंकरं। ११। न विशिवार्चनसाम्योस्ति धर्मोन्यो भुवनत्रये॥ इति विज्ञाय यत्नेन पूजनीयः सदा
शिवः॥ १२॥ सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः। असारे दग्धसंसारे सारं यच्छंभुपूजनं॥ १३॥ वृक्षस्य मूलसेकेन शाखाः पुष्यंति वै यथा। शिवस्य पूजया तद्वत्पुष्यंति च वपुर्जगत्। १४। क्रोधाल्लो
भाद्भयान्मोहाद्दंभेन कपटेन वा। एतत्केनप्रकारेण यस्यः पूजयते शिवं॥ १५। शिवधर्मे शास्त्रे॥ यथा भुः सर्वभूतानां स्थानं साधारणं स्मृतं। तथा च शिवभक्तानां साम्यं शिवपुरं स्मृतं॥ १६॥ यथेह सर्व
भूतानां भोगेच्छा तीव्रयास्मृताः॥ नानापुण्यविशेषेण भोगाः शिवपुरे तथा॥ १७॥ तदर्चयंति ते तद्दुःसहदुष्टकर्मणा। तेषां पिशाचलोकेषु भोगानि व्यान्यप्रयच्छति॥ १८॥ ये पूजयंति ये तद्दुःकूराः
क्रुद्धविलोचनाः। रक्षेलोके शिवस्तेषां महाभोगं प्रयच्छति १९ त्रिस्वयंति ये तद्दुःमयमांसप्रिया नराः। यक्षलोके शिवस्तेषां महाभोगान्प्रयच्छति। २०। ये गीतनृत्यं कुर्वंति चित्रे चतुर्वीयदप्यथा। शिवाग्रतस्तु तेषां
ते गंधर्वभवनंगताः॥ २१॥ लोकेख्यातिं समुद्दिश्य यं चार्चयंति यः शिवं। तस्मैं तद्भवने तद्दुःकामान्दिव्यान्प्रयच्छति। २२। कामासक्तेन चित्तेन यः समर्चयते शिवं। सोमस्थाने शिवस्तस्य दिव्यान्भोगान्प्रयच्छति

२३॥ सततं कृत्वोपजंतेये गंधपुष्पाक्षतादिभिः॥ क्रमात् प्राज्ञायमस्मै शिवलिंगं लोके भोगान्प्रपश्यन्ति॥२४॥ अथ कृत्वोपजंतेन्योगाय आवेदपारगाः॥ सद्भाविताः शिवलिंगं वृक्षलोकं प्रपश्यन्ति॥२५॥
नवार्चयंति ये तद्वत्सम्यगाश्रिताः॥ तेयांति विष्णुभुवनं दिव्यैर्भोगैरमंतिच॥२६॥ ज्ञेयं विष्णुपदादूर्ध्वं दिव्यं शिवपुरं महत्॥ तद्भोगस्थानमतुलं कर्मयागरतात्मनां॥२७॥ तत्राब्धगुणमैश्वर्यं या
र्थिवं विधिशिनाशिनां॥ तत्सायुज्यगतानां च तरणं तत्समं स्मृतं॥२८॥ स्त्रियोपि लिंगमाराध्य भक्तिभावेन भाविताः॥ विमानस्थमभोगाद्यैर्विशेषैरनुभुंजते॥२९॥ प्राप्नुवंति रहस्यकामानि मनसा चिंतितानि
तु॥ कामासक्ता श्च ये देवि लिंगाराधनभाविताः॥३०॥ ७॥ अथ स्पर्शनस्पर्शनमाहात्म्यं॥ उमामहेश्वरसंवादे॥ रहस्यं पापहरं देवि स्पर्शं शिवपुरं नयेत्॥ आर्चितं भक्तिभावेन स्पृष्ट्वा मोक्षं न संशयः॥१॥
कायशुद्धात्मशुद्धिश्च अंगन्यासकरस्य च॥ सर्वशुद्धिर्भवेल्लिंगं लिंगस्पर्शनदर्शनात्॥२॥ शतकांचनरत्नानां गवां कोटिशतेरपि॥ पंचकोटिरत्नांगानां तत्फलं लिंगदर्शने॥३॥ वृक्षघोवासुरायो वा लयोवाग
तत्स्यगः॥ अथ नमस्कारविधिः॥ उरसा शिरसा दृष्ट्या मनसा श्रद्धयागिरा॥ पद्भ्यां शुभाभ्यां बाहुभ्यां प्रणामोष्टांग उच्यते॥४॥ मातृहापितृहा चैव वीरहा भ्रूणहापि वा॥ अमंत्रो वा शिवस्य सर्वपापैः प्र
मुच्यते॥५॥ उत्तमांगांशं शरीरस्य सर्वस्पर्शं यथाविधिः॥ दंडवत्पतनं यत्स्याद्दंडप्रणाम इत्युच्यते॥६॥ अवलम्ब्यावनिं मालं करौ जानुयदा गतैः॥ प्रणामः क्रियते योसौ मध्यप्रणाम इरितः॥७॥ पंचांगुष्ठस्य
लोकृत्वा बाहू ऊर्ध्वं संज्ञितौ॥ शिरस्यारोपणं यद्वत् करं संपुटकाह्वयः॥ एवं त्रिधा नमस्कारः कथितः कमलासन॥८॥ श्रेष्ठो मध्यः कनिष्ठश्च सम्यगुक्ता क्रमात्॥ ईश्वरस्याग्रतः श्रेष्ठो नमस्कार उदाहृ
तः॥९॥ मात्रादीनां नमस्कारो मध्यमः परिकीर्तितः॥ इतरेषां नमस्कारः कनिष्ठः संप्रकीर्तितः॥१०॥ एवं नमस्कारविधिप्रत्येकमुदितः क्रमात्॥ सर्वेषामीश्वराणां कनिष्ठः संकटस्थले॥११॥ नमस्का
रः प्रकर्तव्यस्तदनुग्रहकारकः॥ सर्वेषामुपचाराणां प्रणामोत्यंतमुत्तमः॥१२॥ तं विनान्योउपचारायेकृतास्तेनिष्फलायदि॥ तस्मात्प्रणामं कुर्वीत सततं गुरवे बुधः॥१३॥ दंडप्रणामं यः कुर्यात्सोपि
यातिपरांगतिं॥ सोश्वमेधसहस्रस्य फलं लब्ध्वा सुखी भवेत्॥१४॥ पशवः पशुपतस्य दंडवत्पतिता भुवि॥ पतंतिपातकाः सर्वे नोत्तिष्ठंति पुनः सह॥१५॥ सर्वावस्थां गतोवापि पुण्यो वा सर्वपातकैः॥ शि
वं दृष्ट्वा नमस्कुर्यात्सोपि यातिपरांगतिं॥१६॥ स्वगृहं वा महेशं वा प्रणामेदेकपाणिना॥ पार्वपूर्वार्जितं पुण्यं तस्याशेषं विनश्यति॥१७॥ तात्पर्यसंग्रहे॥ वज्रिणापात्रदुपाशांकुपमिन्यास्पर्शे येद्विधिं॥ शंकिस्याके

शर्वं तद् दृष्ट्वा शिरस्यञ्जलिमुद्यम्य देवत्वे देवविषयाणि नमांसि पुंसां तस्मै नमः स्तुतिवल्लादवधारयामः॥ देवान्तरेषु विहितान्यमूनि स्तोत्राणि सामान्यवत्स्वपि संपतन्ति॥ यदेयदीनं रम्यत्तं करोति च लतनवर्जितो॥ स्तुतिर्वा चाल्दिध्यानं चतुरंगं प्रदक्षिणं। परिक्रमस्त्रिधा स्याद्धि स्थितिसंहारभेदतः॥ प्रदक्षिणं प्रवामं तदुभयं च यथाक्रमं यथाक्रमम्॥ २०॥ प्रत्यक्षं दक्षिणं पार्श्वं गमने परितो भवेत्॥ यस्य यस्य च यच्छ्रेष्ठैः प्रदक्षिणमिति स्मृतं॥ २१॥ परिक्रमेण वामं यत् पार्श्वं प्रत्यक्षं यस्य कस्य च॥ प्रवाममगमं तन्मोक्षमल्पार्थे निपतामभिः॥ २२॥ प्रदक्षिणं सृष्टिमार्गः प्रवामं संहृतिः क्रमात्॥ प्रदक्षिणं प्रवामं तत्तद्व्याख्यानं स्थितिक्रमः॥ २३॥ प्रदक्षिणं प्रवामं च प्रवदन्त्याश्रमस्थयोः॥ उभयः प्रक्रमः प्रोक्तो गृहस्थस्यैव सर्वदा॥ २४॥ पूर्वं पदाभ्यां तस्माद् गं प्राणिपत्यततः ततः॥ दण्डप्रणाम्यापरितः प्रक्रमस्त्रिविधः स्मृतः॥ २५॥ पूर्वप्रकाराद्युवादेवयाभ्यं शिवोपयात्। भूमौ लुठित्वा गमनं तत्स्यादङ्गपरिक्रमः॥ २६॥ स्वस्वाश्रमोक्तमार्गेण प्रकर्तव्यः फलेप्सुभिः। परिक्रमोऽयं कर्तव्यो नियमेनानुवासरं॥ २७॥ संख्यासमन्वितः सोऽयं नित्यः स्यात् सम्मे धीयते॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥ २८॥ वैधृतौ च व्यतीपाते विषुवायनयोरपि। चन्द्रसूर्यग्रहणयोः स्वजन्मनक्षत्रे विशेषतः॥ २९॥ परिक्रमोऽयं कर्तव्यः स नैमित्तिक उच्यते॥ महारोगभयोत्पाते उत्कटे स्वप्नदर्शने॥ ३०॥ परिक्रमोऽयं कर्तव्यः स च नैमित्तिकः स्मृतः॥ परिक्रमेषु सर्वेषु सोमसूत्रं न लंघयेत्॥ ३१॥ लंघनात् सोमसूत्रस्य नरके पतनं ध्रुवं॥ यावन्नासादविस्तारं तावद्दूर्ध्वं प्रणालिकं॥ ३२॥ उदकस्थलं प्रणाम्यादि सोमसूत्रमिति स्मृतं। प्रथमं द्वारमारभ्य द्वारावधि परिक्रमेत्॥ ३३॥ प्रदक्षिणं कृतो धीमान्नत्वदेर्यपदं न्यसेत्॥ नागच्छेत्त्वरितं जल्पन्नेतरैर्मानुषैः सह॥ ३४॥ छायां न लंघयेदन्तः शिवधाम्नः सुबुद्धिमान्॥ प्रजपन् शिवसूक्तानि ऋग्यजुःसामजान्यपि च॥ ३५॥ स्तोत्राणि वा पुराणोक्तविद्धीत परिक्रमं॥ प्रदक्षिणात्रयं कृत्वा नमस्कारैरथायं चमेः॥ ३६॥ पुनः प्रदक्षिणं कृत्वा शिवलोके महीयते॥ शैवं पाशुपतं सोमं लाकुलं च चतुर्विधं॥ ३७॥ शैवमेदमिति ज्ञात्वा संकरं न समाचरेत्॥ तत्र संकरदोषेण राजा राष्ट्रं च नश्यति॥ ३८॥ ममदेवार्चनं दृष्टमस्येहोति जनैः सह॥ आवासदर्शये ये से से पूजाविक्रयिकः स्मृतः॥ ३९॥ धनिनां पुरतो भुक्त्यै पूजादिकं समाचरन्॥ स पापात्मा शिवद्रोही पतत्येवोग्रदुर्गतौ॥ ४०॥ यो यथा भक्तिसंयुक्तः परिचर्यां शिवस्य तु॥ आचारैर्द्विजनैः सर्वा शिवभक्तानमानिशं॥ ४१॥ अभ्यर्चनप्रतिज्ञानं वनमूलमिस्माद्यानां स्वपसंग्रहे॥ पञ्चोपपत्नमन्त्रसानद्यासंकानां पुंसाममोघमशनं भगवन् वृणाम्॥ मन्त्रोपमन्तरितेनः प्रतिभाति मूलं प्राप्नुकमर्चनविधेरनुवासरं ते॥ ४२॥ शिवधर्मशास्त्रे॥ वरं प्राणपरित्यागश्छेदनं शिरसोऽपि वा॥ न त्वानभ्यर्च्य भुञ्जीत भगवन्तं त्रिलोचनं॥ ४३॥ एवं निर्वहते यस्तु यावज्जीवं प्रतिज्ञया॥ मनुष्यचर्मणा वद्धः स रुद्रो नात्र संशयः॥ ४४॥ अथ महास्यन्तिये मूढानि दन्ति च

शिवार्चनं। शतजन्मार्जितं पुण्यं भस्मीभवति तत्क्षणात्॥४५॥ तेन या सप्तजन्मानि दासीगर्भेषु जायते॥ कुक्षौ तु सप्तजन्मानि सप्तजन्मान्यपुत्रयो भवेत्॥४६॥ आजन्मसंचितं धर्ममिष्टापूर्तं सदक्षिणं॥ शिव
लिंगमात्रेण सर्वं भवति निष्फलं॥४७॥ अपहास्येन दारिद्र्यं जायते नात्र संशयः। शिवस्य पुरतो नृत्यं गीतवाद्यं करोति यः॥४८॥ ते निंदंति ये मूढात्मा नरकगामिनः। संपर्कात्कोनुकास्त्रो माद्वया
द्वापि च यं स्मरेत्॥ कीर्तयेदर्चयेदुर्दं सोप्यवश्यं गणो भवेत्॥४९॥ इति शैवरत्नाकरे शिवपूजाक्रमं नाम त्रयोदशोध्यायः॥१३॥ लिंगधारणं। व्यासजैमिनिसंवादे जैमिनिरुवाच॥ व्यासं सर्वाग
मावासंभूतिं मुनिगणावृतं॥ नीलोत्पलदलश्यामं नीलकंठमिवापरं॥१॥ कृतपूर्वाणि ह्याचारं कृतासनपरिग्रहम्। प्रसन्नं प्रांजलिः प्राह प्रणम्य कलिजैमिनिः॥२॥ धन्यस्त्वं तन्मभावेन वन्तुम
हसि मे गुरो। को देवः परः पूज्यः पूजा तस्य च किं वद॥३॥ ध्यानं च कीदृशं तस्य किंरूपं जपनं मुने॥ व्यास उवाच॥ सुरासुरेंद्रसन्मौलिनिर्माल्यचरणांबुजं॥ गंगाधरं प्रणम्याहं कलानिधिकलाधरं॥४॥ इति
हासेषु देवेषु पुराणेषु पुरातनैः॥ महर्षिभिर्महादेवो महनीयः प्रतिष्ठितः॥५॥ पूजा तस्य च देवस्य मयासंक्षिप्यते धुना॥ रत्नासौवर्णराजतापीठे वा चंद्रकांतके॥ स्फाटिके दारवे वापि स्थापयल्लिंगरूपिणं
उपचारपरत्वाच्च शिवस्यैतान्प्रकल्पयेत्। उपचारान्समर्थ्यापरत्वात्तत्वाच धारयेत्॥७॥ तथागस्त्यादिमुनयो दूर्वासो नंदिकेश्वरः॥ महाकालो दधीचिश्च पाणिनिश्च करणादकः॥ स्कंदो भृंगिरिटी वी
रभद्रस्तु प्रमथादयः॥ अजो हरिः सहस्राक्षो वाणासुरदशाननौ॥८ वसिष्ठश्च तथा लक्ष्मीर्भिक्षुर्भरद्वाजो त्रिगौतमाः॥ एते परमेशो वाश्च भजंति परया मुदा॥ प्रसादसेवनात्स्थानादर्चनाद्धारणादपि॥ ज्ञानादर्श
नकतीरः श्रावयं निजगत्रयं॥९॥ धारयेद्यस्तु हस्ते तं लिंगाकारं शिवं सदा। तस्य हस्तस्थितं विद्धि मत्परं संपदां पदं॥१०॥ अपवर्गस्पृशीशानं गत्वेभक्तिपरायणाः॥ ईश्वरेणाविनाभावसंबंधं कर्तुमात्मनः॥११॥
मूर्ध्नि वा धारयेल्लिंगं न कदाचिद्वियोजयेत्॥ ईशानं नित्यसंयोगपरया निजनिष्ठया॥१२॥ वक्षे वा धारयेल्लिंगं मंत्रभावं विभावयेत्॥ तस्मिन्सन्निहिते किंचिन्नोच्छिष्टमिति निश्चितं॥१३॥ वृत्तविष्णुसुरे
शादिदेवताः परया मुदा॥ प्राणेभ्योपि धारयंत्येते प्राणलिंगं महर्निशं १४ अस्मादादयः सर्वाः शक्तयः परया मुदा॥ धारयंत्यलिकाग्रेषु शिवलिंगं च सादरं॥१५॥ विनिर्मिते तथा गात्रे विवरे लोहपात्रके॥ शिव
लिंगं विनिक्षिप्य पूजयंति च राक्षसाः॥१६॥ कंठेषु हारकंठादिमुनयो मनवस्तथा। सर्वे हि शिवलिंगं तु धारयंति यजंति च॥ शिवरहस्ये॥ गच्छन्तिष्ठन्स्वपन्जाग्रद्भुंजन्निमिषन्नपि। शुचिर्वाप्यशुचिर्वा
पि लिंगं सर्वत्र धारयेत्॥१७॥ संध्या स्नानं जपो होमः स्वाध्यायः पितृतर्पणं॥ व्यर्थं भवति तत्सर्वं तल्लिंगं न तु धारयेत्॥१८॥ अथ माधमयुक्तानां पापिनां चाभिचारिणां॥ यमलोको न विघ्नेन सदा वै लिंगधारि

रणां ॥१९॥ यथाग्न्यग्निसमावेशान्नान्यो भवति केवलं। तथैव मम सान्निध्यात्तेन प्रकृतिमानुषाः ॥२०॥ उत्तमांगे गले कक्षे तथा वक्षःस्थलेपि वा। तथा हस्तस्थले वापि प्राणलिंगं धरेत्सुधीः ॥२१॥ ग्रैवां
तरे ॥ उत्तमांगस्ले कक्षे सर्वदा धारयेच्छिवं ॥ मूत्राद्युत्सर्जने याने भोजनेपि सदा शुचिः ॥२२॥ नाभौ वक्षःस्थले वापि सर्वावस्थासु सर्वदा। श्रीलिंगधारणं कुर्याद्देवी नित्यं मम प्रियं।२३। नाभेरधो लिंगधारी पाप
नाम्नास्य पुज्यते॥ नाभ्यूर्ध्वं लिंगधारी च सौभाग्यज्ञानवर्धनः ॥२४॥ कायसंबंधो लिंगे ताहि तस्यास्ति शाश्वतं। निमिषार्धं वियोगे तु विशेषान्मातृको भवेत् ॥२५॥ सम्यक् हीनाति लोकानां सान्निध्यं न च कार
येत्॥ यः कुर्यात्स शिवद्रोही गुरुद्रोही विशेषतः। अवैदिका पाशेवापरहस्यं तदिदं मुने॥ न वक्तव्यं न वक्तव्यमिति शंकरभाषितं।२७। तस्मात्सर्वप्रयत्नेन गोपनीयमिदं त्वया॥ वैदिकापचशेवापवलंबस्थ
लिंगशालिने ॥२८॥ शिवरहस्ये अंगप्रतिष्ठितं लिंगमंगलिंगसमुद्भवं ॥ तस्य सर्वत्र भोक्तव्यं कदापि स्वयमर्चनं ॥२९॥ स्वयं च मज्जनं कृत्वा स्वयमेवार्चनं सदा। स्वयमेवार्पयेद्भक्ष्यं स्वयमेव जपेत्सदा ॥३०
अतः परं गुरोर्लिंगात् स्वलिंगं न पूजयेत्॥ अन्यलिंगप्रसादेन गणत्वं न प्रयुज्यते। ३१। बहुलिंगार्चने चैव बहुभावं गुरोस्तथा। बहुप्रसादं कुर्वन्ति वेश्यापुत्रा यथैव ते ॥ ३२॥ शिवपूजापरो भूत्वा योन्य
देवं स्मरेत्सकृत्॥ अष्टाविंशतिकोटिश्च नरकान्याति सो ध्रुवं ॥३४॥ शिवपूजापरो भूत्वा पूर्वकर्माणि वर्जयेत्॥ अथवा पूर्वकर्मेष्यात्सा पूजा निष्फला भवेत्। ३३। लिंगार्चनैकशरणो योन्यदेवं तु पश्यति
नरकं तापदं गत्वा मुनिगर्भे तु जायते ॥३५॥ लिंगार्चनरता नारी सनिकान्तरजस्वला॥ विराग्निर्यथा वापस्त कृत्वोपि गणां शुचिः ॥३६॥ स्त्री वा यद्युरुषः षंडश्चांडालो द्विजवंशजः ॥ न जाति भेदो लिंगार्चे
सर्वे रुद्रसमाः स्मृताः ॥३७॥ पूजान्तो यो न कर्तव्यः सूतके मृतकेपि वा। जलबुद्बुदवद्देहं तस्मान्नित्यं शिवं यजेत् ॥३८॥ सांगैर्द्रुमैः स्वर्णिकाद्यं गंधपुष्पाक्षतादिभिः ॥ अन्योन्यकर्मात्रेण पूजासंपूर्णतामि
यात्। ३९। अंगलोपकृतो लोपस्तस्मादेह न विद्यते ॥ तस्मादेकमनो भूत्वा यावज्जीवं प्रतिज्ञया ॥४०॥ अर्चयित्वा महादेवमायन्तोपि सदा बुधः ॥ लिंगार्चनस्य काले तु प्रष्टव्यं परमं मतं।४१। पापी कोयी
पापीश्रेष्ठो नास्तिको वेददूषकः ॥ दुर्जनश्चैव दुराचारो दुःशीलश्चाप्यसेसितः ॥४२॥ प्रमाददर्शनं कुर्यात्सा पूजा निष्फला भवेत्॥ इति शैवरत्नाकरे लिंगधारणं नाम चतुर्दशोध्यायः ॥१४॥ पाद्मे स्कंदमाहा
त्म्ये ॥ बोधायनशाखायां ॥ अथातो महादेवस्य पादोदकविधिं व्याख्यास्यामः ॥ श्रीरुद्रगणपवित्रेण शतधारेण सहस्रधारेण च्छिद्रश्रमनं तत्प्रयोगेन तमविघ्नदम स्मरमद्भुतं परं पवित्रं भगवंतमेवं स्तापयित्वा सबो

वैनद्वेति द्वाभ्यां कृतं संसंपरं बुद्धवा प्राशयेत्॥ १॥ जाबालशाखायां॥ भगवंतः पादौ प्रक्षाल्य शंखं प्रपूर्य गंधपुष्पाक्षतादिभिरभ्यर्च्य चरणं निवेद्य संमे गंगेत्यभिमंत्र्य बद्धुराये(?)ति मत्वा तत्प्रायेति संमार्जनं कृत्वा कृतं संसंपरं बुद्ध्वेति प्राशयेत्॥ एवं कुर्यात्स कुलजान् दश पूर्वान् दश परान् आत्मानं च तारयेत्॥ २॥ कृतदेवे(?) नैमिशे च भूमिभागश्च ये ममाः(?)॥ सर्वतीर्थोदस्येते कलां नार्हंति षोडशीं॥ ३॥ अकालमृत्युमथनं सर्वव्याधिविनाशनं॥ सर्वदुरितोपशमनं शंभोः पादोदकं शुभं॥ ४॥ सर्वमंगलमांगल्यं सर्वपावनपावनं॥ सर्वतीर्थफलं सद्यः प्राप्यते मूर्ध्नि धारणात्॥ ५॥ सर्वोत्पातप्रशमनं सर्वरोगप्रभेदनं॥ दुष्टग्रहोपशमनमिष्टसिद्धिप्रदायकं॥ ६॥ अगम्यागमनं चैव यापाचाराश्च येऽधमाः॥ तेऽपि पूता भवंत्याशु सद्यः पादांबुधारणात्॥ ७॥ अशौचे नैव विधे(?)त स्रुतकैप्रेतकेतथा(?)। गृहे पोष्यप्रसूतास्त्री संभोगात्स्पृश्यमेव च॥ दूषितस्यापि पात्रं तु विभ्रष्टशुद्धिमवाप्नुयात्॥ ८॥ पादोदकं पुरारेः पापजालहरं परं। पारिगा(?)मुक्तिमिरादायपपुः(?) कामं गतो भवः(?)॥ ९॥ शंभोः पादोदकं पीत्वा पश्चाद् शुचि शंकरा(?)या। पश्चादाचमति मोहे तन्न विंध्यात् ब्रह्मघातकं॥ १०॥ आदित्यपुराणे। पादौ प्रक्षाल्य देवस्य करभ्यां कमले स्थले(?)॥ अभ्युक्ष्य चासनो मूर्ध्नि ऋत्विजे गणेश्वरा(?)॥ ११॥ रामायणे॥ प्रमथः पूर्ववैः पीतं सुरमुनैः(?) शिरोधृतं॥ श्रद्धं नत्वत्पादतीर्थं(?) त्वमीकृपमवेतच॥ १२॥ तत्र देवर्षिगंधर्वा वसुधातलवासिनः॥ भवांगपतितं तोयं पवित्रमिति पस्पर्शिरे(?)॥ १३॥ तथा चैव घ्राणाख्ये(?) निर्माल्यसलिलं प्राश्य देवदेवस्य शूलिनः। स्पपकुष्ठज्वरव्याधेर्मुच्यते कल्बिषेरपि॥ १४॥ अभिषिक्तजलं प्रातःपवेत्स्पंद(?) दिने दिने। शूलकुष्ठापस्मारज्वरादीन्मे(?)षजं प्रियें॥ १५॥ दास मार्गप्रपन्नाये श्रोतेपान्पतन्नेहि(?)तां। नैरवेप(?)धार्यं च घ्रातव्यं च मम मुमुक्षुभिः॥ १६॥ लिंगागमे षेकं कुर्वीत तल्लिंगोदकमुच्यते। तत्र स्नात्वा च पीत्वा च नाशयेत्पापिलामयं(?)॥ १७॥ आरोग्यमस्तु बलमस्तु यशोऽस्तु नित्यं सौभाग्यमस्तु शिवमस्तु शशांकमौले। त्वत्पादपंकेरुह मज्जनपुण्यजो यमास्वादयामिपरतो न पुनर्भवाय॥ १८॥ पित्रे(?) वरहस्ये॥ मत्प्रसादैकं पुष्यं सदा धार्यं मदाश्रितैः॥ प्रसादभुजः सर्वे मम साम्यपराक्रमाः॥ १९॥ इति शैवरत्नाकरे पादोदकमाहात्म्यं नाम पंचदशोऽध्यायः॥ १५॥ प्रसादस्थलं॥ प्रसादपूर्वकायेयं भक्तिमुक्तिविदायिनी। नैवासाश्यन्तेप्राप्तुं नरैर्नैके(?) जन्मना॥ १॥ अनेकजन्मसिद्धानां प्रसीदति महेश्वरः। प्रसन्ने सति देवेशे पशुत्वात्स विमुच्यते॥ २॥ भक्तियोगे सदाभ्यासरतो भक्तिपरो भवेत्॥ यस्माच्च तत्तो भक्त्या प्रसादो लभ्यते नरैः॥ ३॥ प्रसादः सर्वपापेभ्यो मुक्तिमुक्तिं प्रयच्छति॥ महापापोपि यो मर्त्यः सोऽपि ज

स्तत्परात्परं ॥४॥ नयोनियंत्रपीडा नो भवेदिति न संशयः ॥ ब्राह्मणाः क्षत्रिया वैश्यास्तथा शूद्राश्च ये नराः ॥५॥ न लंघयेत्तु निर्माल्यं धारयेत्सुमहत्फलं ॥ स्थिरं च पुष्पितं माल्यं लिंगस्याने व संस्त्रिपाद्दि
तेषां चैवेश्वरप्रीतिकरं निर्माल्यसंज्ञकं ॥६॥ रूपं देहमिदं ज्ञानं स्थाणानां स्नानास्ति नाश्रये ॥७॥ प्रसादादमलं ज्ञानं कर्मबंधं प्रहास्यति ॥ निर्मलस्य तु निर्माल्यं निर्मलत्वाद्गिरिदितं ॥८॥ तस्माद्भोज्यं निर्मा
ल्यं प्राह्लैतेरशिवात्मभिः ॥८॥ हृद्रूपात्मनः स्नाति हृद्रूपापीतं पिबंति हृद्रूपाघ्रातं जिघ्रंति ॥ तस्मात्सत्सगाः प्रशांतमनसो विद्वांसो भूत्वा निर्माल्यमेव च सेवेतं रसुपनिषत् ॥९॥ वाजपेयसहस्रेण
त्वश्वमेधशतैर्न च ॥ नास्ति हव्यपैत्र्ये श्वब्रह्मोच्छिष्टसमं फलं १० तिलानां मोक्षदं शंभोः शंतनुरगाग्रे विंडसंमितं ॥ गंधमाल्यसमायुक्तं प्रसादमिति शस्यते ॥११॥ ब्रह्महत्यादिपापघ्नं निर्माल्यस्य च भस
णं ॥ तस्य पापमहं शीघ्रं नाशयामि वरानने ॥१२॥ यस्य प्रसादेवस्य बुद्ध्या बह्वत्वमाप्नुयात् ॥ विप्रत्वमपि विप्रश्च सशिवः केन सिध्यते ॥१३॥ लिंगेर्पितं खिलं विश्वे सर्पितं स्यात्संशयः ॥ सा
त्लिंगार्चनतो छिद्रं स्वदेहे धारयेन्नरः ॥१४॥ वज्रकायत्वमवाप्नोति प्रसादपुण्यमाप्नुयात् ॥ एकपादपुराणो ॥ अन्नपानादिभिः सर्वैर्यत्तु संतर्पयेच्छिवं ॥ तत्फले नाश्नुते मोक्षप्राप्त्यं परमक्षरं १५ निर्मा
ल्यं धारयेद्भक्त्या प्रसादार्वनीयतेः ॥ राजसूयस्य यज्ञस्य फलमाप्नोति नारद ॥१६॥ प्रसादशिवनिर्माल्यं भक्त्यापि धारयेद्यदि ॥ अशुचिर्वाशिनमर्त्यः सर्वावस्थां गतोपि वा ॥१७॥ तस्य पापानि घो
राणि नाशयत्येव शंकरः ॥ लोभान्न धारयेच्छंभोर्निर्माल्यं च न भक्षयेत् ॥१८॥ तस्य शेषे पि वाचैतल्लंघयन्नापि नारद ॥१९॥ निर्माल्यलंघनात्पुंसः सिद्धिभ्रंशोपि जायते ॥ निर्माल्यदानान्न
रकेपत्यते कालमक्षयं ॥२०॥ लिंगे स्वयंभुविमाणे वाणे रत्ने संस्थिते ॥ सिद्धेः प्रतिष्ठिते चैव न चंडो धिकृतो भवेत् ॥२१॥ शिवरहस्ये ॥ प्रसादः प्रथमो ग्राह्यः प्रसादाद्गुरुसंभवः ॥ प्रसादान्निर्मलं नि
त्यं प्रसादात्सर्वसंग्रहः ॥२२॥ प्रसादात्सततं भावः प्रसादात्सर्वकारणं ॥ प्रसादो गुरुवाक्यं च प्रसादः स्वसुभोगदः ॥ परंज्योतिः परं तत्त्वं परात्परतरं महत् ॥ परवस्तु समाप्तिः परमात्प्रसादतः ॥२३॥
प्रसादं गिरिजादेवि सिद्धकिन्नरगुह्यकैः ॥ विष्णुब्रह्मसुरेंद्राद्यैः सुदुर्लभमगोचरं ॥२४॥ एकएव हि यो रुद्रः सर्वैर्वेदैर्प्रगीयते ॥ तस्य प्रसादलेशेन भुक्तिर्मुक्तिश्च किंकरी ॥२५॥ वस्तु हस्तात्कल्पमेयो मध्यपिंडस्तु
पुत्रदः ॥ वेदोक्तं तद्धि निर्माल्यं परमामृतं ॥२७॥ कालिकाखंडे ॥ प्रसादं त्रिविधं प्रोक्तं शुद्धं सिद्धं प्रसिद्धकं ॥ शुद्धं लिंगमुखान्नीतं सिद्धं चार्थविसर्जितं ॥ प्रसिद्धं गुरुहस्तात्तं प्रसादं त्रिविधं परं ॥२८॥ गुरुप्रसादो

शै॰ १॰
३१

मुक्त्यर्थं भुक्तिर्लिंगप्रसादतः ॥ गुरुकारुण्यतो लभ्यमखंडितमिदं द्वयं ॥२९॥ बाह्यत्वंतत्रै ॥ असमर्प्य यदि द्रव्यं यत्किंचित्कदाचन ॥ कथंचित्तोपभुंजीत शिवभक्तिपरो नरः ॥३०॥ स्वच्छंदतो यदा बुद्धिः प्रसादः
परिकीर्तितः । करणानि च सर्वाणि बाधारपभ्यंतराणि च ॥३१॥ बुद्धिप्रसादनात्तस्मात्तानि मर्वाणि हि ॥ संतोषे स्वयं युक्तानां पंत्सु सर्वशः तत्तेजसा ॥३२॥ देवासुरमनुष्याणां कुतः स्वप्नेपि तत्सुखं ॥
यः प्रसन्नेंद्रियग्रामः सदा चंद्रांशुनिर्मलः ॥३३॥ प्राप्नोति परमं स्थानं शांतः शांतेन चेतसा ॥ यथा कामप्रदानेन प्रतिबाधनानि न च ॥३४॥ उपन्यार्थेषु यत्तोषः संतोषः सुप्रकीर्तितः ॥ अतीता
नागतार्थेषु वर्तमानेषु सर्वदा ॥ अनन्यस्मृतिरस्य यः संतोषः सर्वदा तः ॥ तेन सर्वफलप्राप्तियोगप्राप्तिश्च तत्फलं ॥३५॥ एतच्च व्रतस्थदस्य तत्वा संतोषः सम्यगाश्रितः ॥ अश्वमेधशता चेद्रूपं देवि चि
तप्रसादनं ॥३६॥ मुक्तिसाधनमित्युक्तं कर्मभक्तिप्रदायकं प्रसादादेव सा भक्तिः प्रसादाद्भक्तिसंभवः ॥ यथैवांकुरतो बीजं तोवाद्यथांकुरं ॥३७॥ बहुलिंगिनां शिवादि नामहीनस्य ध्यानहीनस्य भक्ति
नः ॥ शिवभक्तिविहीनस्य त्रिपुंड्रोद्धूलनादिषु ॥३८॥ श्रद्धाहीनस्य दुःस्य प्रसादे बुद्धिवर्जनं ॥ सा सा न्मुक्ति स्वहेरवा नैव सिध्यंति देहिनः ॥३९॥ प्रसादेन विना देवं ये जानंति सुरप्रभो ॥ ते जानंति विनांशा
नं ग्रंथैनैकेन केवलं ॥४०॥ स्नानोदकाच्छुचिस्नानां कद्रुषं चपिवेत्तस्य दा ॥ लिंगस्नानमथस्नानमन्नस्नानमेव यत् ॥४१॥ लिंगसारे ॥ लिंगगर्भे षेकपतोयं यद्यल्लिंगोदकं भवेत् ॥ तस्मिवेल्लिंग शरणा
अन्यतत्र धर्मो सवत् ॥४२॥ लिंगावगाहनं चांबुलिंगगं वृहच्चितर्पणो ॥ तेन स्नानं च पानं च अन्याद्धि दमुत्रः रेतसि ॥४३॥ लिंगप्रक्षालनं तोयं विंगतोयं तथैव च ॥ तत्तोयं सर्वदा स्नानमत्र स्वं गलतोय
वत् ॥४४॥ शंभोस्नानोदकं सद्यः सर्वतीर्थसमं महत् ॥ धारणात्पापसंघातैस्तत्क्षणादेव मुच्यते ॥४५॥ पादोदकं च निर्माल्यं मनसाधार्यं प्रयत्नतः ॥ नश्यंति पापानि मनोवाक्कायजानि च
॥४६॥ शूद्रान्नं पाचकान्नं च नैवेद्यं श्राद्धवर्जितं ॥ शालान्नं समुदायान्नं राजान्नं चैव वर्जयेत् ॥४७॥ अन्नशुद्धौ सत्वशुद्धिर्न मृदा न जलेन वै ॥ सत्वशुद्धो भवेच्छुद्धिस्ततोन्नं परिशोधयेत् ४८
असात्वानेव भुंजीत जस्या लिंग नपूजयेत् अन्यान्वाभ्यागतान् गेहे अतिथिर्नाभिपूज्यते ॥४९॥ यत्र पुण्यफलं तोयं मन्नपानाधमो यथा ॥ अनिवेद्य न भुंजीत यदाहारपकल्पते ॥५०॥ शिवमंत्रेण
शुद्धात्मा संस्कृतः शिवभाषितः ॥ पात्रेपि न भुंजीत सार्धं क्रूरैरधार्मिकैः ॥५१॥ पत्नीपद्येनभुंजीत रात्रौ दीयं विनातथाभिन्नपात्रेपथ्यआवा शिलापां दारवेन पाभूद्रशेषं न भुंजीत तदन्नं च वि

विसर्जयेत्॥५२॥ शुक्लान्तं स्निग्धमश्नीयाच्छिवमंत्रेण मंत्रितं॥ भोक्ता शिवइति स्मृत्वा मौनी चैकाग्रमानसः॥५३॥ आसनस्थः पिबेदंभः तिष्ठन्नो जल्पि नापि च॥ वामहस्तेन शय्यायां नत्वैवान्य
करेण वा॥५४॥ अनिवेद्य तु भुंजानः प्रायश्चित्ती भवेन्नरः॥ शिवाय दत्तमन्नाद्यं न पूजया च विभुज्यति॥५५॥ संस्कृतं शिवभक्तस्य नाद्यात्तन्न कृतस्तके॥ संस्कारे सु च सर्वेषु गृहे वापि कुलान्वितः॥५६॥
सूतके न च भोक्तव्यं मृतके च विवर्जयेत्॥ मुक्तासमारतेः स्नेहान्निश्छिवस्याष्टशतं जपेत्॥५७॥ शुनिसूकरचंडालैर्मार्जालकपिकुक्कुटैः॥५८॥ स्पृष्टं गर्धभकाकाद्यैः स्पृष्टमन्नं न भक्षयेत्॥ सौरेशशरीरं सर्व
तो रक्षेच्छरीरं धर्मसाधनं॥ न शरीरं विना शुद्धिं पूज्यते गिरिजापतिः॥५९॥ शिवज्ञानविधायी॥ विनियोगं प्रवक्ष्यामि सिद्धमंत्रप्रयोजनं॥ देवत्वं याति तन्मंत्रं विनियोगविवर्जितः॥ यस्यैव वि
धानेन कार्याणि च विशेषतः॥६०॥ विनियोगः स विज्ञेयस्तदेवामुष्मिकं फलं॥ कालिकाखंडे॥ गणत्वे च शरण्यत्वे प्रसादं चैव माहरेत्॥६१॥ मिश्रितं तु न भुंजीयात् देवास्य ह्यपक्लिष्टिबं॥ प्रसादं मि
श्रितं भोक्तुं गणत्वे नैव युज्यते॥ यावज्जीवं न भुंजीयान्मिश्रितं निष्फलं भवेत्॥६३॥ सद्योजाते तु चोष्यं च पानीयं वामदेवके॥ अघोरवक्त्रे भक्ष्यं तु तत्पुरुषे भोज्यमेव च॥६४॥ ईशाने लेह्यकं चैव पं
चवक्त्रे समर्पयेत्॥ पंचप्रकारसंयुक्तं षड्रसं जीवसंयुतं॥६५॥ पृथिव्यादि भूमिसंतुष्टं दशवायुरंशं रूपं॥ मनोबुद्धिरहंकारश्चित्तं जीवादि पंचकं॥ पंचविंशतितत्त्वं च पंच हृत्स्नं कृपियं॥६६॥ लिंग
सारे॥ लिंगार्पितं तु प्राणं मर्पितं च यथा यथा॥ अर्पितस्य मुखं सा स्वामुख्यमर्पणमर्पितं॥६७॥ आत्मानं कारयेच्छुद्धमनादिमलकुंठितं॥ अनेनैवार्जितं कर्म दग्धं बीजमिवाग्निना॥६८॥ अ
नर्पितादिकं लिंगे यो भुंक्ते धर्मवर्जितं॥ स विष्ठासदृशं चान्नं नीरं च सुरापासमं॥६९॥ सर्वं च तृणकाष्ठं च भक्ष्यं चैव सलेपनं॥ लिंगार्पितप्रसादं च नान्यद्भुंजीत बुद्धिमान्॥७०॥ गंधं स्रगाम्र दैवे वर्ष
रं तैलमज्जनं लिंगार्पितप्रसादं च मन्यत्तत्रैयं च मूत्रवत्॥७१॥ लिंगसारे॥ रत्नाभरणजातं च वस्त्रं सकलवाहनं॥ प्रसादमेव भोक्तव्यं न चेत्पांडलवन्नवेत्॥७२॥ भोज्यं लेह्यं च चोष्यं च पेयं च
लिंगार्पितं परे॥ लिंगोच्छिष्टं तु भुंजीरन्धन्यास्ते समयान्तराः॥ महादेवस्य निर्माल्यं स्त्रीकार्यमपि कारिभिः॥ नद्योपकानिवास्यानि दर्शयामि समासतः॥७४॥ तदुक्तं स्कंदे व्याससंजेमिनिसंवादे
प्रसादग्राह्यलिंगं च प्रसादग्रासं च यः॥७५॥ प्रसादान्निर्मलो नित्यः प्रसादात्सत्यसंग्रहः॥ न प्रसादं पवित्रं च प्रसादं मंगलं शुभं॥ पापेरकं प्रसादं च शुद्धिं सिद्धिं न संशयः॥७६॥ अन न्येदेवतो पालर

नर्पितपराङ्मुखः॥ अनन्यकर्मनिर्माणाः प्रसादो भक्तिमान्भवेत्॥ ७७॥ शिवरहस्ये ईश्वरः॥ मद्भक्तजनवात्सल्यं मत्प्रसादेन जीवनं॥ ममतत्वपरिज्ञानं भवेद्विप्रसादतः॥ ७८॥ मदीयं भुक्तनैवेद्यं पादांबुकु
सुमं दलं॥ धर्ममर्थं च कामं च मोक्षं च रदधते क्रमात्॥ नित्यं परमशैवेन सेव्यते देवसेवितं॥ व्यासजैमिनिसंवादे॥ जैमिनिरुवाच॥ शैवसंहितायां॥ अन्नाहं मम नैवेद्यं पादांबुकुसुमं दलं॥ एकेश्वरेण कथित
मितिकेचित्समर्थयः॥ ८०॥ वंदितं कथं स्वामिन्यथार्थं कथयस्व मे॥ व्यासउवाच॥ देवदेवस्य वचसो विषयो यदि हि जैमिने॥ ८१॥ येषां रमदृशापि तानः शिवभक्तिपराङ्मुखाः॥ शंभोरस्मत्र देवेषु ये भक्ता
येनरोहितताः॥ ८२॥ ये शुद्धकर्मिणः शंभोरस्यत्र समबुद्धयः॥ तेषामनर्हमीशस्य तत्प्रसादं च नुद्धर्यं॥ ८३॥ नैवेद्यं विष्णुनाभुक्तमर्पितं वान्यदेवते॥ निर्माल्यं च निवेद्यं च भुक्त्वा चांद्रायणं चरेत्॥ ८४
परस्परविरोधित्वात्सा रस्य च कर्मणः॥ एकत्र न निवासस्यात्तेजस्तिमिरयोरिव॥ ८५॥ निर्माल्यं निर्मलं शुद्धं निर्मलत्वादिनं दिनं॥ तस्मात्भोज्यं निर्माल्यं प्राह्मैररपि वाल्मीकेः॥ ८६॥ ईश्वरः॥ मल्लिं
गंधादिरागो लोके देशिकामनपराधराः॥ मदेकशरणास्तेषु योग्यं नैवान्यजंतुषु॥ ८७॥ अज्ञानलोभयुक्तो वा जिह्वाचापल्यमानसः॥ शिवनिर्माल्यभोजी तु रौरवं नरकं व्रजेत्॥ ८८॥ शिवधर्मे
निर्मलत्वाच्च निर्माल्यं मलदेहो न धारयेत्॥ धारयेच्छिवनिर्माल्यं भक्त्या लोभान्न धारयेत्॥ ८९॥ लोभान्न धारयेच्छंभोर्निर्माल्यं च न भक्षयेत्॥ निर्माल्यलंघनाच्छंभोर्बुद्धिभ्रंशो भिजायते॥
जिह्वाचापल्यसंयुक्तः शिवसंस्कारवर्जितः॥ शिवनिर्माल्यभोगी चेद्रौरवं नरकं व्रजेत्॥ ९१॥ सर्वदा शुद्धिरहितानां शुद्धवस्तुपयोगे दोषाय भवतीत्यपमेवार्थः॥ श्रुतिस्मृतीतिहासपुराणेषु सर्व
तं ज्ञो घोष्यते॥ यथाहापस्तंबः॥ अग्निर्वैदीक्षितः तस्मादेनं नोपस्पृशेत्॥ इति दीक्षितादिस्पर्शवत्॥ कामिके॥ अशुद्धात्माशुचिर्लोभान्मद्भुक्तं पावनं परं॥ भक्षयेन्नाशमायाति स्रद्रोस्यधना
दिव॥ ९२॥ मानवपुराणे॥ न स्पृशेन्माणिनोच्छिष्टो विप्रगोब्राह्मणानलान्॥ न चापि पश्येदशुचिः स्वस्थो ज्योतिर्गणान्दिवि॥ ९३॥ वह्निश्च स्यार्कपर्णे धकुंभेति दुकपर्णयोः॥ पलाशपत्र
पत्रेषु भुक्त्वा चांद्रायणं चरेत्॥ इत्यादिवचनैः सर्वमुपात्तमेतदुक्तं भवति॥ नैवामरलोकपूज्याश्च जाताः॥ अपि च शिवनिर्माल्यभूतसुधाकरकलासारप्रसादितसुधारसाभिषिक्तवृहज्जा
तानि कथं देवतायोग्यानि भवंति॥ अपि च भास्करस्य भ्वरोदेवश्नियोमः स्तनयजीति परेषां नरादिभोहेरणमयं पुरुषरतिस्पर्शस्यानभावस्थितिः॥ परमेश्वरएव सोपि परमार्थज्ञानाद् समादृते॥

तत्रापि श्रुतिः ॥ यो सौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति तस्य भूतानां पदार्थानां समाकर्षणेनोत्पर्यः । तस्मान्नात्राणायायाभावात् ॥ तस्मात्परमेश्वरभुक्तशिष्टान्नेनाहीराणकर्यं भवेपुः
महोपनिषदि । अपराव समसर्जादौ तासु वीर्यमपासृजत् ॥ इत्यापो नारायणोद्भूता इति । जलमपि शिवाज्ञानमिति अत्रापि श्रुतिः । आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपो
न्नमापो मृतमापः संम्राडापो विराडापः छंदांस्यापो ज्योतींष्यापो यजूंष्यापः सत्यमापः इति । तस्मात्सकलं जलं परमेश्वरचरणकमलाभिषिक्तप्रसारितप्रवाहरूपमेव । मुख्याज्ञातोग्निरिति पर
मेश्वरज्ञानोग्निः ततश्च तस्मात्परिनिषिक्तं तद्रूपं भुक्तमेव स्यात् ॥ अतश्च पक्वान्नेन देवतोपहारं वैश्वदेवप्राणाग्निहोत्रहोमादिषु संतर्पणादयो हृद्धर्मा न संभवेपुः । ततः सर्वमन्नं तद्रूपोच्छिष्टं तेन
दानहोमयोरनर्हत्वात्तात्सिकाम्यां प्राणाद्यपुरितिधात् । प्रातेन मेरितं चैतन्यस्वरूपेण शंभुनागृहीतपरिमलानि सकलपुष्पाणि पत्राणि च पूजार्थमनर्हाणि संवदेत् प्राणायानस्यानोदान-
समानादिना चैतन्यस्वरूपस्य परमेश्वरस्याघ्रायां प्राणेनिषेधमतं तद्धोमपिपिवोमाविशाप्रदायाय आयस्वाहेति पंचमं तद्देतं हविः परमेश्वरस्य प्रसादं न भवति ॥ किं तत्प्रसादभूतमन्नं ब्राह्मणो नैवोप
भुंजते किं ॥ मध्यपिंडं पत्नीं प्राशयेत् । अत्र तद्रूपदेशे ततपस्यपुत्रार्थं स्याप्राशनविधानात् तत्प्राशनेन पुत्रोत्पत्तिरगम्यते ॥ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् इति मंत्रः ॥ लिंगवत्तेनास्य मंत्रस्यायमर्थः ॥
अस्मिन्नर्थे लिंगे ॥ वसुरूपेण मध्यपिंडः सुपुत्रदः । वेदोक्तं तद्विनिर्माल्यं किं पुनर्वक्ष्यमाणेषु ॥ ८५ ॥ अथ वैदिकशैवाः के च तद्विनियुक्तं विनियोगं न भवति किं ॥ अपि च ॥ श्राद्धकाले विश्वेदेवाभ्यां पितृ
पितामहेभ्यः यजमानेनानुदिश्य समर्पितं चान्नं प्राणाग्निहोत्रस्याहं न भवति किं तत्र श्राद्धकाले विच्छिन्नाग्निहोतारश्च संति तेरग्नौकरणं करिष्यत इति वचनाद्वैश्वदेवहविःशिष्टान्नप्राशनकारणं हविः
शिष्टान्नं विश्वेदेवपितृपितामहप्रपितामहानुद्दिश्य परिनं चान्नं प्राणाग्निहोत्रस्य प्राशनानां प्रथमं तन्मन्नं किं प्राणाग्निहोत्रस्याहं भवति तथा तस्मादेव परमेश्वरस्य प्रसादमपि प्राणाग्निहोत्रस्य विशे
षेणार्हमेव अस्मिन्नर्थे कूर्मपुराणे ॥ श्राद्धकाले तु भुक्तशेषं ददाति मन्त्रयापितृदेवतानां तेरेव पिंडे आनीतेन विभिश्रेण कल्पयन्नः पितरः सन्तृप्ताः ॥ ८६ ॥ शैवे । प्राणाग्निहोत्रयः कुर्याच्छिवस्यैव प्रसादतः ॥
अश्वमेधायुतं पुण्यं षष्ठिकल्पे लभेन्नरः ॥ ८७ ॥ लिंगे । पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधं ॥ अनिवेद्य न भुंजीयाद्यदाहाराय कल्पितं निवेदितं चरेद्वापि भुंजीयात् सत्युक्षये ॥ ८८ ॥ बोधायनसूत्रे

श्रै०२०
३३

परत्वमाहरत्वेन प्रातीतत्वोमीयाम्यहं॥ ॐ आसस्तनौ॥ यद्युक्तं प्रथममार्गच्छेन दोमीयामिति। ॐ ईश्वरमुखाग्निः सत्विघसि भूतैर्वेदैर्हवैतां तेन प्रशाव्यविवर्तं जगदेतत्प्रपंचरूपमिति प्रतिपादितं॥ ततश्चपर
मेश्वरमुखनिर्गतशब्दरूपस्य शब्दप्रपंचस्य सर्वस्य न्रूमेरापहितास्मात्। सकलस्य शब्दविवर्तभूतस्य वस्तुनः शिवोपभुक्तप्रसादत्वथा नाहत्वात्। तानुत्पत्तेत्वे। अकारादिक्षकारांतमात्रकारचना विधेः जगत्त्वि
मर्शणावानर्पास्तर्वस्यइतिकथ्यते॥ इतिर्पंचाशद्वर्णात्मकत्वाणिशिवनिर्माल्यमेव। यजुर्वेदे॥ परेक्रमव्यक्तमनंतरूपंविश्वंपुराणं तमसः परस्तात्। इतिनद्विश्वरूपिणः। परमेश्वरस्य न्नषड्सोयेतष
द्विधाहारजलकुसुमजातानि सर्वाण्यपि देवप्रसादत्वान्निर्भवे युः॥ तत्वसारे॥ अस्पृश्यं शिवनिर्माल्यमायकृतं शिवेकर्पं सर्वव्यापि शिवश्चैव निर्माल्यं परमार्थतः। किंतत्र चेः निर्दिष्टं निर्माल्यमिति शंक
या॥९९॥ शिवरहस्येयत्र भक्तिविशेषः स्यात्तचंडे नैवदूषणं॥ यत्रैवभक्तिसामान्यं तत्रचंडो भविष्यति॥१००॥ तस्मादनर्हमीशस्य नैवेद्यमिस्यादित्यर्थं समर्पितं तदा भवति चे। ननुभवत्वेतेपितस्यैवा
त्वंस्यैकिमर्थमयेरणीयमित्याह॥ शेवे। शिवस्वामिक्रमेवात्वं शिवायविनियुज्यते विनियोगोपचारेण संज्ञप्यतिसदाशिवः॥१॥ ब्रह्मांडपुराणे। सर्वलोकेकनाथस्य शंभोः कः किं प्रयच्छति उपचारप्रियः शं
भुक्तेनैवायं प्रसीदति॥२॥ नयाहिराजकीयपुरुषस्तदीयवस्तुतस्मै समर्प्य तु खेन पुष्टो भवति। न ह्यतीतिभावः। शिवरहस्ये। शिवानुभूतमखिलं निर्माल्यं परिभव्यते भोज्यं धार्यमिति द्वेधा षड्विधं कथ्यते॥३॥ देव
स्वंदेवताद्रव्यं नैवेद्यं पंचनिवेदितं॥ चंडद्रव्यं बहिः क्षिप्तं निर्माल्यं षड्विधं तथा॥४॥ देवस्वं ग्रामभूम्यादि दासीदासचतुष्पदं॥ हेमरौप्यं चलोहादि देवद्रव्यमिति स्मृतं॥५॥ पत्रं सुकृत्यतदेवाय यदेवपुष्पफलंजलं। अन्नपाना
दिकं तत्सर्वं नैवेद्यमिति कीर्तितं॥६॥ एतत्त्रिविधनिर्माल्यमनार्हमिति कथ्यते॥ प्रमादाद्भोजनं कुर्याद्भूमेरप्यक्रमं गतं। ७। किंचिद्व्यापहारेण नरकं वाप्नुयात्सोध्रुवं। शिवोपयुक्तं स्रग्गंधमन्नपानादिकं तथा।८।
निवेदितमिति प्रोक्तं सर्वपापहरं परं॥ बाणलिंगे चरेल्लोहे रत्नलिंगे स्वयंभुवि प्रतिमासु च सर्वासु न चंडोधिकृतो भवेत्॥१०९॥ स्थापिते विविधे नालिंगे सर्वे देवासुरे नरैः। एतत्त्रिविधनिर्माल्यं चंडेशो धि
कृतं शिवे।१०। बहिः क्षिप्तमनर्हं हि अस्पृश्यत्वकारणात्। पिशाचानां हि सर्वेषामधिकारो हि सर्वदा॥११॥ इति षड्विधप्रसादे वुनिवेदितप्रसादमेव प्रसादं भोक्तृणां अर्हं भवति।१२॥ प्रसादानुभवस्यैवम
हत्त्वं प्रतिपादितो। इदं पवित्रं परममखिलागमचोदितं॥१३॥ वेदवेदांततत्वज्ञैः पवित्रं परिभाषितं॥ इतिहासे शिवाचारसारभूतमुदाहृतं॥१४॥ इदं प्रसादं भुंजानो विरिंचिः किल जैमिने। विष्णुः परम्

णमोथिपि शिवेन च परीक्षितो पादोदकप्रसादानां निर्माल्यानां निषेवकः। वशिष्ठश्च गरिष्ठोभूत्प्रसादस्य प्रभावतः॥११५॥ प्रसादसेवनाज्ज्ञातो विश्वामित्रो महामुनिः॥ पानिश्च करणादेव कपिलो गौ
न मोक्षदः॥१६॥ प्रसादसेवनात्सूर्या नारदश्च नारदाद्यपि॥ ज्ञानादर्शनकर्तारः श्रावयं निजगत्रयं॥१७॥ हरिवंशे गुरुहननारदसंवादे॥ कदाचित् शिवपादांबुनिर्माल्यपरिमेलितः। पवनः पन्नगेशे
न निपीतः पुरस्य कारणात्॥ तेन विश्वंभराभारधुरीणत्वमवाप्यते॥११८॥ योगीश्वरत्वमचलमीशभूषणतापि च॥ सर्वज्ञानावसंप्राप्ताह्देवेंद्रो नाहि संशयः॥२०॥ साक्षात्प्रसादभोगेन भक्तोऽपि लभते
पूतत्वं। न हन्तुं न हि मे शक्तिर्न गुरोर्न गिरां पतेः॥२१॥ शिवधर्मे॥ निर्माल्यं धारयेन्मूर्ध्नि नैवेद्यं चापि भक्षयेत्॥ तत्प्रसादोदकं पीत्वा गणापत्यमवाप्नुयात्॥११२॥ स्वच्छंदललिते भैरवेश्वरकुमारसंवादे॥ नि
र्माल्यधारणात्पुत्र सालोक्यं लभते नरः॥ पादोदकस्य पानेन सामीप्यं भजते सदा॥२३॥ मत्प्रसादोपभोगेन सारूप्यं प्रतिपद्यते। नान्यस्य तपसः शक्तिलववालस्य विद्यते।२४॥ रहस्यं तदिदं पुत्र सुल
भं कुरु वत्सक॥ कामिके॥ निर्माल्यं देवदेवस्य चांद्रायणशतात्परं॥ भक्षयेद्यो नरो भक्त्या पवित्रमिति शुद्धिदं॥१२५॥ ब्रह्महत्या ब्राह्मणस्तस्य पापं क्षिप्रं विनश्यति॥ ईशानसंहितायां उमामहेश्वरसंवादे
किं देव्यापि किं नवसाधिकं दानेन जप्येन किं॥ शृणु देवि वरारोहे मद्भक्तं परिभज्यते॥२६॥ शिरसा धारयेद्भक्त्या शिवनिर्माल्यमल्लोभजः॥ प्रसादे वत्स तत्ते नसोमः सोमकलाधरः॥२७॥ निर्माल्यं धारये
द्भक्त्या शिरसा पावनी यते॥ राजसूयसहस्रस्य फलं प्राप्नोत्यसंशयः॥२८॥ शिरसा शिवनिर्माल्यं भक्त्या यो धारयेत्प्रिये॥ अशुचिर्भिन्नमर्यादः सर्वावस्थांगतोऽपि वा॥२९॥ सर्वदेवाप्रयुक्तात्मानि
यमेश्वविहितात्मनः तस्य पापानि घोराणि नाशयत्येव शंकरः॥३०॥ निर्माल्यं परमं पुण्यं प्रसादं पापनाशनं। ब्रह्मचारिग्रहस्थानां यतीनां भुक्तिमुक्तिदं॥३१॥ यच्छिवायपानितोयानि येन यः पु
रायणः स्मृताः॥ यत्पापस्थापितं निर्माल्यं तत्स्मात्सर्वं प्रसादजं॥१३२॥ उपवाससहस्राणि प्राजापत्यानि पुतानि च॥ शिवप्रसादसिक्थस्य कोटिअंशो नापि नो समाः॥१३३॥ निर्माल्यो शभागं च तणाश्चांबुक
णोपमं॥ पादोदकप्रसादान्तं सेवया मोक्षमाप्नुयात्॥३४॥ अधार्पणविधिः॥ लिंगे। खाद्यानि चोदनीयानि पयांसि स्नानानि यानि वै। देयानि तानि वै शंभोः श्रीपाद्यसभावतः॥ भोज्यानि त्यक्त्वा चो
ष्याश्चपे च लिंगार्पितानि पत्रे। लिंगे गोपि वृंतं मुंजीत प्रसादार्थिनं दातृजा॥३६॥ एकांगं च समापुत्रकं रुचो नां भद्रशैवि तं॥ तस्मिन् सर्वार्पितं चेन भोमप्रसादसिद्धिकं॥३७॥ एवं समर्पयद्द्रव्यं स्पर्शार्चिं चेवार्पये

शै०र०
३४

ततः॥ उभयार्पणहीनश्चेत्प्रसादेन विधूतलोमवेत्॥३८॥ इति वचनप्रमाणात्स्वकीयजिह्वास्पर्शनपदार्थार्पणं मानसकरणेनेष्टलिङ्गस्य समर्पणं कृत्वा तत्प्रसादसुखमनुभवितुमर्होभवति॥ तस्यो

दाहरणमाह॥ वृद्धोऽपुराणे॥ ईश्वरपितामहसंवादे॥ नैवेद्यं परतो यस्य दर्शनात्स्वीकृतं मया॥ रसात्मकं स्वजिह्वायामात्मनि कमलोद्भव॥३९॥ इत्येवमादिवचनप्रमाणात् प्राणलिङ्गस्य प्रथ

लकर्मणा मनसा वाचा पूर्वमर्पितपदार्थरूपांतर्गतरुचिं स्वजिह्वापेक्षयापि अर्पयात् सावधानमनसा समर्पितं भवतीति पाकरसायां परिचारके तथा कृतमपि देवार्हमेव॥ तथा च स्कांदे॥ समा

धानं परिस्पष्टं परं दृष्टमनिष्टयाऽप्यावाय कल्पितं वस्तु न किंचिदपि दूष्यते॥१४०॥ क्रियानिलके॥ गवां सर्पिः शरीरस्थं न करोत्यात्मपोषणं॥ निष्क्रांतं कर्मणा तत्तु पुनस्तासां तु भेषजं॥ एवमं

तः शरीरस्थः सर्पिर्वत्परमेश्वरः॥ विना चोपासनां देवो न करोति हितं नृणां॥४१॥ इति वचनप्रामाण्यात् इष्टलिङ्गार्पितमेव भवति॥ तथा यजुर्वेदे॥ यद्धि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करो

तीति श्रुत्यागमप्रमाणाद्वाग्विज्ञापनमनोभावेन क्रियासमर्पणत्रिकरणशुद्धं नैवेद्यार्पणं भवति॥ अस्मिन्नर्थे लैंगे॥ कर्मणा मनसा वाचा त्रिविधं चार्पणं शुभे॥ नो चेदनर्पितं भुंक्ते प्रसादं निष्फ

लं भवेत्॥४२॥ स्वेष्टलिङ्गाय यद्दत्तं चरणं तत्तु संशयः॥ तस्माच्छयेत्स्वयं प्राज्ञो नान्यस्मै वस्तु दापयेत्॥ नद्यादेर्जलादिभ्यो दद्याच्चेन्नरकं व्रजेत्॥४३॥ बहुकालो नरो गच्छन् तिष्ठन् स्वपन् जाग्रन् भुंजा

नो मैथुने रतः॥ यः शिवार्पितचेतस्को भक्तिमान्स तु नान्यथा॥४४॥ संयोगेषु वियोगेषु चाणुमात्रसुखानि च॥ यः कुर्यादिष्टलिङ्गे तु सोऽध्यानी निरंतरं॥४५॥ पंचेन्द्रियसुखं मुख्यं स्वयं तस्य कारणा

त्॥ मानसं च तनुस्पर्शं सर्वलिंगसमर्पणं॥४६॥ इंद्रियाणां गतं किंचित्सुखं नष्टिवार्पितं॥ तत्तत्प्रसादं भोक्तव्यं तदिंद्रियमुखेन च॥४७॥ यदिंद्रियं मुखं येन तेनेंद्रियमुखाच्चरन् अन्येंद्रियोपभुक्तं

चेन्नरकं भूषणादिवत्॥४८॥ यायाक्रियाविधानस्य प्रस्तुता जायते रतिः॥ तां तां कुर्यात्महादेवेऽप्यार्पणं ध्यायसुधीः॥४९॥ उपभोगाय यत्तो वस्तु यद्यदुपस्थितं॥ तत्तत्समर्प्य देवाय विदधीतात्मसा

त्ततः॥५०॥ आरभ्य कर्माणि शुभान्वितानि भावांश्च सर्वान्विनियोजयेद्यः॥ तेषां मभावे कृतकर्मनाशः कर्म स्वयं याति समर्पणेन॥५१॥ अस्मिन्नर्थे क्रियानिलके॥ अभावे भावमासाद्य स्थाने स्था

नं समाचरेत्॥ एतद्रूपर्पितानि प्रसादं सावधानकः॥५२॥ लिंगसारे॥ इष्टलिंग [illegible] ताम्बूलं चूर्णानि सर्वं [illegible] निवेदयेत्॥५३॥ सर्वेशिवप्रसादे च सुचितं यो न भावयेत्

द्रव्यात्वर्जं रचनादिस्वं शक्ति निवेदयेत् । सोपि पाति नरो घोरं नरकं कालमक्षये ॥५४॥ सुप्रतिष्ठितलिंगस्य न यथापूर्वभावना । तथापि च प्रसादस्य एवं नाम न संस्मरेत् ॥५५॥ ततः स्वयं च भुंजीत शुद्ध
मन्नं यथासुखं ॥ निवेदितं चरेद्वा पतच्छेषं चास्य शुद्धये ॥५६॥ असमर्प्य परं शंभो भुंक्ते खादति पाति चापत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधं ॥ प्राणार्पणं विना भुंक्ते भुंक्ते सद्यो हि किल्विषं ॥५७॥
फलं पुष्पं सुगंधं च वस्त्राद्याभरणानि च ॥ लिंगार्पणात्प्रसादः स्यात्किल्विषं स्यादनर्पितं ॥५८॥ लिंगे ॥ सर्वं चत्वरा काष्ठं च भस्म चैवानुलेपनं ॥ गंधो मृगमदश्चैव कर्पूरः स्तैलमंजनं ॥५९॥
लिंगे गे ॥ रत्नाभरणजातं च वस्त्रं सकलवाहनं ॥ प्रसाद एव भोक्तव्यो नान्यः स्वांगलविद्रुमः ॥६०॥ भोज्यं लेह्यं च चोष्यं च पञ्च लिंगार्पितं शुभं ॥ नो चेच्छिष्टान्नमिश्रं तु प्रसादं निष्फलं भवेत् ॥
६१॥ बहूर्दिवचनप्रामाण्यात् पितृलोकमेवापि पिष्टान्नेन विमिश्रितं ॥ अनर्पितं च भुंजानस्तरेश्मो नतकिं किल्विषं ॥६२॥ इत्यादिवचनप्रामाण्यात् । प्रसादमन्नदेवस्य भुक्तं तत्किल्विषं भवेत् ॥ प्राणवस्ते
वनु निर्माल्यं भक्ष्यार्थार्थं द्विजादिभिः ॥६३॥ न तस्य फंति पापानि मनोवाक्कायजानि च ॥ नैवेद्यं विष्णुना भुक्तममतं वान्यदैवतैः निर्माल्यं च स नैवेद्यं भुक्त्वा चान्द्रायणं चरेत् ॥६४॥ इत्यादिवच
नप्रामाण्यात् ॥ ब्राह्मणानामपि परमेश्वरप्रसाद एव विशेषेण भोक्तव्यः ॥ वसिष्ठमृग्वत्रिपाणिनिकणादप्रभृतिमुनिगणैः निषेवितत्वाच्च परमेश्वरस्य प्रसाद एव भोगमोक्षार्थिनां ब्राह्मणा
दिवर्णानामुपभोग्य एव ॥ असंस्कारी च यस्याकं शंभोरस्यनिवेदितं ॥ भुंक्ते यद्युभयं तस्य प्रसादं निष्फलं भवेत् ॥६५॥ अभक्तजनसंस्पृष्टान्यन्नपानानि वर्जयेत् ॥ अभक्तालोकितं चैव वर्जये
द्रोदनादिकं ॥६६॥ वहिः श्वा वं कुशरक्ष्य हिंसा शवस्तथापराः ॥ श्वपचादिकशरक्ष्य कर्मशोभादिकं वचः ॥ वे भस्मिको महादेवि प्रसादी वर्जयेत् मूत्र । वानुलनंते । अंतराया मया प्रोक्ता प्रसादस्य च
सप्तधा ॥ कथंचित्तत्र जातेषु निर्माल्यं वचितं स्मरेत् ॥६८॥ चर्मास्थिरुधिरं मांसं सुरुग्मीलजं तं पुक्कं मधुविंदुपतं स्यान्नं दर्शने स्पर्शने शुभं । पूर्वपरार्पान् संशोधसपः पाको विधीयते ॥ लिं
गोच्छिष्टं परं कार्पेततः प्रसादसेवनं ॥६९॥ कथंचित्प्रसादं जातायेऽन्तरायसमेष्विवे ॥ तत्सर्वं न हि भुंजीयात् लिंगोच्छिष्टं न पावनं ॥७०॥ मनः पूतं तु नैवेद्यं न यनाचेत्पूरितं ॥ मविदष्ठितितोधान
परे नाछादयेत्सदा ॥७१॥ रहस्ये ॥ न विकल्प्यमधिया शंभोर्भुक्तोच्छिष्टान्नपानकं ॥ योऽभुंक्ते सगणाधीशो याज्जीवं प्रतिपद्यया ॥७२॥ प्राणप्रयाणकाले च सर्वे भोगोपभोगकं ॥ अर्पयेत्साव

शै०र०
३५

धारी च सल्लिंगप्राणत्परः ॥७३॥ एकैकावरवः संतिभक्ताः शतसहस्रशः ॥ तत्प्रसादपात्रं तु देवयो नैव पंचषट् ॥७४॥ शिवप्रसादमाहात्म्यं सिद्धलिङ्गगुरूक्तकाः । विष्णुप्रमुखदेवाश्च नेन जा
नंति किंनराः ॥७५॥ तल्लक्षणाभिधानपूर्वं सम्यक् वीरागमे माह । प्रसादं त्रिविधं प्रोक्तं शुद्धं सिद्धं प्रसिद्धकं । शुद्धं लिङ्गमुखात्सक्तं सिद्धं चाप्यविसर्जितं ॥ प्रसिद्धं च गुरोर्भुक्तमित्येतत्त्रिविधं स्मृतं ॥
७६॥ निर्माल्यं वैदिके शैवे न सेव्यते लिङ्गसेवितं ॥ तत्त्वार्थवीरशैवेन सेव्यते चरसेवितं ॥ तथैवोभयशैवेन सेव्यते चरसेवितं । तथैवोभयशैवेन सेव्यते गुरुसेवितं ॥७७॥ शिवरहस्ये ॥ गुरुजंगमलिंगा
नां निर्माल्यभोजनादिनः । सदैवानुभवेद्दिव्यप्रसादं भुक्तमुत्तमं ॥७८॥ गुरोर्लिंगे चरेज्ञाने प्रसादे पादवारिणि । समये भजनं भक्त्या न कुर्तं भक्तिरीश्वरं स्मृतं ॥७९॥ प्राणप्रसादमव्यक्तं व्यक्तं लिङ्गप्रसाद
कं । लिंगतत्त्वमसंयुक्तं प्रसादं चेत्स्वखंडकं ॥८०॥ महतां लिंगरूपेण महतां जंगमेन च । अच्छिद्रविधेन समुद्भूतं प्रसादायन नमो नमः ॥८१॥ लिंगद्वयं प्रसादं च यो भुंक्ते स द्विधान्वितः ॥ तदेवोच्छिष्टनिर्मा
ल्यं सर्वेषां निपरंपरं ॥८२॥ बोधायनगृह्ये बौच्छिष्टप्रसादप्रक्षालिततीर्थग्रहणपूर्वेन दोषाभ्यायमाह ॥ पादोदकं त्वापहार्यं निर्माल्यं चैहिकं प्रदं ॥ गुरोर्भुक्तं सदाकालमामुष्मिकफलप्रदं ॥
८३॥ पदपल्लोपभोगाय तत्तद्व्यमवं च पत् । निवेद्य गुरवे भक्त्या तदाज्ञापालको भवेत् ॥८४॥ कर्मणा मनसा वाचा गुरुणां भक्तवत्सलः । शरीरमर्थं प्राणांश्च सद्गुरुभ्यो निवेदयेत् ॥८५॥ त्रिविधार्पणेन
शुद्धिं लभ्यते शरीरनिवेदनात्प्रसादलब्धवान् ॥ अर्थनिवेदनाज्जंगमभक्तिलब्धवान् भवति वेत् शरीरं च कस्यप्रसादसेवासौख्यं न भवति ॥ प्राणां च चकस्य तल्लिंगसंवेद्यो न भवति । अर्थं वंचक
स्य तत्परावनात् जंगमपरिचर्याफलं न भवति । अस्मिन्नर्थे शैवे । मन्त्रसारोपभोगी यो मङ्क्तानां च वंचकः ॥ कुंभीपाकेषु घोरेषु पच्यते न हि संशयः ॥८६॥ तत्र च ॥ इत्थमवंचकस्य करणचिद्भोगसं
न भवति ॥ लौकिकानां तपास्येवामपि मुक्तिर्न विद्यते ॥८७॥ पापेंद्रनोपि मुच्यन्ते गुरोश्चेष्ट प्रसादतः । संसारपापपंकस्य शिवज्ञानांबुनाशनं ॥८८॥ गुरोः पादोदकं पीतं संसारदमनाशनं ॥ ॐ
अथ गणप्रसादः ॥ बृहल्लोकपुराणे ॥ नैवेद्यं पुरतो न्यस्तं दृष्ट्वा नास्वीकृतं मया । रसान्नभक्तं जिह्वाग्रा इत्यामिषमलोद्भव ॥ इत्यादिवचनप्रामाण्यात् ॥ नैनोपभोग्य गंधवस्त्रालंकरणादिकं
अनुभक्तेगणोच्छिष्टं सोपि मायां तरिष्यति ॥८९॥ सकलं लिङ्गार्चकोच्छिष्टस्वदेहपरिलेपयेत् ॥ वंचकापस्म भवति शैवेन सह मोदते ॥९०॥ तस्योदाहरणमाह । श्रीमहाभारते ॥ दूर्वा

सोच्छिष्टं भुंक्ते न पादं वा स्थांगं लेपनात् ॥ सहसा वज्रकायं हि प्राप्तवान्विष्णुरव्ययः ॥ ९१ ॥ तस्मात्कारणात् सर्वभक्तगणप्रीतिमुक्तं शिवप्रसादकं ॥ ततः प्रसादियः सोयं भुंजीत सुखलालया ॥
चराचरप्रसादान्नभोक्तुस्तच्छेषधारणात् ॥ चराचराणां भूतानामपि मुक्तिर्भवेत्प्रिये ॥ ९२ ॥ प्रसादभोक्तृलिंगं जितेयजनाभक्तिसंयुतान् ॥ नेयाति पितृभिः सार्धं नरकं नात्र संशयः ॥ ९३ ॥ इति श्रीवरत्वा
करे प्रसादमाहात्म्यं नाम षोडशोध्यायः ॥ १६ ॥ कालिकाकांडे ॥ ध्यानरूपं महेशानं लिंगं रक्षानमश्नते स पच्यते महाघोरे नरके कालमक्षयं ॥ १ ॥ सोमशंभोर्लिंगपादे न संस्पृष्टे लंघते वापि यान
कं ॥ माज्ञोपकरणं चैव निर्माल्यं च न लंघयेत् ॥ २ ॥ वापवीये तरणं वा परिवाकार्थमर्दं वा जलमेव वा ॥ परस्यापहरं जंतुर्नरके प्रवृध्यते ॥ ३ ॥ तरणं काष्ठफलं पुष्पं फलाशं वेहरेत यः ॥ धर्मार्थ केवलं
चैव ममस्थापतितो भवेत् ॥ ४ ॥ शिवधर्मे ॥ स्वामिनां लभ्यमानानां उच्छिष्टानां च संभ्रमे ॥ परस्त्रीनामनाहृत्ता मे नरस्ते पलहरणं ॥ ५ ॥ अलाभेपि परस्वेषु यो मनो नैव यच्छति ॥ कर्मणा मनसा वाचा
सततः शिवतां व्रजेत् ॥ कूर्मे ॥ आदत्तानाश्रमैर्युक्तं सोमतत्त्वाय कल्पते ॥ न्यायागतधनः शांतो ब्रह्मविद्यापरायणः स्वधर्मपालको नित्यं सो मतत्त्वाय कल्पते ॥ ६ ॥ निर्धिपरस्य न ब्रूयान्न स्तत्राणि
न निर्दिशेत् ॥ मसिक्षायादमाञ्जेण शिवत्वमुपजीवति ॥ ७ ॥ लोभान्मोहात्स पच्येत कल्पांतं नरके नरः ॥ तन्नीयांशे न वित्तेन प्रकुर्वीत शिवार्चनं ॥ ८ ॥ न्यायोपार्जितवित्तः सन् अन्यायं परिवर्जयेत्
उन्यायार्जितवित्तेन नरकायैव केवलं ॥ ९ ॥ सत्येन लोकं जयति सत्यं तत्परमं पदं ॥ यथाभूतार्थवादं तु सत्यमाहुर्मनीषिणः ॥ १० ॥ शिवधर्मे ॥ स्वानुभूतं स्वदृष्टं च यो रथार्थं न गूहति ॥ यथाभूतार्थ
कथनं मिथ्येन तत्सत्यलक्षणं ॥ ११ ॥ सत्यं सत्यं पुनः सत्यं एतद्वा सत्यलक्षणं ॥ परपीडाविनिर्मुक्तं यो रघाद्वचनं सदा ॥ १२ ॥ अश्वमेधशतं पूर्णं सत्यं तत्साम्यमाश्नुते ॥ सत्ये प्रतिष्ठितं ज्ञानं धर्मः सत्ये प्रतिष्ठि
तः ॥ १३ ॥ सत्ये प्रतिष्ठितं शौचं प्रतिष्ठितं ॥ १४ ॥ कामात्मोहाद्भयाल्लोभात्सत्यं नातिक्रमेद्द्विजः ॥ संध्यातिक्रमणाद्दोषो ब्रह्महत्यासु च्यते यथा ॥ १५ ॥ असत्यं न वदेत्किंचित् न सत्यं च परित्यजेत् ॥ यत्सत्य
ब्रह्मविस्याहुः सत्यं ब्रह्मस्वरूपकं ॥ १६ ॥ अनृतं पुरुषं ग्राम्यं येमुत्तं पापहेतुकं ॥ सौरे ॥ अहिंसा सर्वभूतानां भवेद्दानं रुत्तमं ॥ अहिंसा परमो धर्मः सर्वेषां प्राणिनां ततः ॥ १७ ॥ यद्दानमभयं सस्या
त्सर्वदानोत्तमोत्तमं ॥ तस्माद्देवि परिहर्तव्या हिंसा सर्वत्र सर्वदा ॥ १८ ॥ सर्वधर्मेषु विप्रेंद्रा स्वाहिंसा परमो मतः ॥ तस्मादहिंसानिरतः शांतः शिवजनप्रियः ॥ १९ ॥ भक्तिं शिवे समास्थाय तस्मिन्जन्मनि मुच्य

ते॥ शिवधर्मशास्त्रे॥ अहिंसा परमो धर्मः शक्तानां परिकीर्तितः। अशक्तानामयं धर्मो दानयज्ञादिपूर्वकः॥२०॥ पापे रमन्ति ये लोके पापिष्ठास्ते नराधमाः॥ अभूतसंप्लवं पावत्पच्यन्ते नरके ध्रुवं॥२१॥
आत्मवत्सर्वभूतेषु यो हिताय शिवाय च॥ सततं वर्तते नित्यं सद्भिरहिंसेयमुदाहृता॥२२॥ सर्वशास्त्रेषु वेदेषु यज्ञास्तेषां नु तत्फलं॥ यो हिंसन्नपि भूतानि तस्य पुण्यं न तोलितं॥२३॥ त्रैलोक्यमपि यो दद्यादखि-
लं रत्नपूरितं॥ परेन प्राणियज्ञाश्च न तत्तुल्यमहिंसया॥२४॥ न तत्सरंभवस्यामिळंचिद्यागमेस्वयं॥ पुंसामखिलदेवानां दानमद्भुतमुत्तमं॥२५॥ सर्वभूताभयं दत्वा यश्चरेत् शान्तमानसः इहैव स-
र्वभूतेभ्यो न भयं तस्य विद्यते॥२६॥ यो न हिंसति भूतानि चराणि स्थावराणि च। स भूतात्मेति निरतं प्रणंशं निमवाप्नुयात्॥२७॥ स्वगृहे यो नरः कुर्यादाराहिंसानिवारणं॥ अनरिष्टप्राणिसंभा-
तः हवेसाय शिवं जयेत्॥२८॥ जपेद्दशसहस्रं तु स्नेत्रविघ्नो वधे न च॥ हत्वा शृङ्गिस्त्वयं वा लं शिवं पंचशतं जपेत्॥२९॥ जपेद्दशसहस्रं तु गजाश्वादिनिपातने॥ सौरे॥ अनतास्मारदार्पाञ्चूतथामस्-
स्यभक्षणात्। अश्रौतधर्माचरणात् क्षिप्रं नश्यंति वै कुलं॥३०॥ शिवधर्मे॥ मौनं वृतं महापुण्यं हुंकारादिविवर्जितं। कर्मेण्णमनसा वाचाहिंसां तत्रविवर्जयेत्॥३१॥ सदा मौनं वृतेनिष्ठ मौनं सर्वार्थसाध-
कः॥ शिवधर्मे॥ यस्त्वासार्थ्यपरो थं वा समस्तेन्द्रियसंयमः॥ न कार्यसंभवेन्नित्यं तदाशुः शमलक्षणं॥३२॥ असीराणां शेषदोषाणां शिववार्तापि दुर्लभा। प्रक्षीणशेषदोषस्य मुक्तानंदरतास्पदा॥३३॥ देवदेव-
परिज्ञानेवां ध्यायन्ति सवृतं शिवाशा भवणो दुःखोपघालस्यास्य सुखः॥३४॥ विनाश्य सकलं सर्वं दुःखं नरो रवं वृजेत्। यास्वरूपं परमध्येदुर्निवारं महामुने॥३५॥ यदा ज्ञानं भवकारणं तु ज्ञाप्यन्त पाशि-
वं पुनर्बन्धनं यातधन्ना मारन्यपरो भवेत्॥३६॥ अहोरात्रस्य पक्षस्य मासः संवत्सरस्य च॥ उपवासवृतानां नुतत्फलं वाचिकार्चनं॥३७॥ अंगवंगकलिंगाश्च मालवो गुर्जरस्तथा॥ आहिरः कोंकणाश्चैव नारवि-
डो दक्षिणापथः॥ अवंतिर्मागधीश्चैव देशानेतान्विवर्जयेत्॥१॥ शिवधर्मे॥३॥ यत्र देशे शिवो नास्ति वीरमाहेश्वरो जनः तत्र स्थानेन कर्तव्यं विध्वंनरवनांतरे॥२॥ स्वयंभु यत्र वा लिंगं यत्र वा शिव-
योगिनः॥ समंतात् योजनं तत्र वाराणस्याः समं विदुः॥३॥ कीदृशे ह्यपि देशेषु नलिंगं यदि पूजितं तत्र योजनपर्यंतं वाराणस्याः समं विदुः॥४॥ कीदृशे ह्यपि देशेषु यत्र भूतिविभूषणाः॥ तत्र शंभुप्रस-
न्नो वै नित्यं कैलासीसमं ततः॥६॥ यस्मिन्देशो वसेन्नित्यं भूतिशासनसंयुतः॥ ग तो परच्छयावापि सर्वतीर्थसमो हि सः॥७॥ अंत्यजो वाधमो वापि मूर्खो वा यदि तो पिवा। यस्मिन् सदा शिवः सोमः सर्व

भक्तगरोर्वृतः ॥८॥ सर्वतीर्थं च देवाश्च सान्निध्यं कुर्वते सदा ॥ अध्यात्मचारगेहस्थित्वा शिवक्षेत्रे वसेन्नरः ॥९॥ देहान्ते शिवसायुज्यं जायते नात्र संशयः ॥ सोरे सो पियाम्निशिवस्थानं पदेवैरपि दुर्लभं
तस्मात्तत्र वसितं कुर्याच्छिवक्षेत्रे समीपतः ॥१०॥ लिंगसारे ॥ सती सुताश्च भर्त्याश्च लिंगार्चनरताः शुभाः ॥ लिंगार्थितप्रसादाश्च अस्मे दुष्टा न संशयः ॥११॥ दासी गोपाश्च भत्याश्च गृहभृत्युव कालया
लिंगसंसर्गोरताः कार्याश्च न्ये दुष्टा न संशयः ॥११॥ दासी गोपाश्च भत्याश्च गृहभृत्युष कालया ॥ लिंगसंसर्गोरताः कार्याश्च न्ये नीचा न संशयः ॥१२॥ लिंगार्चनरता नारी सुतकी च रजस्वला ॥ रविर
ग्निर्यथा वा यथा पुत्र दत्तो दिग्गतोः शुचिः ॥१३॥ शिवधर्मे ॥ शिवार्थं वचनं त्वेषां संता नार्थं च मे पुनः ॥ भुक्त्यार्थं जीवनं तेषां स्वार्गार्थं जीवनं हितम् ॥१४॥ चंडालाग्निरमेध्याग्निः सुतकाग्निर्गर्हितः
पयितस्ताग्निश्चिताग्निश्च मण्डाग्रहमाग्निश्च तः ॥१५॥ पूजालोपो न कर्तव्य सूतके मृतकेपि वा । जलद्रव देहस्त स्मा लिंगं सदार्चयेत् ॥१६॥ धर्मपत्न्याश्च गमनं विधिनात्र विधीयते ॥ स्त्रियो वै मर्त
शुश्रूषां विधाय व्रतनत्पराः ॥१७॥ प्रयाति नरकं घोरं नात्र कार्या विचारणा ॥ गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥१८॥ पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ अथ भर्तृविहीना या धर्मं वक्ष्ये
सदाशिवे ॥१९॥ व्रतं दानं तपः शौचं भूशय्या नक्तभोजनं ॥ ब्रह्मचर्यं सदा स्नानं भस्मना सलिलेन वा ॥२०॥ शान्तिर्मौनं क्षमा नित्यं संविभागो यथाविधि । शिवधर्मे ॥१०॥ शिवभक्तिः सदा सा
निरहिंसा सर्वदा शमः संतोषः सत्यमस्तेयं ब्रह्मचर्यं तथाष्टकं ॥२१॥ लक्षणं ब्रह्मचर्यस्य समस्तेन्द्रियसंयमः ॥ ब्रह्मचर्यास्थितं सत्यं ब्रह्मचर्ये स्थितं तपः ॥२२॥ ब्रह्मचर्ये स्थितं ज्ञानं ब्रह्मचर्ये स्थिता
क्षमा । पत्निषे ब्रह्मचर्येको न तत्र स्यात्संस्थितः शिवः ॥२३॥ एकरात्रे स्थितः स्यापि यागनिर्व्रतचारिणः ॥ ब्रह्मस्थोपि न तां याति प्राप्ते वर्षशतैरपि ॥२४॥ मैथुनं यः समुत्सृज्य चेतरात्सो निराकुलः ॥ अहो
रात्रं पतिः श्रीमान् सर्वसंस्रोमंत्रियातनः ॥२५॥ रात्रौ न भोजनं कुर्यात् मुनिर्वै ब्रह्मचर्यवान् ॥ एकपादयुगेरतो ॥ ब्रह्मचर्ये स्थितो यस्तु लिंगमभ्यर्चयेत्सदा ॥ तस्य मोक्षो भवेद्देवि अन्ते कामो विनश्यति
॥२६॥ शिवधर्मे ॥ ब्रह्मचर्यं तपो ध्यानं शान्तिरहारलाघवं ॥ एभिस्तेन तपसोरूपं सुघोरं यं च लक्षणं ॥२७॥ क्षमा शान्तिश्च संतोषः सत्यमस्तेयमेव च ॥ ब्रह्मचर्यं शिवज्ञानं वैराग्यं भस्मसेव
नं ॥२८॥ ऋतुकालाभिगामित्वं स्वदारेषु च नान्यथा ॥ सर्ववर्ज्यं रहस्यस्य ब्रह्मचर्यमुदाहृतं ॥२९॥ रागस्य वशगत्वं यः शान्तिरेषा सुनिर्मला ॥ क्रोधस्तस्य रूपाय तस्मात्तस्मात्क्रोधं विवर्जयेत् ॥

शै०र०
३७

३० क्षमा दानं क्षमा सत्यं क्षमाहिंसा क्षमा श्रुतं ॥ क्षमा स्वर्गश्च मोक्षश्च येन जगज्जनैः ३१ सकृत् सात्त्विकोपि दानसत्तपस्वी जितेंद्रियः । येनाशु शांतिखड्गेन क्रोधशत्रुर्निपातितः । ३२ । यत्तु वसंतसौरत्वस्यैः
पतितैः सह संवसेत् ॥ सोपि तत्समतां याति नाम तो ज्ञानतोपि वा । न मूर्खैः सह संवासः पतितैर्नैकरावनः ग्निश्च्यानिंदाररतैश्चैव परमेश्वरनिंदकैः ॥ ३४ ॥ सौरे ॥ येस्तु स्वंदुःखदं शार्गाणि वा दंवर्जयेत्स
दा ॥ मूर्तयो याः शिवस्याष्टौ तासां निंदां विवर्जयेत् ॥ ३५ ॥ सौरे । वेदनिंदां शिवप्रियं वा स्वयं नाचरेत् च न धर्मतः ॥ कालिकाकांडे । मन्निमित्तकृतं पापमपि धर्माय कल्प्यते ॥ मामनादृत्य धर्मोपि पापं स्यात्मत्
प्रभावतः ॥ ३६ ॥ श्रीहिंसा काश्यपे भक्ता लालिंदंति महेश्वरान् । त्रिशूलपाणिना सर्वे हतास्ते न संशयः ॥ ३७ ॥ शंकरस्नेहसंजातो रक्षणीयः प्रयत्नतः । नरक्षरणात्स्नेहस्य लोके संमोदते नरः
॥ ३८ ॥ उत्तमं सर्वमरणाद्दुत्तं परमात्मरं । शिवनिंदाकरं हत्वा पापीतः स्वयमेव वा ॥ ३९ ॥ यस्त्यजेद्दुस्तस्याण्णान्न पुनः सोभिजायते ॥ शिवनिंदाकरं हन्तुमशक्तोपि स्वयं हतः ॥ ४० ॥ सद्य एव विमुच्येत त्रि
सप्तकुलसंयुतः । शिवार्थं यस्त्यजेत्प्राणान् शिवभक्तार्थमेव वा ॥ ४१ ॥ शिवाचारपरं यच्च शिवविधार्थमेव वा ॥ तेन न सदृशः कश्चिन्मुक्तिमार्गेभिनो नरः ॥ ४२ ॥ वीरभद्रीये । त्रैलोक्ये प्राणिनः
सर्वे न हंतव्याः प्रयत्नतः । शिवकार्येषु वक्ष्येत हंतव्यश्चवशीप्रतः ॥ ४३ ॥ वातुलतंत्रे शिवनिंदाकरं वा संस्मृत्वा तद्भक्तोऽन्नं ॥ कुर्यात् तत्र वा गच्छेद्दशाक्तोपि हितं श्रुतौ ॥ ४४ ॥ शिवद्रव्यापहारणप्रयाति
मनुजाधमः ॥ हत्वा तस्मारणं कुर्यात तस्मात्तत्परो भवेत् ॥ ४५ ॥ शिवचिह्नविधिं चैव हन्त्यघोर्जितो नरः ॥ तस्यहंता सह स्वेन वीर माहेश्वरो बुधो ॥ ४६ ॥ शिवालय विषये कुर्यादपराधं कदाचन ॥ शिवालये शिव
ग्रामे शिवाराम गृहे रक्षणे ॥ तत्कार्यमनिशं कुर्याद्भ्यानदयहारिणां । सौरे । शिवनिंदाकरं द्रव्यापहारेन तन्यत्नतः । हत्वा तस्मात् पुनर्यत्तु स याति परमां गतिं ॥ ४८ ॥ वातुलतंत्रे शिवविक्रयकरं भूतो हमि
ति निस्यं नभावयेत् ॥ तत्कार्यं सकलं कुर्यान्मत्कृतं यमितिवद्बुवन् ॥ ४९ ॥ वीराचारः ॥ वीरभद्रीये । यश्छद्मच्छिद्रिशिवस्याश्यो नाक्षिपते यदि । यस्तुनामिवतस्यैक न कुर्यात्सोऽस्य देहिकं । ५० । नेवाशो वे
प्रकुर्वीत तत्सुत्रायेर्विशेषतः ॥ खनेवाभुविनिद्देहं रहे वाम्पुचिनाग्निना ॥ ५१ ॥ स्त्रियेद्वार्तु महासेनं त्यजेद्वा काष्ठलोष्ठवत् । अथैनमपि चोद्धिश्य पक्कमेचेत्कर्तमीप्सितं । ५२ । कल्याणमेव कुर्वी
त भक्त्या भक्तो श्वनर्ययेत् ॥ जितेंद्रिया स्याससततं त्यक्त्वा सक्रोधनं श्रमे ॥ ५३ ॥ स्नानं च परिवादं च स्त्रीणामालोचनं तथा । गंधमाल्यरसं तत्कं जायते दंतधावनं ॥ ५४ ॥ सर्वे पर्युषितं वर्ज्यं हतं चापि

गलेन यः ॥ सर्वभूतानुकंपी स्यात्संविभागरतः सदा ॥ ५४ ॥ परिवादं मृषावादं निद्रालस्यं विवर्जयेत् ॥ मानं मदं तथा शोकं द्वेषं च परिवर्जयेत् ॥ ५५ ॥ चिंतयन्नुपरतात्मानं शयानं योगनिद्रया ॥ भिन्नासनं
भिन्नशय्यां वर्जयेद्भिन्नभाजनं ॥ ५७ ॥ शिरोभ्यंगावशिष्टेन तैलेनांगं न लेपयेत् ॥ न सर्वशस्त्रैः क्रीडेत स्वांगानि न संस्पृशेत् ॥ ५८ ॥ न संहताभ्यां पाणिभ्यां कंडूयेदात्मनस्तनुं ॥ न वामहस्ते
नोद्धृत्य पिबेद्वक्त्रेण वा जलं ॥ ५९ ॥ सौरे ॥ अक्लींबरधरो नित्यं सुगंधिः प्रियदर्शनः ॥ न जीर्णं वस्त्रं च परिदध्यात्कदाचन ॥ ६० ॥ सोमशंभौ ॥ प्रातरुत्थाय संचिंत्य शिवाय शिवमक्षरं ॥ उत्सृजेन्म
लमूत्रादेर्गत्वा देशं यथोचितं ॥ ६१ ॥ शिवधर्मे ॥ भूप्रदेशे यथोक्ते तु स्वदेहमलमूत्रके ॥ विसर्जयेन्न चान्यत्र हस्तात्तपसमीपतः ॥ ६२ ॥ सोमशंभौ ॥ उत्तराभिमुखो मूत्रादि वा संध्यासु सर्वदा ॥ दक्षि
णाभिमुखो रात्रौ नासाग्रन्यस्तलोचनः ॥ ६३ ॥ न तत्र रोमपत्रांगे भस्मदत्योष्ठे न वा गृहे ॥ न तु गोमयपाषाणे दांतभिस्म कदाचन ॥ ६४ ॥ विसृज्यांभस्तदा पात्रं निधाय जलांतिके ॥ ततः समुद्धृ
तैर्लोयैर्विशुद्धैः शौचमाचरेत् ॥ ६५ ॥ अथवा भावसंशुद्धिपर्यंतं शौचमाचरेत् ॥ भावोपि भविनाशुद्धिं शुद्ध्येन्मुनिमिमतः ॥ ६६ ॥ आचमेद्विधिवद्धस्तं धावनमाचरेत् ॥ न ततो मुखसंशु
द्धिर्दंतानां धावनं विना ॥ ६७ ॥ शौचं न मज्जलैः कुर्याद्गंधलेपोपमोचनं ॥ सौरे ॥ शौचं पश्चात्प्रकुर्वीत गंधलेपक्षयावधि ॥ अंतरं च मनःशुद्धिर्येषां भवति ते द्विजाः ॥ ६८ ॥ गंधलेपविहीनो
पि भावशुद्धो विशुध्यति ॥ भावशुद्धो भवेच्छुद्धिः शुद्धभावस्ततो भवेत् ॥ ६९ ॥ असंस्कारो भवेत्सर्वो योपस्पांगे मलं वसेत् ॥ तस्मान्न संस्पृशेल्लिंगं नरो निर्माल्यदूषितः ॥ ७० ॥ सोमशंभौ ॥ गंडूषैः स्वयं
संख्यातैर्विधाय स्नानमाचरेत् ॥ शौचमाभ्यंतरं विधान्न बाह्यं शौचमुच्यते ॥ अंतःशौचविमुक्तात्मा शुचिरप्यशुचिर्यतः ॥ शिवधर्मे ॥ उदकुंभसहस्रैश्च मृद्भाराष्टकशतैरपि ॥ अपि वर्षसहस्राणि
स्नाप्यमानो न शुध्यति ॥ ७२ ॥ भावपूतं भवेच्छौचं वस्त्रपूतं जलं शुचि ॥ दृष्टिपूतं न्यसेत्पादं सत्यपूतं वचो वदेत् ॥ ७३ ॥ सदाचारः ॥ सदाचारं प्रवक्ष्यामि सम्यग्ज्ञानस्य साधनं ॥ यस्मात्सदाचारहीन
स्य सर्वे दोषाशयः स्मृताः ॥ १ ॥ सत्सं चैव वैदिकाद्धिकानाम्यमार्गाश्रितं शुभे ॥ यन्मोक्तं वैदिकैः शास्त्रैस्तत्सदाचार उच्यते ॥ २ ॥ आचारः परमो धर्मो आचारः परमो धनं ॥ आचारः परमा विद्या आचारः
परमा गतिः ॥ सदाचारेण देवत्वं ऋषित्वं च वरानने ॥ उपागतानां कुयोनित्वं मनुष्याणां तद्विपर्यये ॥ ४ ॥ आचारहीनः पुरुषो लोके भवति निंदितः ॥ समयान्निंदिते लोके लोकल्पाधरोस्य यः ॥ ५ ॥ सा

क्रि॰र॰
३८

नमाचारहीनेषु सर्वदेवसमन्विते ॥ दुष्टचंडालभांडेषु यथा भागीरथीजलं । अनाचारयुतः कष्टः सर्वदोषसमाश्रयः ॥ ६ ॥ पावस्थाने क्वचित्सा स्मात् सर्वदोषविवर्जितः ॥ यस्मात्तस्य सपुत्र
षः ससम्यग्वृत्तिमान्भवेत् ॥ ७ ॥ वर्णाश्रमविधानोक्तं धर्मं कुर्वीत यत्नतः । यस्य हि हितं कर्मेतत्कुर्वन्नपि पिपः सदा ॥ ८ ॥ परदाराः परद्रव्यं परनिंदां च सर्वदा । क्वचिदपि न कुर्वीत वाचा च मनसा तथा ॥ ९ ॥
विभीतकार्केकैरंडस्नुहिच्छायां च च नाश्रयेत् ॥ एको न गच्छेदध्वानं वृक्ष्यांन्तनरे त्वरिं ॥ १० ॥ नावारोहेन्न कुयारि नारोहेद्दुष्टपर्वतान् । अग्निना न रहे मातावग्निं पञ्चा न लंघयेत् ॥ ११ ॥ अग्निनो ष्णू
यमानीतो नाग्नौ किंचिन्मलं त्यजेत् ॥ न नखाग्रजलैर्धौतं स्नानवस्त्रं पटोदकं ॥ १२ ॥ अजश्वानखरोष्ट्राणां मार्जारस्य शनैं नराणां ॥ पुण्यं पुराकृतं हंति हंतिश्रियं हंति हरेरपि ॥ १३ ॥ मार्जनो मुखवा
नौच चर्माग्निलमुखाग्निलो ॥ सन्नूरायुर्हरं त्येते संस्पृष्टा पुरुषस्य तु ॥ १४ ॥ कौशेयं पारपं वापि चार्मं चैलमथापि वा ॥ दारवं तालपर्णं वा आसनं परिकल्पयेत् ॥ १५ ॥ अथ स्नानं सोमशंभो ॥ यो
पि कुंडपत्ने षु गृहे वा स्नानमुत्तमं ॥ कूपोनकुक्कुरश्वानकाकंकखरादिभिः ॥ १६ ॥ ग्रामसूकरगर्द्धोष्टै नरश्वपः स्पृष्टपरवा ॥ श्मशानपतितप्रेतमुनिकाम्यभोजने ॥ १७ ॥ कृते परिग्रहाने नवि
नास्नानान्न शुध्यति ॥ तथा नग्नेलिंगी गोमेस्पृष्टे वा नरो स्नानमाचरेत् ॥ १८ ॥ शुक्लविण्मुत्रसंपर्के नाभेरूर्ध्वं करोति ना । वमने वमने स्वप्ने चावगाहेन शुध्यति ॥ १९ ॥ आर्त्तो तु विधिशुद्धेन संहितामं
त्रिनेन चाग्निरत्याद्विधाने न भस्मना स्नानमाचरेत् ॥ २० ॥ योस्नात्वा न मन्नमश्नाति सोहि वै पापवत्तरः ॥ तस्मात्स्नात्वा तु भुंजीत भस्मना सलिलेन वा ॥ २१ ॥ प्रातःस्नात्वा भसा गच्छेद्भस्मना
वपि वा परं ॥ आग्नेयं भस्मना स्नानं वायव्यं रजसा गवां ॥ २२ ॥ दिव्यासात्तववर्षे राकेट स्नानमनुत्तमं ॥ गौरवं गुरुपादोदा स्नानं संस्नानमुत्तमं ॥ २३ ॥ अथ भक्तिसंकरदोषः ॥ यो लिंगद्वेष्टिसं
मोहात्स्वदेव नमस्कृतः ॥ २४ ॥ नरो नरकगामी स्यात् संभाषणादपि । लिंगसारो रागयुर्मध्य यो वेषपावकुदेव तु दूषकः ॥ तत्संभाषणतो नित्यं न लिंगी चत्तथा भवेत् ॥ २५ ॥ एकपादपुरा
रो ॥ यो निंदति शिवं शास्त्रं गुरुं चैव तपस्विनं ॥ तेषां भोजनदाने न दाता च नरकं व्रजेत् ॥ २६ ॥ कालिकाखंडे ॥ ब्राह्मणोपि चतुर्वेदी हृद्भक्ति विवर्जितः ॥ तस्य दानं न दातव्यं नरलेहिखले यथा
॥ २७ ॥ सौरे ॥ अपूज्यपूजने नैव पूज्यानां चाप्यपूजनात् ॥ नरः पापमवाप्नोति महद्वै नात्र संशयः ॥ २८ ॥ शिवभक्तिमतिक्रम्य यज्ञान्यस्मै प्रदीयते ॥ निष्फलं तद्भवेद्दानं नरकं च प्रपद्यते ॥ २९ ॥

वीरभद्रीये। कृत्वा दुर्गलकं वध्याय जे देवं त्रियंबकं॥२०॥ अर्चनादक्षिणाकाले महत्त्वं परमुत्तमं॥ पापी कोपि परिभ्रष्टो नास्तिको देवनिंदकः स तेषां स्पर्शनं कृत्वा पूजायां निष्फलं भवेत्॥ दुष्टु
रवस्वरूपाचारो मूर्खः खगुरुनिंदकः॥२२॥ लिंगाचारः सदाचारो भक्ताचारस्तथैव च। शिवाचारो गणाचारः सर्वमुक्तिषु दुर्लभः॥ पंचाचारो महात्मानो लिंगसारे प्रसज्जनाः॥ सर्वलोकेषु सस्मायां
सुलभो गणमुख्यस्त्वहं॥२॥ उत्तमां वृत्तिमाश्रित्य नीचां वृत्तिं समाश्रितः॥ आरुह्य पतितो ज्ञेयः सर्वकर्मबहिष्कृतः॥३॥ विशुद्धभावनायुक्तः शिवैकगतमानसः। विशुद्धमाप्नुयात्स्थानमचिंत्यं
सर्वगं ध्रुवं॥४॥ वीरभद्रीये। पतिव्रतः स्वभावेन विहाय परदेवताः। शिवमेकं भजेद्यस्मात्सर्वशांतिकरं परं॥५॥ शिवरहस्ये॥ नान्यदेवमभिध्यायन्नान्यदेवं प्रपूजयेत्। नान्यस्य नाम गृह्णामि वै
न चौरवृत्तं मम। ६॥ अपि कीटपतंगो वा भवेयं शंकराज्ञया। न तु शक्रत्वमाप्तं तं त्रैलोक्यमपि कांक्षये॥७॥ च॥ न नाकपृष्ठं न च देवराज्यं न ब्रह्मलोकं न च विष्णुलोकं॥ न धर्मकामार्थमनोत्व
त्वान्यद्गणोमिहरस्य दासत्वमहं वृणोमि॥८॥ अतो वरमहं काशी निधनं वापि शंकरात्॥ गच्छतो वा जनाः शक्रपदेऽप्यहं न त्यजे त्यपि तं॥९॥ शिवधर्मे॥ शिवमेकं परित्यज्य योन्यदेवमुपासते
न विनोजानुवी नीरे रूपं त्वन्निदुर्मतिः॥१०॥ कालिकाखंडे॥ अथ रुद्रनमस्कारः सर्वकर्मफलो ध्रुवं॥ अन्यदेवनमस्कारे न तत्फलमवाप्नुयात्॥११॥ अपूज्यपूजने चैव पूज्यानां चाप्यपूज
नात्॥ नरः पापमवाप्नोति महादेवे न संशयः॥१२॥ सौरे॥ यस्तु लिंगार्चनं त्यक्त्वा देवानन्यान्प्रपूजयेत्॥ स लं विहाय मूढात्मा यथा काचमपेक्षते॥१३॥ ब्रह्मगीतायां॥ विष्णुभक्त्या च मद्भक्त्या
नास्ति नास्ति परं गतिः॥ शंभुभक्त्यैव सर्वेषां सत्यमेव मयोदितं॥१४॥ विष्णोरपि परं तत्त्वं महादेवं प्रणाति धि। विनाजंतुः समभ्यर्च्य मुच्यते न हि संततमाः॥१५॥ शिवपूजापरो भूत्वा यो
न्यदेवमनुस्मरेत्॥ अष्टाविंशतिकोटिस्तु नरकान्यान्स सो ध्रुवं॥१६॥ जाबालस्मृतौ॥ शंभोर्निर्माल्यसंस्पृष्टं भुंजीयात्सर्वदा द्विजः॥ अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत्॥१७॥ लिं
गसारे॥ लिंगार्चने कशरणो योन्यदेवं नमस्यति॥ नरकं नायकं गत्वा पश्चान्निगर्भे वुजायते १८ लिंगार्चनैकशरणो योन्यदेवं नमन्यदेवं नमस्यति॥ नरकं नायकं गत्वा पश्चान्निगर्भे वुजा
यते १८ लिंगार्चनैकशरणो योन्यदेवं तु मन्यते॥ नरकं नायकं गत्वा कुष्ठी पंगुश्च जायते॥१९॥ लिंगार्चनैकशरणो योन्यदेवं तु वंदते॥ नरकं नायकं गत्वा त्रिदोषो च प्रजायते॥२०॥ सौरे

केचिद्धिंसंतु प्रशंसंति वृत्तलोचप्रवापरे॥ ८८ सम्प्रशंसंति ऋषयो दग्धकिल्बिषाः ॥२१॥ वीरभद्रप्रिये देवान् सर्वान् परित्यज्य एकमेवेदं दृष्ट्वेश्वरं॥ नमुख्यं परिगत्याद् लोकधर्मं समाचरेत्॥२२॥ नास्य
शास्त्रं समादिष्टं नवाम्भो देवनां स्मरेत्॥ शिवज्ञानविचार्यो॥ ईश्वर उवाच॥ सदाचारं प्रवक्ष्यामि सम्यग्ज्ञानस्य साधनं॥ यस्मात्सदाचारहीनस्य ज्ञानं निष्फलतां व्रजेत्॥२३॥ सदाचारेण देवत्वं ऋषि
त्वं च वरानने। उपागताः कुयोनित्वं मनुष्यास्तद्विपर्यये॥२४॥ आचारहीनः पुरुषो लोके भवति निंदितः। सदाचारान्नित्यं देवि लोकरूपधरो यहं २५। तस्मात्सर्वप्रयत्नेन सम्यगाचारवान्भवेत्॥ था
तुल्लंते॥ सतिसु नश्यमस्य श्रवणसीगोपलब्धेव चा॥२६॥ सर्वलिंगार्चकाः श्रेष्ठाः ल्वस्य चंडालवद्भवेत्॥ यः शिवाचारसंपन्नो सुनाचारेण मिश्रितः। नप्रसादेन चाचारी सर्वभक्षी च वायसः॥२७॥
गृहस्थे तेच वीजं च धान्यानि च धनानि गोः॥ एतल्लिंगांकितं शुद्धमन्यथा नरकं व्रजेत्॥२८॥ रहस्ये॥ भक्तहस्तगतं द्रव्यं धनं वस्त्रं विभूषणं॥ नरिमाग्रांकितं ग्राह्यं स्यं शुद्धिरिहोच्यते॥२९॥ नरिमाग्रांकितं क्षेत्रं
पुत्रः वशरणपर्वैः॥ नदेवपावनं क्षेत्रं क्षेत्रसिद्धिरिहोच्यते॥३०॥ राज्ञो मध्य मध्यामे वृक्षसुपेश्वरिवलिंजंतु शुभ्रोदप्रसादभोगश्चकाल शुद्धिरिहोच्यते॥३१॥ जलपाकक्रियापांचभांडशुद्धिरिहोच्यते॥ अमन्तःदर्श
नाभावास्य क्षमन्नं वरानने। ३२। शास्त्रवेतैलादिकं सर्वपाकशुद्धिरिहोच्यते॥ भक्ते नयत्लं नवेश्म लिंगमुद्रां समन्वितं। अमनःस्पर्शनाभावाद्देह शुद्धिरिहोच्यते॥ लिंगार्चनविधौ भक्तः काष्ठमौनं समाच
रेत्॥ इत्वाच भावनां लिंगे भावाद्देह शुद्धिरिहोच्यते। लिंगार्चनविधौ भक्तः काष्ठमौनं समाचरेत्। इत्वाच भावनां लिंगे भावशुद्धिरिहोच्यते॥३६॥ सर्वभूतदयानित्यं पंचभूतेषु सत्क्रिया। सभूतयोषणाभावो
भूतशुद्धिरिहोच्यते॥३७॥ समपारणधनं भक्ते धनप्राणाभिमानकेः त्रिसंध्यमर्चनादेवी मार्गशुद्धिरिहोच्यते॥३८॥ विनयः सर्वभक्तानां क्रियते हि तथा गिरा॥ तद्वत्तद्वचश्चानुकूल्यं हि नय शुद्धिरिहोच्य
ते। ३९। यत्नेनाधीयपयत्नं मांसिकं वर्जयेत्ततः। तद्वर्जनं भवेद्देवि रसशुद्धिरिहोच्यते॥४०॥ विभूतिसंस्नानं कार्यं भक्तानीनं च समवृते॥ तथैव योग्यं काष्ठेषु काष्ठशुद्धिरिहोच्यते॥४१॥ तरणविंदुलनादि
निभक्तानीतानि चैव हि॥ संस्कृत्य भस्मनादेविनरणा शुद्धिरिहोच्यते॥४२॥ भक्तहस्तशुद्धं तंयलं पत्रादिकं समं॥ अथवा स्वहस्तपक्वानि शुद्धिं सांवृत्ति कामना॥४३॥ ६॥ संसारः षड्विधाः मो
क्षाजलं पुष्पं फलानि च॥ पत्रं पात्रं तथा गोत्रं भक्तानां भक्तवत्सल। ४४। भक्तहस्तमवं क्षुपं प्रस्यहं तर्पणं जलं॥ भस्ममंत्रपवित्रं च गृहीतं जलसंस्कृतिः॥४५॥ नवकुंभगतं तोयं मदर्थं भवि नामपि॥

नज्ञात्वा लिंगयोग्यं च अन्यदृष्ट्वा जपते सुधीः ॥४६॥ अस्पृश्यानि च पुष्पाणि विमुक्तानि स्थितानि सुरैः ॥ अनैरपि च तान्येव पुष्पसंस्कारसंभवं ॥४७॥ यानि यानि फलान्येव भक्तहस्तगतानि वै । अभक्त-
दर्शनाभावात्कथ्यते फलसंस्कृतिः ॥४८॥ पत्राणि चक्रवर्णानि भक्तहस्तभवानि वै । तस्य शाकादिपाकोपि कथ्यते पत्रसंस्कृतिः ॥४९॥ पात्राणि जंगमादीनि तस्य दरजसा शिवे ॥ तेनापि पावनं वि-
स्वं कथ्यते पात्रसंस्कृतिः ॥५०॥ गोत्राणि प्राक् गोत्राणि तत्र संबंधकारणं । भयभक्तिपरा तत्र कथ्यते गोत्रसंस्कृतिः ॥५१॥ वातुलतंत्रे । ईश्वर उवाच । ईश्वराज्ञितनयैः शिष्यो गृहं शुश्रूषसेवये तु ॥५२॥
दासोहं भावसंयुक्तः सर्वाचारनियुक्तकः ॥ दासोहं धर्मतो हेतुर्दासोहं जन्मनाशनं ॥५३॥ दासोहं ज्योतिरूपं च दासोहं निर्मलप्रभं ॥ दासोहं कुरुते यस्तु पार्वतीपरमेशयोः ॥५४॥ अचिरेणैव कालेन सर्व-
पापैः प्रमुच्यते ॥ दासोहमिति यो भक्त्या चिंतयेद्वृषभध्वजं ॥५५॥ संसारविषदंष्ट्रिभिः सर्वदुःखैर्नलिप्यते ॥ नदात्वं वीरदासत्वं मम त्वं वीरभूस्यकं ॥५६॥ समयः सकलावस्थः सज्जनषड्विधं तथा । आसे-
नियमसंनुष्ठोग्रुरूपां दांबुजार्चने ॥५७॥ कर्मयोगरतः प्राज्ञो दासभावं नुसज्जनं ॥ स्वामिभृत्यसमोपेतं परदैवविवर्जितं ॥५८॥ मद्भक्तं कांक्षितं वित्तं वीरदासं नुसज्जनं ॥ अकुलं कुलवंतं वा नमस्कारपु-
रःसरं ॥५९॥ भक्त्यानुभोजयेद्वीरस्य भावं नुसज्जनं ॥ दृष्टसिद्धियुतं प्रोक्तमीषणात्रयसंयुतं । असुरं कर्मयोगेन वीरमत्यं नुसज्जनं ॥६०॥ स्वगृहं स्वधनं चैव स्वदेहं भक्तिसंयुतं ॥ जंगमे स्थावरे स्थित्वा मत्यं सम-
याचारं नुसज्जनं ॥६१॥ अणिमादिगुरो स्वर्गमीषत्रयविवर्जितं । निर्मलं निरहंकारं कलावस्थं नुसज्जनं ॥६२॥ गुरोर्लिंगे रहो भक्तः सत्यवाचैजितेंद्रियः । सुवृतः सुमतिश्चैव दासभावार्चनक्रमः ॥६३
मुष्टिलिंगार्चनं नित्यं सज्जनं समयान्वितं ॥ अन्यथा दैवतं नास्ति वीरदासार्चनक्रमः ॥६४॥ पुष्पानुलेपनं वस्त्रं पात्रधामरणान्वितं । तांबूलागरुकर्पूरं सुगंधामोदपूरितं ॥६५॥ योजयेद्धेपत्रस्यं चधवले-
च्छत्रचामरैः ॥ स्तुतिस्तोत्रं प्रकुर्वीत भक्त्याचारार्चनक्रमः ॥६६॥ प्राणलिंगयुते तत्र सेहस्तस्वरूपं दत्वं च पत्रामृतं यं कजवद्धिंधाद्वीरस्यार्चनक्रमः ॥६७॥ तैलाभ्यंगं च वस्त्रं च रक्षा तं जंगमार्पणं सुखसं-
भावणां श्रीत्या समयाचारार्चनक्रमः ॥६८॥ चित्तं समरसं शांतं भावपुष्पं तु निर्मलं ॥ आत्मलिंगार्चनं नित्यं सकलावस्थार्चनक्रमः ॥६९॥ श्रीदेव्युवाच ॥ वीरवृत्तो नो भगवान् प्रकारस्तत्र कीदृशः ॥ के-
नाभवेद्दुरत्नेमे नियमास्ता असाध्या ॥७०॥ ईश्वर उवाच ॥ शृणु देवि तत्पायदृष्टा नियमात्कथयामि ते ॥ भक्तेरंगो वरान्सर्वान्वीरवृत्तपुरःसरान् ॥७१॥ विकसंनिसृक्तान्तो निःसुरभीरपुष्पलात्स्वहं ॥ संपा

श्रे॰ र॰
४०

घण्टोत्तरशतं संख्यानि प्रतिवासरं॥ ७२॥ यावज्जीवमवश्यं तैः पूजयिष्यामि शंकरं॥ तदभावेन भोक्तव्यमेतद्वीरव्रतं मम॥ ७३॥ सोऽहं चंदनपंकेन सकर्पूरसुगंधिना॥ सर्वदा पूजयिष्यामि मयि जीवति शंकरं
७४॥ गंधमक्षतसंयुक्तं दत्वा भोक्ष्यामि शंकरे॥ अन्यथा संकल्पमात्रेण वीरव्रतं मम॥ ७५॥ कल्पयिष्यामि कर्पूरमवश्यं मासंसंयुते॥ तांबूलार्पणवेलायां मन्माराध्ये शापसंभवे॥ ७६॥ नखुत्संगमपिष्या
मि न किंचिदपि वासरं॥ यावज्जीवं नैपतरेतद्वारव्रतं मम॥ ७७॥ वनस्पतिरसैर्दिव्यैर्देशांगे स्सुमनोहरैः॥ धूपं समर्पितं भूतनाथमर्पयतो मम॥ ७८॥ अद्यप्रभृति नश्यंतु निखिलास्ते च वासराः॥ ध्रुवं
मदं तर्पयंतमेतद्वीरव्रतं ममः॥ ७९॥ द्वात्रिंशत्तु संख्यितं वर्तिकाभिर्मनोहरं॥ दीपं घृतेन दास्यामि स्मरवैरिणे॥ ८०॥ इत्याद्यासमये नित्यं हंसत्वे न प्रतिमुतं॥ उपहारं महारम्यं हरणपरमात्मने॥ ८१॥
कालेतु वर्तमाने च कालेप्यविनिसर्वदा॥ यदि वै विषमानोऽहमेतद्वीरव्रतं मम॥ ८२॥ सुगंधकेन किरलाछाया समनोरमैः॥ नागवल्लीदलैर्मिश्रं सुपूगफलयं च कं॥ ८३॥ तांबूलमर्पयिष्यामि प्रत्यहं मन्यु
मन्यवे॥ उपहारं महारम्यं पंचभक्ष्यसमन्वितं॥ ८४॥ नित्यं नित्यापदास्यामि सर्वदा स्मरवैरिणे॥ मदीयेन प्राणेरेण नियमोयमतः परं॥ भविष्यति विनादेवि एतद्वीरव्रतं मम॥ ८५॥ रसवंति सुगंधीनि सुगं
धीयानि कानि च॥ फलानि यं च भक्ष्याणि स्वादूनि प्रतिवासरं॥ ८६॥ नैवेद्यार्पणवेलायामर्पयिष्यामि शंभवे॥ सर्वैर्मन्त्राणां पर्यंतमेतद्वीरव्रतं मम॥ ८७॥ मनोज्ञैरप्यसौवर्णमेकं पुष्पं पुरद्विषः॥ श्री
पारणयोः पूजासमये प्रतिवासरं॥ ८८॥ अर्पयिष्यामि नियतो यदि स्यान्तरसंभवः॥ दास्यामि नेत्रमुस्यालचैनद्वीरव्रतं मम॥ ८९॥ इत्यादि व्रतसंकल्प वीरव्रतविशेषकः॥ केनापि वस्यमारो न नियमाग्नि
चवासरे न॥ ९०॥ शिवरहस्ये॥ सदा कालं शिवे पंक्तिर्लिंगजंगमपूजनं॥ एकपत्निव्रतं चैव महामाहेश्वरव्रतं॥ ९१॥ शिवधर्मो शिवज्ञानी शिवकर्मरतः सदा॥ वीरशैवाभिधस्स्याच्छिवोच्छिष्टैक
भोजनः॥ ९२॥ तांबूलं नेत्रे दोसाम्रकरणो॥ एकनिष्ठाव्रतं शीलं द्वितीयं यो न मन्यते॥ परिच्छेदकरं वीरमाहेश्वरमभीष्टदं॥ ९३॥ तथाप्येतस्मरेत्स्मं नयश्चेच्छरणुपान्न वनवासं नापि कुर्वीतजन्मांतर
शतैरपि॥ ९४॥ यद्गेहे ब्रह्म्यदेवोस्ति न तद्गृहाणि परित्यजेत्॥ यद्गेहे भविप्रोऽस्ति न तद्गृहाणि परित्यजेत्॥ ९५॥ यद्गेहे शिवनिंदास्ति न तद्गृहाणि परित्यजेत्॥ यत्र वाचारनिंदास्ति न तद्गृहाणि परित्यजेत्॥ ९६॥ पि
वनिंदारतो भक्तिनिंदाभवेद्यदि॥ हंतव्यास्तु विचारेण वीरमाहेश्वरव्रतैः॥ ९७॥ मातरः पिता भ्रैव भ्रातरो बांधवास्तथा॥ कलत्रमप्यपुत्रास्त्वहंतव्याः पापविनिःक्राः॥ ९८॥ शिवद्रुमापहारापम

वृत्तो मनुजाधमः। ज्ञात्वा तन्मरणं कृत्वा तद्भागिनं समाहरेत्॥१००॥ शिवभक्तस्य मरणं प्रविधाते दुरात्मनि॥ न कदाचित् हृपां कुर्यात् न्नार्दनपरो भवेत्॥१॥ शिवचिह्नधरं चापि हन्ति यो दुर्जनो पुनः॥
सहंतव्य स्वहस्तेन वीरमाहेश्वरव्रतैः॥२॥ शिवात्मविषयं किंचित् यदापराधं करोति च न॥ कस्याप्याचारतो द्रोहं ज्ञात्वा किंचित्न्मभा नयेत्॥३॥ मातरः पितरश्चैव भ्रातरो बांधवस्तथा। शिवकार्ये भुवः काले
हंतव्याः शीघ्रमेव ते॥४॥ परं ज्योतिः परं रूपं मम माहेश्वरव्रतं॥ मद्भक्तमत्स्यैस्मम्स्वेच्छया वर्तते नरः॥५॥ स याति नरकं घोरं रौरवं पूर्वैर्दशापरैः वृत्तमथ मम त्वं ह्यस्थात्यासने शयने यथा। स पंक्तिभो
जनं कृत्वा पतंति यमशासने॥६॥ शिवरहस्ये॥ देवद्रव्यं गुरुद्रव्यं चैवद्रव्यं न येवच। भक्षये नरकं पाति उपैस्मेन कुलक्षयः॥७॥ गुरुद्रव्यं गरलं द्रव्यं मद्भक्तस्य च मंदिरे॥ अनुग्रहेणसंबो कार्यं भावाभा
वे निवर्तते॥८॥ शिवनिंदा गुरोर्निंदा शिवज्ञानस्य दूषणं॥ देवद्रव्यापहरणं गुरुद्रव्यविनाशनं॥९॥ हरंति ये च संमूढाः शिवज्ञानस्य पुस्तकं॥ सुमहत्पातकान्याहुर्निरंतरफलानि षट्॥१०॥
ये त्यजंति शिवाचारं शिवभक्तान् द्विषंति च। शिवनिंदासमा हे ते महांतः पातकोत्तमाः॥११॥ आज्ञाभंगो गुरोर्द्रव्यहरणं गुरोरप्रियवर्तनं॥ गुरुद्रोहमिति प्राहुस्तत्संसर्गं परित्यजेत्॥१२॥ कामतो य
था लिंगं विशीर्णं पतितं भवेत्। प्रायश्चित्तं ततश्चास्ति सत्संसत्संवरानने॥१३॥ अस्याप्यायव्यत्वात्कार्यभेदे पापं महत्तरं॥ आयाति तेन कर्तव्यो न प्रमादात्कदाचित्॥१४॥ लिंगवास्योप
जीवी च प्रतिलिंगप्रसारकः॥ भुंजीत क्रिमिकीटं च जायते मलजन्मनि॥१५॥ पुत्रकर्मविवाहादि संबंधः शिवकर्मभिः॥ कर्तव्यः शिवभक्तेन यथा लोके स्वजातिभिः॥१६॥ आयवीपसंहितायां
पातकस्यास्वपित्राद्यैः शिवधर्मे नियोजिता॥१७॥ साभक्ताय प्रदातव्या नापराय विरोधिने॥१७॥ दत्ता चेत्यात् कूलाप्रमादाद्बोधयेत्पतिं॥ अशक्तोत परित्यज्य मनाधर्ममाचरेत्॥१८॥ दे
वतार्थं तु पचनं येषां संतानार्थं च मैथुनं॥ स्वर्गार्थं जीवितं तेषां नरकार्थं विपर्यये॥१९॥ चर्मपात्रे जलं तैलं न स्नात्स्वभक्तवत्सले॥ गत्यते परिभक्ते नरो रौरवं नरकं व्रजेत्॥२०॥ अमेध्यादिरसाज्जा
तं मक्षिकासंचितं मधु॥ तस्यैव मरणात्तस्य सुरोदो यो न विधते॥२१॥ विवेकं दकशाम्र्ह्यादिश्वानमार्जालकुक्कुटाः। ततो यांग्रहणं कार्यमनर्थे विरतिस्मृता॥२२॥ पंचाक्षरोपरे शीचनरस्तुति
करो यदि॥ सो लिंगी सद्गुणाचारी कुक्षिः सनुविश्रुतः॥२३॥ बहुलिंगवक्रमंत्रं बहुभाषा बहुर्गुरुः॥ बहुचित्तं बहुभावो भवितो भववंधनं॥२४॥ भविनाशापनाद्यानां तत्संपर्कात्सहभोजनात्॥ संच

रंति महाघोरे नरके कालमक्षयं ॥२५॥ सर्वसमारंभाशेषे च नियमो मार्ऽवेन वा । धर्मो सकारशमोक्ताभक्तानां प्रभुं लोंऽछने ॥२६॥ कामं भक्तिरतो कुर्यात्क्रोधं वाधर्मकर्मणि ॥ लोभं शिवार्चने कुर्यान्मोहं
भक्तजनेषु च ॥ मात्सर्यं कारणं चैवमरं माया पराङ्मुखं ॥२७॥ इति शैवाल्लाकरे आचारस्थलं समसदृशो ध्यायः ॥१७॥ लिंगं श्वितनु प्राणं लिंगं जीवनुजीवनं ॥ लिंगतत्वपरिज्ञानं प्राणलिंगस्थलं
भवेत् ॥१॥ वायुप्राणगुणं सत्वा लिंगप्राणसमाहिते ॥ पुण्यपापमयं नास्ति प्राणलिंगस्थलं भवेत् ॥२॥ प्राणयस्य विलीयंति परमात्मनि शंकरे ॥ स प्राणलिंगसंबंधी नेवकेवलमानवः ॥३॥
यद्देहे स्थापितं लिंगं तत्प्राणोनुप्रतिष्ठितं ॥ प्राणलिंगस्य सा पूज्यं प्राणलिंगमितिस्मृतं ॥ प्राणो न प्राणनिर्देशः प्राणभावं परित्यजेत् ॥ प्राणलिंगप्रतिष्ठाप्य लिंगप्राणमिदं स्मृतं ॥४॥ अ
संस्कारी च यः प्राणलत्प्राणो जडएव च ॥५॥ संस्कारलिंगनिर्देशं लिंगप्राणं विनिर्दिशेत् ॥ प्राणशब्दं परित्यज्य लिंगशब्दप्रतिष्ठितः ॥६॥ लिंगनिर्देशनिरतो लिंगप्राणइतिस्मृतः ॥ प्राणलिं
गे प्रतिष्ठाप्य तत्प्राणं कुत्रवर्तते ॥७॥ तत्समे दंतजा नाति सोपि लिंगं न पूजयेत् ॥ निर्देशं प्राणलिंगस्य दर्शलिंगं न पश्यति ॥ लिंगं द्वेधि ये मूढो लिंगाचारं न पश्यति ॥ लिंगं च प्राणवन्नासं प्रसा
दनिर्हिणीनतुः ॥८॥ येनमेनहि मंत्रं लिंगसारोनरो दशो ॥ अग्निदुं स्तु न बालस्यकामक्रोधादिवर्जितः ॥१०॥ लिंगप्रसादलिंगी स्याल्लिंगसारपरायणः ॥ सत्त्व प्राणलिंगे च लिंगसंकारच
वा ॥११॥ प्रसादसंकरश्चैव गणत्वेन न युज्यते ॥ प्रसादं प्राणलिंगस्य यो भुंक्ते लिंगवर्जितः ॥१२॥ साम्यमांसं सरुधिरं सादरं भक्षितो भवेत् ॥ प्राणलिंगसमायुक्तः पादहस्तसमर्पितं ॥१३॥ गुरुवाक्य
उदासीनो भुंजीयात्किल्बिषं भवेत् ॥ प्राणलिंगं परित्यज्य यो न्यलिंगमुपासते ॥१४॥ स नरो नरकं याति यावच्चंद्रदिवाकरौ ॥ प्राणलिंगमविश्वस्य तो यं लिंगं तु विश्वसेत् ॥१५॥ स नरः स्वर्गमाप्नो
ति गणत्वेन न युज्यते ॥१५॥ कीर्तयेत्प्राणलिंगं वत्वन्यलिंगं न कीर्तयेत् ॥ अन्यलिंगप्रणामेन मरणत्वेन प्रयुज्यते ॥१६॥ प्राणलिंगसमायुक्तो नोपवासादिकं चरेत् ॥ मोहाद्यद्याचरे
त्तस्य प्रत्यवायो महान्भवेत् ॥१७॥ प्राणत्यागेभये प्राप्ते घोरे म्लनहरेजले ॥ अप्रमादे प्रमादे च प्राणलिंगं न वर्जयेत् ॥ प्राणलिंगे न विच्छिन्नो लिंगप्राणं गमिष्यति ॥ परोक्षे प्राणसंस्था
परो रवंनरकं व्रजेत् ॥१८॥ पितृवधमशास्त्रे लिंगाद्धस्तशतं यावच्छिवक्षेत्रे समंततः ॥ देहिनां तत्र यं चत्वं शिवसापुज्यकारणं ॥२०॥ मानुषैः स्थापिते लिंगे क्षेत्रमानमिदं स्मृतं ॥ स्वयंभुवे स

हस्तं स्यात्तर्षं स्याच्च नरर्धकं ॥२१॥ पापान्तारोऽपि पुरुषो मन्तो गच्छेच्छिवं पदं ॥ तस्मात्सर्वस्वं कृत्वा शिवसेवे समीयतः ॥२२॥ रहस्योऽयं प्राणलिङ्गसंलग्नो लिङ्गप्राणी स युज्यते ॥ शरीरं हि नान
स्य नरके कालमक्षयं ॥२३॥ यस्मात्मोऽलिङ्गनिष्ठः सो निष्ठितं यत्तं सलिङ्गकं ॥ तं देहं दहन्ते रवं नरकं व्रजेत् ॥२४॥ उत्तमो दश्यमानोऽपि निष्ठितो मध्यमो भवेत् ॥ कनिष्ठो दाहमाप्नोति शिवभक्तो मनोप
दि ॥२५॥ दग्धस्य देहं नास्ति पातकस्य पचनं तथापि वाग्निदग्धदेहस्य न च श्राद्धं न च क्रिया ॥२६॥ इति श्रीशैवरत्नाकरे प्राणलिङ्गस्थलं नाम अष्टादशोऽध्यायः ॥ १८॥ जंगमस्थलं ॥ जकारः क
थ्यते चैव गो मकारं स्मृतं उच्यते ॥ एवं त्रयं मयैर्नाविनिर्जंगम स्थ्यते ॥१॥ निस्संगत्वं निराभारं निर्देहं निरुपाधिकं ॥ निःसीमं निर्मलं चैव निरूपं जंगमस्थलं ॥२॥ वान्तलनं ते ॥ लिङ्गसेवे गुरु
स्थानं गुरुसेवे च जंगमः ॥ जंगमस्तु निराभारी भाराभारनिवर्तकः ॥३॥ शिवधर्मशास्त्रे ॥ लिंगद्वयं समाख्यातं चरं चाचरमेव च ॥ चरं वा निधिविख्यातं मचरं पार्थिवादिकं ॥४॥ चरे सदा वसत्येव प्री
तियुक्तो महेश्वरः ॥ अचरे मन्त्रसंस्कारैः स्वयं सन्निधिः शिवः ॥५॥ जटी मुण्डी शिखी वापि भिक्षाशी त्रिगतस्पृहः ॥ मौनीभूतानुकंपी च यतिः तपःक्षान्ति क्षमोत्तरं दृ जटाकलापधारी स्याच्छत्रपदस्तु वप
नं भवेत् ॥ यदेव पुण्यं जटिनां तत्सुराणं वपनाद्भवेत् ॥७॥ त्रिसंध्यामाचरेत्स्नानं भस्मस्नानं त्रिपुण्ड्रकं ॥ पत्रपुष्पफलैर्वं स्वैर्जंगमो लिङ्गमर्चयेत् ॥८॥ सर्वभूतदयाधर्म कर्मशंकरपूजनं ॥ नित्यं मनो ल
यो यस्य एवं जानाति जंगमः ॥९॥ अतिवर्णाश्रमधर्मास्ताविचरेत् कृतकृशिनः ॥ सर्वलोकहितार्थाय शिवज्ञानी जितेन्द्रियः ॥१०॥ माधुकरेण मार्गेण गृहस्तान्तेरकास्थः ॥ जंगमस्तु चरेद्भिक्षां यादृशी
यावतीमपि ॥११॥ पंचवा सप्त वा सुधियो भिक्षा सुमाधुकर्या स्मृता ॥ स्वसामयी कनिष्ठं समाचरेद्धुत निश्चलः ॥१२॥ चरेन्माधुकरं भैक्षां मद्यलेशकुलादपि ॥ एकान्नेन तु न भुंजीत रहस्यमिति समादपि ॥१३
माधुकरी चरेद्भैक्षा मेकान्नं परिवर्जयेत् ॥ उपवासात्परं भैक्षं मेकान्नं गृहिणो मलं ॥१४॥ यदा मक्षाद दानोऽपि भंगः पुष्पं न बाधते ॥ तथा माधुकरीभैक्षा मादि दीनगृहाधियान् ॥१५॥ भक्तेऽपि च पूज्या
स्पुर्वृत्तिनं शिवात्मैक्षुकाः ॥ अभिर्विना कृता यत्र सा पूजा निष्फला भवेत् ॥१६॥ गृहस्ता संविदानारस्त दहेद्वरे पुनः ॥ पारस्परमयेस्यं नेपूज्यपूजकभावतः ॥१७॥ अभक्तेभ्यो न गृह्णीयाद्भक्तेभ्योऽप
दिलभ्यते ॥ न वस्तुसंग्रहं कुर्यात् दारावांतरे पुनः ॥१८॥ सुवर्णधान्यप्रमुख वस्तुवस्त्रपजीवनात् ॥ अतिवर्णो यदि चरेत्सोऽयं पातकिकोऽवरः ॥२०॥ जटी मुण्डी शिखी वापी मुद्रायं च कभूषितः ॥ भस्मास्रै

शै॰र॰
४२

पुनर्ऌत्वाद्रोहिनसंशयः ॥२१॥ अलिंगी लिंगरूपेण यो लिंगमुपजीवति। स याति महाघोरे नरके कालमक्षयं ॥२२॥ लिंगलोभरतः संयुक्तो धान्यवेषं न धारयेत्॥ तद्भवो न संदेहो रौरवं नरकं
व्रजेत्।२३। स्थावरं चांगदेवेन वृत्तसेवेन जंगमः।२४ यो भिन्नं लिंगयोर्नार्चनं नाभिवंदनं।२४। आतुलतंत्रे॥ प्राणलिंगप्रतिग्राही प्राणजंगम एव च। सोऽपि तत्त्वमेव दृश्येन प्राणलिंगस्ततः।२५।
अस्मिन्नर्थे स्थावरं जंगमं चैव द्विविधं लिंगमुच्यते। जंगमस्यावमाने न स्थावरं निष्फलं भवेत्।२६। स्थावराराधनं पुण्यं जंगमाराधनाधिकं॥ स्थावराणां सहस्रेभ्यो जंगमस्तु विशिष्यते॥२७॥ कोटिषा
मन्त्रियापूजा मध्यमं गुरुपूजनं॥ उत्तमा जंगमार्चा तु विप्राः संसमर्चनं॥२८॥ वातुलतंत्रे॥ साहित्यं द्विविधं प्रोक्तं चराचरविभेदतः। प्रथमं चरसाहित्यं द्वितीयं चाचरं स्मृतं।२९। अतो न लिंगसाहित्यं च
रसाहित्यवंचनात्॥ क्रमेणफलदं लिंगं चरं साक्षात्फलप्रदं।३०। लिंगसत्कृतिभागश्च साहित्यं जंगमस्य च। तदभावे महादेवि कुर्याल्लिंगस्य सत्कृतिः।३१। स्वलिंगभजने देवि किं नु जंगमसंस्पृशि।
अतएव गुरुः साक्षात् जंगमः प्रभुरीश्वरः॥३२॥ जंगमेन विना देवि कर्मणा यः प्रचारतेऽपरि॥ स रौरवे नरके घोरे पुनश्चांगलजन्मनि।३३। इष्टलिंगार्पितं मुद्रं स्वदेहे स्पेव कारणं॥ गृहीतं जंगमात्सिद्धं
चराचरनिवर्तकं॥३४॥ मत्प्रसादरसं युक्तं यो भुंक्ते जंगमं विना। गुरुद्रोही शिवद्रोही मंत्रद्रोही विशेषतः॥३५॥ तस्मात्कारणात्गृहीत्वा स्वगृहे भक्तः प्राणलिंगं च जंगमं॥ मुद्रैः सिंहासने र्थ
स्थाप्य स्थापयेद्भवनाशनं॥३६॥ वस्त्रभूषणगंधादि पुष्पशय्यादि पंचकं॥ वाहनाद्यविलंब सुतडच्छिष्टं तु भोजयेत्।३७। गृहे क्षेत्रं च धान्यं च गोकुलं महिषीतथा। जंगमेष्टं नरं तत्र स्वे प्रसादं
निष्फलं भवेत्।३८। विवाहे च प्रतिष्ठासु गुणसंकुलपर्वणि। जंगमेष्टं विना भुक्तं प्रसादं निष्फलं भवेत्।३९। तैलाभ्यंगोद्वर्तने च स्नानभोजनमैथुने॥ जंगमेष्टं विना भुक्तं प्रसादं निष्फलं भवेत्
४० आसने शयने याने सर्वकर्मसु सर्वदा। असाधारणं चरं हत्वा रौरवं नरकं व्रजेत्।४१। भोज्यलेह्यं च चोष्यं च भुक्त्वा जंगमवर्जितं॥ आस्ते मलं समस्तानि चंगलग्रहसंभवं॥४२॥ जंगमं प्राणलि
गं चान्निवेद्यं च भोजयेत्॥ पश्यं निजं जंगमं पत्रं तत्र कार्या नमस्क्रिया।४३। जंगमे लिंगमात्मानं तत्र बाह्यविधार्चनं॥ तदाज्ञापालनं देवि मम्मानापरिपालनं।४४। इति जंगमार्चनविधिः॥ शिव
योगीप्रकरणं। अथ शिवयोगीश्वरः॥ शिवस्वभावयेषां कल्पिते निरुपाधिकः॥ तस्मिन्नेव मनो यस्य निर्मलयोगरहो अते॥१॥ वायवीयसंहितायां॥ मद्भक्ते नैव मार्गेण मप्येव स्थाप्य नेतसेव

स्यं नरं निरोधो यः स योग इति कथ्यते ॥ २ ॥ वैराग्यज्ञानसंपन्नः शिवशांतेन तेजसा । युक्तः ध्यानयोगेन शिव योगी स कीर्तितः ॥ ३ ॥ वातुलतंत्रे ॥ शिवज्ञानं शिवे भक्तिः शिवमुद्रा शिवव्रतं ॥
शिवलिंगार्चनं चेति शिवयोगो हि पंचधा ॥ ४ ॥ शिवयोगी शरीरे तु नित्यं सन्निहितः शिवः ॥ योगींद्रं पूजयेत्तस्मात् साक्षात्संपूजितः शिवः ॥ ५ ॥ युगपत्पूजितास्तेन ब्रह्माविष्णुमहेश्वराः । पित
रः सर्वदेवाश्च ये चार्चयेच्छिवयोगिनः ॥ ६ ॥ सर्वेषामेव भूतानामुत्तमः पुरुषः स्मृतः । पुरुषेभ्यो द्विजश्रेष्ठो द्विजेभ्यो ग्रंथपारगाः ॥ ७ ॥ ग्रंथज्ञाद्दृढपुरुषस्तेभ्यस्तत्त्वार्थचिंतकः ॥ ज्ञानात्सु विद्वन्म
ध्ये ज्ञानवृद्धो विशिष्यते ॥ ८ ॥ ज्ञानवृद्धसहस्रेभ्यो विशिष्टा योगिनः स्मृताः । योगिनः कोटिकोटिभ्यः परमं शिवयोगिनः ॥ ९ ॥ सर्वयज्ञतपोदानतीर्थदेवेषु यत्फलं ॥ तत्फलं लभते सर्वं संभोज्य
शिवयोगिनं ॥ १० ॥ ध्यायमानः शिवं योगी यो भुंक्ते संस्कृतं यदि । तदा साक्षाच्छिवे नैवेद्यं क्रतुशतं भवेत् ॥ ११ ॥ विप्राणां वेदविदुषां कोटिसंभोज्य यत्फलं ॥ भिक्षामात्रप्रदानेन तत्फलं शिवयोगि
नः ॥ १२ ॥ शिवयोगी गृहे यस्य भिक्षां गृह्णाति संस्कृतां ॥ कुलमुत्तारयेत्तस्य नरकार्णवसंस्थितं ॥ १३ ॥ शिवयोगिनमायांतं दृष्ट्वैव गृहसंस्थिताः ॥ क्रीडंत्योषधयः सर्वा यास्यामः स्वर्गमक्षयं ॥ १४ ॥
पितरं तु द्दिश्य श्राद्धेभ्यो योजयेच्छिवयोगिनं ॥ स्वर्गस्थैः स्वर्गस्थानमेकविंशत्कुलान्वितः ॥ १५ ॥ अपि नः स्वकुले कश्चिज्जनयेत्सुत्तमीदृशं ॥ यः संपूज्य शिवं श्राद्धे भोजयेच्छिवयोगिनं ॥ १६ ॥ त
स्यैते पितरस्तुष्टा यांति च पितामहाः ॥ अपत्यं पुत्रपौत्रो वा योगिनं भोजयिष्यतः ॥ १७ ॥ रूपान्वितं विरूपं वा मलिनं मालिनां वरं ॥ योगींद्रं शंकयानि समतिर्घिं न विचारयेत् ॥ १८ ॥ अस्मत्स्वम
पि यद्दत्तं शिवज्ञानार्थवेदिने ॥ तत्सहस्रफलं यावत्तावदनुभोगाय कल्प्यते ॥ १९ ॥ गंगास्नानादिकं पुण्यं दर्शनाच्छिवयोगिनां ॥ सर्वतीर्थाभिषेकेभ्यो लब्धं भाषणात्सुत्तमं ॥ २० ॥ मुच्यते सर्वपापेभ्यः
प्रणम्य शिवयोगिनं ॥ शुश्रूषयति तेन भक्त्या शिवलोके महीयते ॥ २१ ॥ ज्ञानयोगरतं शांतं रोगार्तं शिवयोगिनं । यः करोति नरः स्वास्थ्यं सर्वदानफलं लभेत् ॥ २२ ॥ ये योगिनं द्विषंत्यज्ञाः सर्वपा
पेष्ववस्थिताः । अधोमुखोर्ध्वपादास्ते पतंति नरकादिषु ॥ २३ ॥ अथ शरणस्थलमुच्यते । वातुलतंत्रे । स्वयं परं परं नास्ति स्वदेहं निर्मलप्रभं ॥ २४ ॥ स्वयं परं परस्य तथा निर्देशं परमेश्वरं ॥ अरूपं
वाचलानंदं शरणस्थलमुत्तमं ॥ २५ ॥ ज्ञात्वा ज्ञानविनिर्मुक्तं सुज्ञानं निर्मलप्रभं । स्वानुभावार्थनिर्देशं शरणस्थलमुत्तमं ॥ २६ ॥ निर्मोहं चानिरपेक्षं निर्देहं निरहंलिंगः । आत्मादिपंचकाशत्वं शर

शै.र.
४२

पुनं कृत्वा गुरोर्हितं संशयः ॥२१॥ अलिंगी लिंगरूपेण यो लिंगमुपजीवति । स यात्यनेन महाघोरे नरके कालमक्षयं ॥२२॥ लिंगलांछनसंयुक्तो धान्यवेषं न धारयेत् ॥ तद्धरो न सद्भक्तो रौरवे नरकं व्रजेत् ॥२३॥ स्थावरं चांगतो देवेन तूनतो देवो जंगमः ॥२४॥ यो मिथ्यालिंगयोरर्चनं तो मिवं दनं ॥२४॥ वातुलतंत्रे ॥ प्राणलिंगप्रतिष्ठाश्च प्राणजंगमरूपवत् । सोऽपि त्वमेव दृश्येत प्राणलिंग इति स्मृतः ॥२५॥ अस्मिन्नर्थे स्थावरं जंगमं चैव द्विधं लिंगमुच्यते । जंगमस्यावमाने न स्थावरं निष्फलं भवेत् ॥२६॥ स्थावराराधनं पुण्यं जंगमाराधनाधिकं ॥ स्थावराणां सहस्रेभ्यो जंगमस्तु विशिष्यते ॥२७॥ कृतिष्ठा मन्त्रिपापजामध्यमं गुरुपूजनं ॥ उत्तमा जंगमार्चा तु विप्राः सम्यगर्चनं ॥२८॥ वातुलतंत्रे ॥ साहित्यं द्विविधं प्रोक्तं चराचरविभेदतः । प्रथमं चरसाहित्यं द्वितीयं चाचरं स्मृतं ॥२९॥ अतो न लिंगसाहित्यं चरसाहित्यं वचनात् ॥ क्रमेण फलदं लिंगं चरं साक्षात्फलप्रदं ॥३०॥ लिंगसत्त्वे निभागश्च साहित्यं जंगमस्य च । तदभावे महादेवि कुर्यात् लिंगस्य सन्ततिः ॥३१॥ स्वलिंगभजने देवि किं तु जंगमसंसदि । अतएव गुरुः साक्षात् जंगमः प्रभुरीश्वरः ॥३२॥ जंगमे न विना देवि कर्मणा पाचरेत्परि ॥ स रौरवे नरके घोरे पुनश्चांगलजन्मनि ॥३३॥ स्वलिंगार्पितं मुद्दस्वदेहस्यैव कारणं ॥ गृहीतं जंगमात्सिद्धं चराचरनिवर्तकं ॥३४॥ मन्त्रसादिरूपसंयुक्तो यो भुंक्ते जंगमं विना । गुरुद्रोही शिवद्रोही भक्तद्रोही बहिष्कृतः ॥३५॥ तस्मात्कारणात् गृहीत्वा स्वगृहे भक्तः प्राणलिंगं च जंगमं ॥ मुद्रेः सिंहासने थ तस्मात्स्थापयेद्भवनाशनं ॥३६॥ वस्त्रभूषणगंधादिपुष्पशय्यादि पंचकं ॥ वाहनाद्यथवा त्वं वस्तु नष्टपिष्टं तु भोजयेत् ॥३७॥ गृहक्षेत्रं च धान्यं च गोकुलं महिषीं तथा । जंगमे त्वेन रत्नश्चेत्प्रसादं निष्फलं भवेत् ॥३८॥ विवाहे च प्रतिष्ठासु गुरुणा संकुलपर्वणि । जंगमे त्वं विना भुक्तं प्रसादं निष्फलं भवेत् ॥३९॥ तैलाभ्यंगोद्वर्तने च स्नानभोजनमैथुने ॥ जंगमे त्वं विना भुक्तं प्रसादं निष्फलं भवेत् ४० आसने शयने याने सर्वकर्मसु सर्वदा । असांनिरणं चरं कृत्वा रौरवं नरकं व्रजेत् ॥४१॥ भोज्यलेह्यं च चोष्यं च भुक्त्वा जंगमवर्जितं ॥ आस्थेमलं समस्तानि चंगल्यहसंभवं ॥४२॥ जंगमं प्राणलिंगं चानन्निवेद्यं च भोजयेत् ॥ पश्यंति जंगमं यत्र तत्र कार्या नमस्क्रिया ॥४३॥ जंगमे लिंगमात्मानस्तत्त्वे बाह्यविधार्चनं ॥ तदाज्ञापालनं देवि ममाज्ञापरिपालनं ॥४४॥ इति जंगमार्चनविधिः ॥ शिवयोगेश्वरणं ॥ अथ शिवयोगीश्वरः ॥ शिवस्वभावयेदेकं कल्पने निरुपाधिकः ॥ तस्मिन्नेव मनोवृत्तिर्मग्नयोगः ईहोच्यते ॥१॥ वायवीयसंहितायां ॥ मदुक्तेनैव मार्गेण मय्येव स्थाप्यते न संव

स्यं तन्त्रनिरोधो यः स योग इति कथ्यते ॥२॥ वैराग्यज्ञानसंपन्नः शिवशान्तेन तेजसा । युक्तः स्वाङ्गयोगेन शिवयोगी स कीर्तितः ॥३॥ वातुलतन्त्रे शिवज्ञानं शिवे भक्तिः शिवमन्त्रः शिवव्रतं ॥
शिवलिङ्गार्चनं तृप्तिः शिवयोगो हि पंचधा ॥४॥ शिवयोगी शरीरेषु नित्यं सन्निहितः शिवः ॥ योगीन्द्रं पूजयेत्तस्मात्तस्मात्संपूजितः शिवः ॥५॥ युगपत्पूजितास्तेन ब्रह्माविष्णुमहेश्वराः । पित
रः सर्वे देवाश्च ये च ये शिवयोगिनः ॥६॥ सर्वेषामेव भूतानामुत्तमाः पुरुषाः स्मृताः । पुरुषेभ्यो द्विजश्रेष्ठो द्विजेभ्योऽग्रंथपारगाः ॥७॥ ग्रंथज्ञाद्द्विपुरुषास्तेभ्यस्तत्त्वार्थचिंतकाः ॥ ज्ञानाभ्यविदोऽम
ध्येलक्षं त्वबुद्धो विशिष्यते ॥८॥ लक्षं बुद्धो सहस्रेभ्यो विशिष्टा योगिनः स्मृताः ॥ योगिनः कोटिकोटिभ्यः परमं शिवयोगिनः ॥९॥ सर्वयज्ञतपोदानलक्षेषु दत्तस्य यत्फलं ॥ तत्फलं लभते सर्वं संभोज्य
शिवयोगिनं ॥१०॥ ध्यायमानः शिवं योगी यो भुंक्ते संस्कृतं यदि । तदा साक्षाच्छिवेनैव तद्भुक्तमशनं भवेत् ॥११॥ विप्राणां वेदविदुषां कोटिं संभोज्य यत्फलं ॥ भिक्षामात्रप्रदानेन तत्फलं शिवयोगि
नः ॥१२॥ शिवयोगी गृहे यस्य भिक्षां गृह्णाति संस्कृतां ॥ कुलमुत्तारयेत्तस्य नरकार्णवसंस्थितं ॥१३॥ शिवयोगिनमायान्तं दृष्ट्वैव गृहसंस्थिताः ॥ क्रोशन्त्योषधयः सर्वा यास्यामः स्वर्गमुत्तमं ॥१४॥
पितरो दृष्टिपुष्टाङ्गा ह्येभ्यो भोजयेच्छिवयोगिनं ॥ स्वगृहे देवसंस्थानमेकविंशकुलान्वितं ॥१५॥ अपि नः स्वकुले कश्चिज्जनयेत्तत्र मीदृशं ॥ यः संपूज्य शिवं श्राद्धे भोजयेच्छिवयोगिनं ॥१६॥ त
त्संतिपितरस्तुष्टा गायन्ति च पितामहाः ॥ अपि नः पुत्रपौत्रो वा योगिनं भोजयिष्यति ॥१७॥ रूपान्वितं विरूपं वा मलिनं मालिनां वरं ॥ योगीन्द्रं शंकरं मत्वा निंदां न विचारयेत् ॥१८॥ अस्तत्वम
पि यद्दत्तं शिवज्ञानार्थवेदिने ॥ तन्महाफलयेपावत्तानुभोगाय कल्पते ॥१९॥ गंगास्नानादिकं पुण्यं दर्शनाच्छिवयोगिनं ॥ सर्वतीर्थाभिषेकेभ्यो लक्षं भाषणमुत्तमं ॥२०॥ मुच्यते सर्वपापेभ्यः
प्रणम्य शिवयोगिनं ॥ शुश्रूषयति तं भक्त्या शिवलोके महीयते ॥२१॥ ज्ञानयोगरतं शान्तं रोगार्तं शिवयोगिनं ॥ यः करोति नरः स्वास्थं सर्वदानफलं लभेत् ॥२२॥ ये योगिनं द्विषंत्यज्ञाः सर्वपा
पेष्ववस्थिताः ॥ अधोमुखोर्ध्वपादास्ते पतन्ति नरकादिषु ॥२३॥ अथ शरणस्थलमुच्यते ॥ वातुलतन्त्रे ॥ स्वयं परं परं नास्ति स्वदेहं निर्मलप्रभं ॥२४॥ स्वयं परं परं स्यात्तथा निर्देशं परमेश्वरं ॥ अखण्ड
वाचलानंदं शरणस्थलमुत्तमं ॥२५॥ ज्ञानाज्ञानविनिर्मुक्तं सुज्ञानं निर्मलप्रभं ॥ स्वानुभावार्थनिर्देशं शरणस्थलमुत्तमं ॥२६॥ निर्मोहं चानिरपेक्षं निर्देहं निरहंकृतिं ॥ आत्मादिपप्रकाशत्वं स्य

श्री·१०
४२

णास्थूलमुत्तमं॥२७॥ सुखदुःखमयं नास्ति पुण्यपापैर्न लिप्यते। न शीतं च न चोष्णं च शरणास्थूलमुत्तमं॥२८॥ यतिर्लिंगं स तीर्थाहमिति युक्तः स्वयंप्रभुः। आपंचि च सुखं नास्ति शरणास्थूल
मुत्तमं।२९। अनेक शरीरेणाहं संतिष्ठते स्थितौ। पापहा सर्वभूतानां स लोपादृशो नास्ति॥३०॥ बस्मे प अष्टवर्गा नास्ति वा षड्विधार्चनं। निर्भावो निजलिंगेऽस्य पृथिव्यां परयोगवत्॥३१॥
इति श्रीवरलोके पार्वयोगीप्रकरणं नाम एकोनविंशोऽध्यायः॥१९॥ पाराशर उवाच। तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते। द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे॥१॥ अभिगम्य कृते दानं त्रे
माहूय दीयते। द्वापरे याचमानाय कलौ सर्वाय दीयते॥२॥ अभिगम्योत्तमं दानं माहूतं चैव मध्यमं। अधमं याचमानं स्यात् सेवादानं तु निष्फलं॥३॥ कृते त्वस्थिगताः प्राणास्त्रेतायां मांसमाश्रिताः
द्वापरे रुधिरं प्राणाः कलौ त्वन्नादिकास्थिताः॥४॥ पितृवरहस्ये॥ भक्तः स्वजातियोगेन कर्मणा व्यवसायवान्। अतिथिप्रियकारी स्यात् तत्वविन्नानुसारतः। वित्तत्रीयभागेन प्रकुर्वीत शिवार्च
नं।६। कुर्वीत वा तदर्धेन यतो नित्यं हि जीवनं। वित्तं वित्तानुसारेण कृतकस्य भविष्यति।७। आत्मसादर्धमपि ग्रासं युक्तं दातुं तदर्थिने। कस्माज्जिता माया तमर्थिनं को न पूजयेत्॥८॥ द
न्तः स्वर्गमाप्नोति कोऽस्तो वंधुरिहार्थिनः॥ प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पंडितोऽपि वा।१०। यो दानकाले संप्राप्तः सोऽतिथिः स्वर्गसाधनः॥ न पृच्छेद्गोत्रचरणे न स्वाध्यायं च श्रुतं तथा
११। हृदये कल्पयेत्तस्मिन् सर्वदेवमयो हि सः॥ दूरादापथविश्रान्तो दानकाले उपस्थितः॥१२॥ अतिथिं तं विजानीयान्नातिथिं पूर्वमागतं। नैकग्रामीणमतिथिं मग्नहोतुकदाचन
१३। अतिथिस्त्यागतो यस्मात् यथाचातिथिरुच्यते। अपूर्वः सद्व्रती विप्रो ह्यपूर्वमपनलस्य वा।१४। विद्याभ्यासरतो नित्यं तपोपूर्वादिने दिने॥ॐ॥ अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते॥
१५। स तस्य दुष्कृतं दत्वा पुण्यमादाय गच्छति। १५। अतिथिश्चायया वारीच द्वावेतौ मम बांधवौ। अतिथिः सुकृतं दत्वा पापवारी दुष्कृतं भवेत्।१६। स्वदेहान्निर्विशेषेण शिवभक्तं प्रपालयेत्॥ भयया
गिप्ररोगेषु तेषां कुर्यात् प्रियाणि तु।१७। दारिद्र्याण्यवनिमग्नं हाहाभूतमचेतनं। समुद्धरय यथा शक्त्या सर्वान् कामानवाप्नुयात्।१८। यतिना सुरसंपन्नाकारण्यं चैव लादिश्च पशिरसां॥ कार
णात् सर्वभूतानां देयमन्नं स्वशक्तितः।१९। यदि चामन्त्रदेयं स्यात्तं ग्रासमपार्थिने गृहं॥ वाक्यान्यपि चेनेष्टानि प्रियाण्यनुगतानि च।२०। प्रत्युत्थानाभिगमने स्वागतं प्रियवादिनां। आसने चान्न

पात्रे च मुक्तेः सोपानकं स्मृतम्॥२१॥ शिवधर्मशास्त्रे। पात्रे देशे च काले च विधिना श्रद्धयान्वितम्॥ कृतं दानं कृतं चैवं दत्तं तत्फलं भवेत्॥२२॥ पात्रापात्रविवेकोस्ति धेनुपन्नगयोरिव। तृणात्संजायते
क्षीरं क्षीरात्संजायते विषं॥२३॥ सा स्यात्स्वहस्ताद्दानं सम्यक् शीलं तपःश्रुतं॥ एतत्स्वर्गमिति स्मृतं वरं पात्रस्य लक्षणं॥२४॥ किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयं॥ आगमिष्यति यत्पात्रं तत्पात्रं त
तारयिष्यति॥२५॥ न्यायोपार्जितवित्तस्य द्वे वानर्थकारणे॥ अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं॥२६॥ तथा आमपात्रे रसो यद्वन्नश्यति सह भाजनं। न दानमत्तेन यात्यत्ते सहपात्रे
णान नश्यति॥२६॥ तद्बीजमूषरे यद्वापितं निष्फलं भवेत्॥ भस्मनीव हुतं हव्यं यथाहितं तु निष्फलं॥२७॥ ज्ञानाग्निरहिते विप्रे तथा दत्तं निरर्थकं। तस्मात्पात्रतमं ज्ञात्वा शिवभक्तमकल्म
षं॥२८॥ तस्मै सर्वं प्रदातव्यमक्षयं फलमिच्छता। तत्पात्रं महत्तस्माद्दानमत्र पिपासवे॥२९॥ तस्मात्तस्मै सदा देयं प्रमाणफलादिभिः॥ सर्वेषामपि पात्राणामतिपात्रं महेश्वरः॥३०॥ यत्तत्पात्र
यत्तेपस्मात्तीव्रनरकार्णवे। शिवभक्तसदानं स्वपचोपि मम प्रियः॥३१॥ न तस्मादधिकं किंचिद्देयं पात्रमुत्तमं। असंयतः संयतो वा सर्वावस्थागतोपि वा॥३२॥ यो वा को वा शिवे भक्तः शिववत्सा
त्र उत्तमं॥ गुरुवत्पात्रपूजायां वरं शासनपूजनं॥३३॥ शासनं पूजयेत्तस्माद्विचार्य शिवाज्ञया। पात्रशासनयोर्मध्ये शासनं तु विशिष्यते॥३४॥ तस्माच्छासनमेवादौ पूजयेत्तादृशी यथा॥ त
स्मात्पात्रतमं ज्ञात्वा शिवभक्तमकल्मषं॥३५॥ तस्मै सर्वं प्रदातव्यमक्षयं फलमिच्छता॥ नाहं तपस्सु यज्ञेषु न हविर्भिर्विनानेन यस्तत्पुत्तमिरं हुतमश्नुस्वेन॥ यज्ञांगमस्य मुखेन अश्नतो नु घृतैः
तृप्तः समस्तविहितैर्निजकर्मपाकैः॥३६॥ शौर्यं तेज च वर्णरोहे तपोपन्नक्रियाश्रयः॥ तत्सौयतेव वर्णरोहे शैव वक्त्रे हुतं हविः॥३७॥ शिवधर्मशास्त्रे॥ नैवं पुरन्तेन सुरेश्वर्शा नाश्नामि हुते मयाः रसात्म
कृतजिह्वाग्रे स्वामि कमलोद्भवा॥३८॥ यत्र भुंजीत भस्मांगी मूर्खो वा पतितोपि वा। तत्र भुंक्ते महादेवः सपत्नीको वृषध्वजः॥३९॥ शिवस्य परिपूर्णस्य किं नाम क्रियते जनैः। यत्कृतं शिव
भक्तानां तच्छिवाय कृतं भवेत्॥४०॥ वायवीयसंहितायां॥ न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचोपि यः। तस्मै देयं ततो ग्राह्यं स च पूज्यो यथाह्यहं॥४१॥ शिवभक्ताय यद्दत्तं भक्त्या रत्नं यदर्चितं।
तदहं चानुग्रहामि तेनानंतं तदश्नते॥४२॥ श्वपचः शिवभक्तश्चेत्सत्तमोत्तमजन्मभाक्॥ तस्य कन्यादिदाने न दोषो मह्यं शिवः शिवे॥४३॥ पात्रविवेकः॥ वाराणसी कुरुक्षेत्रं प्रयागः पुष्कराणि

च। गंगासमुद्रसंयुक्ते मिश्रारण्ये कुरुक्षेत्रे॥४४॥ श्रीपर्वतो महारण्ये गोकर्णो श्वेतपर्वतः। इत्याद्याः कीर्तिता देशाः सुसिद्धनिषेविताः॥४५॥ सर्वेप्यावासमाः पुण्याः सर्वबाधाः सपर्वताः॥
गोसिद्धमुनिवासाश्च देशाः पुण्याः प्रकीर्तिताः॥४६॥ शिवायतनसंस्थाने यत्किमपि दीयते। तद्दत्तं तत्फलं ज्ञेयं शिवसेवानुभावतः॥४७॥ इति देशविवेकः॥ अथ कालविवेकः॥ ग्रहणे चंद्र
सूर्याभ्यां दक्षिणायनमुत्तमं॥ विषुवं च व्यतीपातं षडशीतिमुखं तथा॥४८॥ तिथिक्षये संक्रान्तिर्ज्ञेयं विष्णुपदं तथा॥ इति कालः समाख्यातः पुंसां पुण्यविवर्धनः॥४९॥ इति कालविवेकः॥ भक्तिभावः
परा प्रीतिः शिवधर्मैकतानता॥ प्रतिपत्तिर्ज्ञेयाः साधुपर्यायवाचकाः॥५०॥ अथ दानप्रशंसा सर्वेषामेव दानानामन्नदानं परं स्मृतं सद्यः प्रीतिकरं नित्यं बलबुद्धिविवर्धनं॥५१॥ नान्नदानसमं दानं
त्रिषु लोकेषु विद्यते॥ अन्नाद्भवंति भूतानि तदन्नामे म्रियंति च॥५२॥ त्वङ्मांसं वसा शुक्लं मज्जा त्वान्नवर्तते। शुक्लाद्भवंति भूतानि तस्मादन्नमयं जगत्॥५३॥ हेमरत्नाश्वनागेंद्रैः नारी[illegible]कवेर
नादिभिः॥ सकृद्दत्तैरपि संप्राप्ता नारमंति बुभुक्षिताः॥५४॥ गर्भस्था जायमानाश्च बालवृद्धाश्च मध्यमाः॥ आहारम[illegible]कांक्षंति देवदानवमानुषाः॥५५॥ क्षुधा हि सर्वरोगाणां व्याधिः श्रेष्ठत
मा स्मृता॥ तस्मात्सौषधलेपेन प्रतिकारः प्रकीर्तितः॥५६॥ क्षुधायन्त्रगृहीतस्य बद्धस्य देहिनः। अन्नमौषधमंत्राणां दानानि विषमेव च॥५७॥ नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षु
धासमः। नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः॥५८॥ अतएव मनुष्याणामन्नदानं प्रदानतः। यतः क्षुधाग्निसंतप्ता जीयंते सर्वदेहिनः॥५९॥ अन्नदः प्राणदः सर्वमिहामुत्र फलम
वेत्। यस्मादन्नदानयुक्तोऽगः कुरुते पुण्यसंचयं॥६०॥ अन्नदानतुलस्याग्रे [illegible] तिनसंशयः। धर्मार्थकाममोक्षाणां देहः परमसाधनं॥६१॥ स्थितिस्तस्यान्नपानाभ्यामतस्तत्सर्व
साधनं॥ अन्नं पिता महः साक्षादन्नं विष्णुः शिवः स्वयं॥६२॥ तस्मादन्नसमं दानं न भूतं न भविष्यति। आहारदानार्जितपुण्यपापाद्योर्घा पुरा[illegible]पि युतः सुखानां॥६३॥ स्त्रीरत्नं सुवर्णं च
महागुणानां स्वामी भवेत्सिद्धिप्रवरस्य॥६४॥ त्रयाणामपि लोकानामायुरन्नं जीवनं स्मृतं॥ पवित्रमन्नं दिव्यं शुद्धं सर्वरसाश्रयं॥ मीनकर्कटयोर्मध्ये यावत्तिष्ठति भास्करः। फलमेकं तु
तोयदानां सुवर्णकोटिदानेन॥६५॥ आरण्ये निर्जने पथि देशे तोयविवर्जिते। जलदानं तु यो दत्ते सोऽपुण्यसंख्या न विद्यते॥६६॥ मुहूर्तमात्र[illegible] प्रसन्नो भूरेव[illegible] गुणाधिकेन॥६७

तिन तस्मै सुरलोके वासं च स्मिन्समाहे भुवि भूमिराज्यः ॥६६॥ भक्तेभ्यः स्वेन दत्तानि ज्ञाना पुत्रेण भार्यया । भ्रात्रा पित्राथ दत्तानि पुण्यप्रस्त्राणुपद्रवं ॥६७॥ पितृभ्यो मातुलेभ्यो मातृभ्यो दत्तानि या-
नि चात्मदत्ताधिकपुण्यानि पूर्वदत्तानि यानि वै ॥६८॥ ये पालयन्ति भूतानां लोकपाला समाहिते । पश्चाल्लिङ्गार्चके दत्वा भूमिं गोचर्ममात्रकं ॥६९॥ भूलोकाधिपतिर्भूत्वा शिवेन सह मोदते
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनं ॥७०॥ परदत्तापहारेण स्वदत्तं निष्फलं भवेत् । स्वदत्तां परदत्तां वा यो हरेत शिवसंपदं ॥७१॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ यो हरेद्दवनिं भ-
क्तेदत्तां स्वेन परेण वा ॥७२॥ हरेणाभिर्धनं येषां पुरं देशं च हारयेत् । विष्ठाटवी सुनो यासु भुक्को रवा शिवः ॥७३॥ क्लसे वस्त्राः भुजायन्ते भक्तदत्तापहारकाः । न हरेद्वसुधां विप्रे दत्तं स्वल्पफला-
मपि ॥७४॥ गुणानारण्यरूपाणां भुक्ता भोज्यामिवा स्वजां । एकैव भगिनी लोके सर्वेषामेव भूभृतां ॥७५॥ नभोग्या न करग्राह्या विप्रदत्ता वसुंधरा ॥ भक्ते सेत्रमुखं वच्छा नित्यं तल्पं पुरस्थितं
॥७६॥ कुल्यायाः परतो नेतास्वामी गंतार्यमांगिकं । भक्तक्षेत्रप्रसंगेनु नराणामुपकारिणां ॥७७॥ पुण्यानां पितरः पुण्याभवन्ति स्वर्गसंमुखाः ॥७८॥ महादानं नृपः कुर्याद्भक्तोपकरणान्वि-
तं । बंधुपुत्रपुत्तोसज्ञमहद्यपतिर्भवेत् ॥७८॥ सकृल्लिङ्गार्चके दत्वा सुवर्णं वाणुमात्रकं । देवेभ्यः पूज्यते सम्यग्गणमुख्यो गणेश्वरः ॥७९॥ सकृल्लिङ्गार्चके दत्वा वस्त्रमात्रं पटच्चयाण्कथ्
त्रैलोक्ये राज्यं शिवसायुज्यमाप्नुयात् ॥८०॥ सकृल्लिङ्गार्चके दत्वा धेनुं वरूपयोधरां ॥ रुद्रलोके वसन्ति यावद्रोमाणि तन्मयशोः ॥८१॥ फलमूलानि भक्तायपणाकानि विविधानि च ॥
सकृल्लिङ्गार्चके दत्वा शिवलोके महीयते ॥८२॥ कुमुकं नागरं पत्रं चूर्णं कर्पूरमिश्रितं । सकृल्लिङ्गार्चके दत्वा दत्तामुत्र सुखी भवेत् ॥८३॥ यथा सुराणां सर्वेषां परमः परमेश्वरः ॥ तथैव सर्व-
दानानां विद्यादानं परं स्मृतं ॥८४॥ धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः । तस्मादारोग्यदानेन दत्तं चास्मात्रनुत्तमं ॥८५॥ आकाशस्य यथा नान्यैः सुरैरप्युपलभ्यते ॥ दत्वा दारो-
ग्यदानस्य नान्तं संविद्यते क्वचित् ॥८६॥ यो दद्याच्छिवभक्तानामुपानत्काष्ठपादुके । स वराश्वेन यानेन सुखं याति शिवं पदं ॥८७॥ छत्रदानेन गच्छन्ति यावच्छत्रेण देहिनः । शिविका-
संप्रदानेन गजस्कंधे व सुखं याति शिवं व्रजेत् ॥८८॥ शय्यासनप्रदानेन पुष्पारामप्रदायकः । देवायतनकर्ता च यज्ञोनामाश्रमस्य च ॥८९॥ अनाथमंडपानां च कर्ता यान्ति गृहोत्तमेः ॥

श्रे०१०
४५

देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकाः॥६०॥ पूज्यमाना नरा यांति नाके नयथा सुखं॥ ये न पंति रिपवः सर्वा पांति दीयप्रदायिनः॥६१॥ विश्राम्यमाणा गच्छंति गुरुशुश्रूषणे रताः
पद्मादिदंसमुत्सृष्टं न्यायप्राप्तं च यद्धनं॥६२॥ भक्त्यापतन्ति वेधंस्माद्वन्त्यानं न पूजार्थिभिः॥६३॥ यद्यदाम्रहितं लोके ततद्ध्यमवेश्चयत्॥६४॥ ततद्गुणवते देयं फलमक्षयमिच्छतां॥ द्वाविमो
पुरुषौ लोके स्वर्गस्योपरि तिष्ठतः॥६५॥ दुर्भिक्षे चान्नदाने च सुभिक्षे च हिरण्यदः॥ अयवस्त्यपरस्यार्थी स्यपरेभ्यः प्रयच्छति॥६६॥ स नरो नरकं याति यस्यार्थस्तस्य तत्फलं॥ अनित्यानि शरी
राणि विभवे नैव शाश्वतः॥६७॥ नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः॥ अरन्यपि महीं कृत्स्नां विप्रान्नपरिसान्तलं॥६८॥ उत्पन्नं न पिवाकाशं नारं नमुपतिष्ठति॥ यस्मिन्काले चरेच्छो
च वयसा याऽऽदृशेन च॥६९॥ कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते॥ गच्छार्थानिवर्तंते श्मशानात्मित्रबांधवाः॥७०॥ सुकृतं दुष्कृतं चैव गच्छंतमनुगच्छति॥ अनुकूलं विरोधेयं यतः पुरस्तात्तु सः
१००॥ प्रतिकूलेन दत्तं वयं यतः सर्वं हरिष्यति॥ न्यायोपार्जितवित्तस्य माग स्वहिरसणां॥१॥ तडागोरसंस्थानां परिवाहे खं भसां॥ दानेभोगिनाशास्ति त्रोगत्यो भवति वित्तस्य योन ददाति न
भुक्ते तस्य तृतीया गतिर्भवति॥२॥ त्यक्ते न तिष्ठताधस्त्त्वादुःखेनापरिमीलता॥ दारयाचकयोर्भेदः करवाम्यामेवसूचितः॥३॥ द्वारं द्वारमटंत्येते भिक्षुकाः पात्रपाणयः॥ दर्शयंतीव लोकानामदातुः
फलमीदृशं॥४॥ रक्षमनिशं मूढ त्वामाभून्नलपरागजनाः॥ भाग्यक्षये राशी यत्ते नो यभोगे न संपदः॥५॥ नद्यथा भवंति नम्रास्तरवः फलोद्गमैर्नवांबुभिर्भूरिविलंबिनो घनाः॥६॥
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणां॥६॥ पिबंति नद्यः स्वयमेव नांभः स्वयं दंति नः स्वादुफलानि वृक्षाः॥ वसुंधरा न क्वचिदपि संख्यपरोपकाराय सतां विभूतिः॥७॥
छायामन्यस्य कुर्वंति स्वयं तिष्ठंति चातपे॥ फलंति च परार्थाय नात्महेतोर्महाद्रुमाः॥८॥ स्वयमापद्गतोऽप्यन्यं क्लेशं तु दंति सज्जनाः॥ इंदुस्तमो नुदत्येव राहुग्रस्ते तेनरैः करैः॥९॥ किमत्र चित्रं य
त्संतः परानुग्रहतत्पराः॥ नहि स्वदेहशैत्याय जायंते चंदनद्रुमाः॥१०॥ संपदो जलतरंगविलोला यौवनं त्रिचतुराणि दिनानि॥ शारदाभ्रपरिमलवमायुः किं धनैः परिहितानि कुरुध्वं॥११॥ धर्मस्या
दिनिवासु कीर्त्तेरिति वा प्रोत्कुं प्रियेरोत्तिवा पिपासानुष्ठितमंजसेदमिति वास्यान्नेपृष्ठेनिवा॥ ऐश्वर्यस्य फलं किमस्य दिति वा लोके मनोऽस्मीति वा चित्ते मे यदरेन्द्रयादि रोतिवा दाने विधेयं शुभं॥


।१२। इति श्रीवरत्नाकरे वनृपाचंद्रपुष्करिणि नाम विंशोध्यायः ॥२०॥ लैंगे शिवभक्ता महोत्साहाः शिवार्चनपरायणाः ॥ संपन्ना धर्मसंपन्नाः शिवाः सर्वार्थसाधकाः ॥१॥ सर्वद्वंद्वसहा धीरा नि
त्यमुद्युक्तचेतसः ॥ परोपकारनिरता गुरुशुश्रूषणे रताः ॥२॥ ऋजवो मृदवः स्वच्छा अनुकूलाः प्रियंवदाः । सौम्याः स्मितमुखा भद्रा नित्यं स्वागतवादिनः ॥३॥ अल्पवाचः सुवक्तारः अत्यल्पाग
विशारदाः । अमानिनो कुबुद्धिमंतस्त्यक्तस्पर्द्धा गतास्पृहाः ॥४॥ शौचाचारसमायुक्ता दयालुस्त्वल्पगोचराः । दंभमात्सर्यनिर्मुक्ताः पाषानघाभिमाविराः ॥५॥ संविभागपराः प्राज्ञास्त्यशठा
त्याप्यकुत्सिताः ॥ नदीना नापि मलिना नचरोषवशानुगाः ॥६॥ भवंति भक्ता स्नानः सुस्निग्धा साधुसेविनः । नपापशीला कृच्छ्रसुश्रोत्रोशिश्नवशानुगाः ॥७॥ चापलानि न कुर्वंति
सर्वत्रासंगवर्जिताः । एकांतं भक्तिमास्थाय गुरोश्छंदेषु वर्तिनः ॥८॥ पूजनीयाः शिवनित्यं परापरविभूतये ॥ तान्सर्वसंग्रहे येन दृष्ट्वा लोकाः शिवतीर्थनद्गामातृष्वमास्थाय जगद्धिताय ॥ चरं
ति नानाविधचाररूपिणस्तेभ्यो नमस्त्र्यंबकपूजकेभ्यः ॥९॥ नमो विश्वेशभक्तेभ्यस्तेभ्य एव नमो नमः । अभावे शिवभक्तानां विश्वेभाय नमो नमः ॥१०॥ आलोकस्माविवभवयन्ता विदु
मातान्नभाजा या पिशाजरिलशिरसिश्चंद्रलेखावतंसाः ॥११॥ निम्नानंदानियतललितास्निग्धकल्माषकंठा देवा न दृश्यन्त परशवस्ते भविष्यंति भक्ताः ॥११॥ नारश्रृन्यः शरण्याशेसेस्ये
वमागमिकंवचः ॥ इत्युदीरयति प्रायो भक्त एव शिवस्वयं ॥१२॥ चंडालः श्वपचागारे लिंगं नित्र्चन्महेश्वरः । स्पष्टवक्षेविशेषेण भक्त एव शिवस्वयं ॥१३॥ स्वर्गे वाप्यपपाताले कस्थाः स
र्वसिद्धयः ॥ यस्य स्वेच्छागति मुक्तं सोयं सोमेश्वरोजनः ॥१४॥ उपवीतसहस्रेभ्यो ब्रह्मचारी विशिष्यते । ब्रह्मचारीसहस्रेभ्यो वेदाध्यायी विशिष्यते ॥१५॥ विदाध्यापीसहस्रेभ्यो आग्निहोत्री
विशिष्यते ॥ अग्निहोत्रिसहस्रेभ्यो यज्ञयाजी विशिष्यते ॥१६॥ यज्ञयाजीसहस्रेभ्यः सत्रयाजी विशिष्यते । सत्रयाजीसहस्रेभ्यो सर्वविद्यार्थपारगः । सर्वविद्यार्थवित्कोटाः शिवभ
क्तिर्विशिष्यते ॥१७॥ यस्मिन्कस्मिन्शिवे भक्तो भूतिशासनसंयुतः । तत्र तिष्ठ योजनं गंगाप्रभावाश्चासनस्य वै ।१८। अंत्यजो वाथ मोवापि मूर्खो वापंडितोपि वा ॥ यस्मिन्देशे वसेन्नित्यं भूति
शासनसंयुतः ॥१९॥ यस्मिन्सदाशिवं सोमः सर्वभूतगरो वृतः ॥ सर्वतीर्थेश्वतीर्थेनं सान्निध्यं कुरुते सदा ।२०। शिवरहस्ये । अष्टादशानां वर्णानां श्रेष्ठा माहेश्वरा जनाः । एतस्तेपरे

भोपि किं पुनस्तस्य बांधवाः ॥२१॥ शिवभक्तो वसेद्यत्र ग्रामे वा नगरेपि वा। तत्र तत्सुस्थिपासाद्याः गर्भे स्त्राआधयोपि च।२२॥ चंगलवादिकायां वा शिवभक्तस्थितोपरि ॥ तत्कृतिः शिवकल्लोपस्था
न द्रष्टुं शिवमंदिरं ॥२३॥ कीकटेष्वपि देशेषु यत्र माहेश्वरो जनः। मनागप्य प्रयत्नोपि वसेत् काशीक्षेत्रसमं तत्।२४॥ नाहं वसामि कैलासे न मेरौ न च मंदिरे ॥ मद्भक्ता यत्र तिष्ठंति तत्र तिष्ठामि पार्वति ॥
२५॥ यस्मिन्देशे शिवो नास्ति नास्ति माहेश्वरो जनः ॥ तत्र स्थानं न कर्त्तव्यमाविष्टं नरकान्तरं ॥२६॥ यमोऽस्तो कृमयं नास्ति संसारभ्रमयं न च। मम भक्तस्य माहात्म्यं देवि किं कथयामि ते ॥२७
स्कांदे ॥ सर्वाचारविहीनोपि सर्वाश्रयविवर्जितः। भक्तिलेशयुतस्त्वं मम प्रियो न गुणाधिकः ॥२८॥ परपापरतः क्रूरः स्वाश्रमाचारवर्जितः। मम भक्तो यदि भवेत्स्मान्नीयः सदैव हि ॥२९॥ यात
केसमनुप्रासे शिवभक्तगृहं व्रजेत् ॥ याचयेदन्नमन्नं तद्भावेजलं पिबेत्।३०॥ सुदूरमपि गंतव्यं यत्र माहेश्वरो जनः ॥ प्रयत्नेनापि द्रष्टव्यस्तत्र सन्निहितो हरः ॥३१॥ उपपातककोटिश्च वृ
त्तसा पुनानि च ॥ दहत्येव पापानि शिवभक्तस्य दर्शनात् ॥३२॥ विष्णुनारदसंवादे ॥ दर्शनाच्छिवभक्तानां सत्कृत्संभाषणादपि ॥ अग्निरात्रस्य यज्ञस्य फलं भवति नारद ॥३३॥ शिवभक्तं
सकृन्निंदेद्यो जनः पापकर्मकृत् ॥ युगकोटिः कृमिर्भूत्वा विष्टायां जायते पुनः ॥३४॥ सूकरः कोटिजन्मानि जायते शतकोटिशः ॥ गर्गश्च कोटिजन्मानि शृगालाः कोटिजन्मसु। अंधस्या
त्कोटिजन्मानि कुष्ठोस्यात्कोटिजन्मसु ॥ पंगुश्च शतजन्मानि याथंडो जायते शतं ॥ उलूको वायसो गृध्रः सर्पस्तु करगार्दभाः ॥३६॥ जायते म्रियते चैव निष्कृतिर्न विधीयते ॥ मद्भक्तं द्वेष्टि
यो मोहात्परा ध्यानि चाधमः ॥३७॥ न सहेतं दुरात्मानं सहेमप्य पराधिनं ॥ मद्भक्त रक्षरणायैव मम सर्वं गृहचेष्टितं ॥३८॥ इति जानीत मद्भक्ताः श्रीरोम्यो थिपरीयसः। ३९। यदर्द्र सुरगुया
न्नितत्वं शिवस्य पुरतः सदा ॥३९॥ सविष्यापि च पापानि शिवसाधर्म्यमाप्नुयात् ॥४०॥ पुराणं तापश्शोतो यभूमिंदर्धाद्विचक्षणः। नदन्तामेतु गाँदधात्संमूल्यं चैव भक्तितः ॥४१॥ भू
षणानि च वस्त्राणि रथाद्भक्ति समन्वितः ॥ भूषणानि च वस्त्राणि रथाद्भक्ति समन्वितः ॥४२॥ मद्भक्ता न विनश्यंति मद्भक्ति कल्मषाः ॥४२॥ श्राद्धे देवव्रते स्नाने नमेभक्तिप्रदा
॥ ॥ ॥ ॥ स्वस्ति ॥ ४३॥ इति श्रीवरलाकरे महेश्वरमहात्म्ये नाम एकविंशो ध्यायः ॥ २१॥ श्रीकाशीविश्वेश्वरार्पणम ॥

शै॰र॰
४७

मस्तु ॥ ॥ शुभम् ॥ ॥ भवतु ॥ ॥ ॥ ॥ ॥ ॥ गीरधारीलालकास्य ॥





(लिंगार्चनचंद्रिका)

श्रीलिं०चं०
१

ॐ श्रीगणेशाय नमः श्रीसाम्बसदाशिवो जयति उमाकण्ठनटस्फुरत्करणनाल्लोकत्रयप्रसन्नत्वदर्थधियासदर्थमिदुच्चईमरं प्रणम्य गिरिजाधवं भजनमावर
त्तैर्मितं स्मितानननमनामयं प्रियमुमासहायं मुदा १ वंशेऽस्मिन्नृपपुत्रनामनि महान्विष्णुर्द्विजाग्र्यस्त्वभूत्तत्पुत्रस्य सुधीर्गदाधर इति ख्यातो जगत्यां ख्यया तत्सुजेणा
सदापावेन विदुषां दृष्ट्वा निबंधान्पुरा श्रीलिंगार्चनचन्द्रिका विरचिता विद्वच्चकोरोत्सवा २ विविच्य गुणगौरवं गुणविवेचकामत्सरं विहाय कथयंतु तद्गुणिदूषणं सज्ज
नाः न फल्गुजनदूषणैः किमपि हीयते मामकं दिनांधगणमर्हणात्किमुदितेशखेदावहा ३ तत्रादावस्य रूपापरिज्ञानेऽर्जायाः फलत्वादौ साम्बसदाशिवस्य स्तुति
रूपमाशीः सर्वोत्कृष्टत्वं सर्वाभिष्टप्रदत्वं च प्रदर्श्यते तथा च स्मृतिः तवाग्रे यमनतो मर्द्धं यंतलिंगपत्रेऽर्जनिमवाहचित्रम् यद्यहिरण्मयं निधापितेनपासिगृहं ता
मणेनामिति अस्यार्थः हे इन्द्र तव वाहविचित्रं जनिमल्लिंगं यस्मात्तोदेवाः श्रिये संपदे अर्चयंति विष्णो रूपमं मयासहितं भोसहितं पदंये नवधाधिपदज्ञे नेनोपासितेति
संबंधः अथवा उपममित्यस्यार्थो नरं विष्णोः परमुपमं उपमात्वेन निधापितं श्रितवंतः विष्णुवदेवत्वं सेवते नास्माभिरपि विष्णोः प्राप्तव्यमिति भावः उपनिहितो यम
र्थः शंकरसंहितायां विष्णुमुद्दिश्य नंदिना यदनेनार्चितं लिंगं वाहचित्रं विमुक्तिदं इंद्रनीलमयं येन सुसंप्राप्तं पदं त्विदमिति न यान्वेन स्वतराणां मंत्रोपनिषदुपक्रमे
ब्रह्मवादिनो वदंति किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठा अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थामिति केषांचित् ब्रह्मवादिनां मुखीनां
ब्रह्मजगन्मूलकारणमित्येतावत् निश्चितवतां कारणभूतं ब्रह्म कोऽयमिति विप्रतिपद्यमानानां कारणं ब्रह्म किं स्यादित्यपातन्मरनात् प्रदर्शयन् कारणानि निखिला
नि तानि कालात्मयुक्तान्यधितिष्ठत्येकः स्मार्थप्रस्तारं प्रधानपरमात्मा स्वरं हरः स्वरात्मनावीशते देव एकः संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः स्यादिभिस्ते नि
र्णीतमर्थं प्रदर्श्य पहुं मैत्रैः कालायवांतरकारणब्रह्मत्वाधिष्ठिताहरेः शंकर एवात्मा भगवान् परमात्वं वपद्रकारणं ब्रह्मेति स्फुटीकृतं अन्यैरपि मंत्रालत्रेव यक्रोहणेन

द्वितीयोऽनन्तस्थुः ईशानो ज्योतिरव्ययः मायिनं तु महेश्वरं सर्वव्यापी स भगवान् तं विश्वरूपं भवभूतमीड्यं एको हंसो भुवनस्यास्य मध्ये महान्प्रभुर्वै पुरुषः छंदांसि य
ज्ञाः क्रतवो व्रतानां भूतं भव्यं यच्च वेदा वदंति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं तस्यावयवभूतैस्तु
व्याप्तं सर्वमिदं जगत् यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः तमाहुरग्र्यं पुरुषं महांतं स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः तमीश्वरा
णां परमं महेश्वरं तं देवतानां परमं च दैवतं पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यं न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगं स कारणं कर
णाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः स विश्वकृत्सर्वविदात्मयोनिः स कालकालो गुणी सर्वविद्यः प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थिति.
बंधहेतुरित्यादयो मंत्राः सकलप्रकृत्यधिष्ठातृत्वसर्वकारणत्वसर्वेश्वरत्वसर्वोत्तमत्वानन्याधिपतित्वसर्वोपास्यत्वादिकं निखिलकल्याणगुणरत्नाकरे भगवति साम्ब
शिवे एव निधाय कार्त्स्न्येन तात्पर्यवसिताः तथाऽथर्वशिरसि प्रथमखंडे देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति एवं तो देवान् प्रति सोऽब्रवीदह
मेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादिना एवं मां यो वेद स सर्वान्देवान्वेदेत्यंतेन स्वात्मवचनेन स्वात्मनः सर्वात्मत्वं प्रतिपादितम्
अनंतरं ततो देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायंति ततो देवा ऊर्ध्वबाहवः स्तुवंतीति देवैरुपास्यमानत्वं स्तूयमानत्वं च दर्शितम् ततश्च द्वितीयखण्डे यो वै रुद्रः स
भगवान् भूर्भुवः स्वस्तस्मै वै नमो नमः इत्यारभ्य यश्च विश्वरूपश्च महेश्वरः इत्यादिप्रकारेण ब्रह्मविष्णुरुद्रमहालक्ष्मीसरस्वतीदुर्गादीनां महाभूतादीनां च तद्वि
भूतित्वं प्रथमखण्डोक्तसर्वात्मवचनेन सिद्धं विशिष्य निरूपितम् ततो यच्चतुर्थखण्डे यो तत्तदीयनामधेयनिर्वचनमुखेन तस्य परभावः स्फुटीकृतः पंचमखण्डे तस्यो
पासनादेव मोक्ष इत्युक्त्वा पाशुपतयोगात्मकतदुपास्तिप्रकारो दर्शितः 'पंचमखण्डे तस्योपासनादेव' तदेवमादित आरभ्यांतं विमृश्यमानमथर्वशिरोवचनजातं शि

व एव सर्वतोऽस्याधानमिति स्पष्टीकरोति तथा मंत्रोपनिषदि शिवस्याशेषाधिष्ठातृत्वप्रतिपादनपरा मंत्राः श्रूयंते यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति
सर्वं एवं स देवो भगवान्वरेण्यो योनिस्वभावानधितिष्ठत्येकः सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः घृतात्परं मंडमिवातिसूक्ष्मं ज्ञात्वा शिवं
सर्वभूतेषु गूढं एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संनिविष्टः यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो न
मः इत्याद्याः तथा रुद्रोपनिषदि नमो भवायेत्यनुवाकपंचकेन नमः श्वो तस्यापचदीप्यापचेत्याद्याः मंत्राः सर्वेषु वस्तुषु शिवस्य सद्भावं प्रतिपादयंति तथा चमक
मंत्रा अपि वाजादिवस्तुष्विव प्रजापतिपुरंदरसर्वदेवतात्मकस्य कोठावनुक्त्वा द्वाजाद्यात्मकस्य तत्त्वं शिवस्यैवाहुः तथा बृहदारण्यकश्रुतिः य एषोऽन्तर्हृदय आका
शस्तस्मिञ्छेते इति हृदयविद्योपास्यं हार्दं परमेश्वरमुपक्रम्य सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान् एष स
र्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति शिवस्यानन्यसाधारणं प्रभावमवर्णयत् तथा छांदोग्यश्रुतिः अथ यदिद
मस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश इत्युपक्रम्य एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः
सत्यसंकल्प इति तद्गुणकीर्तनेन अथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिना तदुपासकानां महाफलकीर्तनेन च
शिवस्य महिमानं प्रकाशयत् तथा महोपनिषदपि सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवमित्यादिना उपासकानामनुसंधेयं नारायणं तस्य हृदयकम
लं तत्र वैश्वानराग्निशिखां च वर्णयित्वा तस्याः शिखाया मध्ये पुरुषः परमात्मा व्यवस्थितः इति हार्दस्य शिवस्य तन्मध्यवर्तित्वं प्रदर्श्य तेन स ब्रह्मा स ईशान इत्यादि
नादितरेषां तद्विभूतित्वख्यापनेन च तस्यैव वैभवं द्योतयत् श्वेताश्वतरशाखिनामुपनिषदपि च यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति य

ष्यप्ययं मंत्रः शिवपरः स्यात् न प्रतीयते तस्याप्यस्य शिवपरत्वमेव बोधयन् मूर्धोग्रे मां विद्धि पुत्र ज्ञानं च प्रहिणोति मे तत्प्रसादान्मया प्राप्तं प्राजापत्यमिदं पदम् ब्रह्मणा मु
नयः एवं स्तुवन्तस्मै महेश्वरः दत्तवानखिलात्वेदनात्तस्मै व अवस्थितानित्यादिशैवमात्स्यादिस्मृतवृत्तादिवचनैस्तदुपबृंहणात् ननु ब्रह्मदारण्यकेऽपि ब्रह्मात्मानं निर्गु
णप्रकरणमध्यपातित्वान्निर्विशेषब्रह्मपरं न शिवपरमिति चेन्न निर्विशेषत्वाद्यभावात् सगुणोपाधिविशेषगतगुणकीर्तनद्वारैव तु तेषां पर्यवसानस्य वक्तव्यत्वात्
सदयको शमध्यगतस्येशानः सर्वेश्वरभूताधिपतिशब्दितस्य शिवस्यैव गुणकीर्तनस्तुतिद्वारत्वेन प्रतीतेश्च छांदोग्येऽपि सत्यकामादिगुणोपदेशात् द्विपाद्ब्रह्मोपासना
विधानं चेत्युभयमपि शिवपरमेव अस्मिन् काममाहितानि तदुत्तरवाक्ये न सर्वापरमं त्रस्मर्पितं शिवरूपमुपास्यं ब्रह्म प्रस्तुयते अस्मिन्यदंतस्तदुपासितव्यमिति शिव
स्यैवोपास्यत्वप्रतीतेः ननु एवं सति पतिं विश्वस्यात्मेश्वरः शाश्वतं नारायणं महाज्ञेयं हिरण्यगर्भः समवर्तताग्रे भूतस्य जातस्य पतिरेक आसीत् इंद्रो यातोऽवसि
तस्य राजा विश्वस्मादिंद्र उत्तरः अग्निरग्ने प्रथमो देवतानां अग्निर्वै देवानामवमो विष्णुः परमस्तदंतरेण सर्वा अन्या देवता इति श्रुतिषु देवतांतराणामप्यपरिच्छिन्नैश्वर्यश्र
वणात् कथं शिवस्यैवापरिच्छिन्नैश्वर्यमिति चेदुच्यते बहूनां विकल्पेन सर्वेश्वरत्वासंभवः वस्तुनि विकल्पायोगात् नापि समुच्चयेन परस्परं व्याहतत्वापत्तेः नापि कल्प
भेदेन व्यवस्था सर्वेषामप्यैश्वर्यस्य कालतः परिच्छिन्नतया न कस्यापि सर्वेश्वरत्वमिति दोषापातात् तस्मात्तादृशेषु वचनेषु कानिचित्प्रतीतार्थपराणि कानिचिदन्यथा
नेयानीति सर्वैरभ्युपगंतव्यं तत्र किमेतस्मसमस्तमुताहो नामयं प्रतीप्यति इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् अनंतशाखासापेक्षे वैदिकार्थविनिर्णये स्वबुद्धिक
ल्पिता आपाततो योऽयमुपबृंहणमवेक्षणीयः स्वपं ज्ञानतत्वाज्ञानं भवेदपि अविमर्शे निश्चित्तेऽस्मिन् शंकाकास्यात्स्मृतीनामिति व्यासवचनात् यानि सोपबृंहणानि वचना
नि तानि यथार्थपराणि निश्चितम् ब्रह्मविष्ण्वग्निशक्रार्कजलभूमिपुरोगमाः सुरासुराः संप्रसूतास्ततः सर्वं महेश्वरादित्यादि निवृत्तोऽपुराणादिदृष्टान्युपबृंहणानि तेषा

श्रीलिं॰ चं॰
३

मनुसारेण व्यवस्थापनं न्यायः। पुरुषबुद्धीनामव्यवस्थितमर्यादत्वेन तदुक्तौ नैव न्याये व्यवस्थासिद्धेः। अथवा ईश्वरस्यैव द्वारि सर्वशब्दवाच्यत्वात् सर्वेषां वचनानां
परस्परविरुद्धाभाव एव नामानि तत्वतो विद्यानि लोके महान्ति च तान्येव मम नामानि नात्र कार्या विचारणेति हरिवंशे कैलासयात्रायां पिण्डवचनात् शिवं प्रस्तुत्य सर्वा
णि हवा यतस्य नामधेयानीत्याख्यानापनस्मरणाच्च कानिचिद्देवतास्थानि ब्रह्मणा वेदविनमाः रुद्रमूर्तिं समाश्रित्य पिबेपरमकारणे पर्यवसानं तिविधे प्रोक्तानि वाक्यानि
कानिचित् विष्णुमूर्तिं समाश्रित्य बुद्धमूर्तिं च कानिचित् आग्नेयीं मूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित् सूर्यमूर्तिं समाश्रित्य तत्वेवास्यानि कानिचित् एवं मूर्त्यभेदाने नद्दो
रोगेवमुनीश्वराः प्रतिपाद्यो महादेवः स्थितः सर्वासु मूर्तिषु इत्यादि स्कान्दोक्तेः दर्पणाख्ये ... सर्वहविर्भोक्ता चैव फलप्रदः सर्वदेवतनुर्भूत्वा सर्वात्मा सर्वसंस्थितः हव्यं व
हति देवानां कव्यं कव्याशिनामपि पाकं च कुरुते वह्निः सोपि मच्छक्तिचोदितः गोप्ता चैव जगत्स्वामी शङ्करः सर्वो महेश्वरः यज्ञानां फलदो देवो महादेवनियोगतः इति कूर्मपुराणाच्च पूर्वस्मृ
तिवाक्यानि प्रायो वेदार्थपराणि दर्शितानि अथ महाभारतरामायणभागवतादाद्यष्टादशपुराणवचनानि शिवोत्कर्षपराणि प्रदर्श्यन्ते महाभारते आरण्यपर्वणि तीर्थयात्राविधौ न
तोग छेत्सुवर्णाक्षं त्रिषु लोकेषु विश्रुतम् यत्र विष्णुः प्रसादार्थं रुद्रमाराधयत्पुरा वरांश्च सुबहून्लेभे दैवतेषु सुदुर्लभान् उक्तश्च त्रिपुरघ्नेन परितुष्टेन भारत अपि चास्मिंस्त्वं प्रियतमो लो
के कृष्ण भविष्यसि त्वन्मुखं च जगत्सर्वं भविष्यति न संशयः इति द्रोणपर्वणि अश्वत्थामानं प्रति लिङ्गार्चनादेव कृष्णार्जुनयोरुत्कर्षः प्रतिपादितः शान्तिपर्वणि च विष्णुर्गिरं रूप
श्च बुद्धा लोकपितामहः स्तुवन्निविधैः स्तोत्रैर्देवदेवं महेश्वरम् नमश्च यन्तिये शम्भुं दुर्गास्थानितं हिते इति श्रीरामायणे अनुशासनिके दृढं प्रत्युपमन्युवचनं पश्य विष्णुश्च बुद्धा
वत्तं चशङ्कसहमेरोः अर्चयन्ति सदा लिङ्गं तस्माच्छ्रेष्ठतरो हि सः इति तत्रानन्तरैव सप्तमभगवान्नीशः सर्वतत्वादिरव्ययः सर्वतत्वविधानज्ञः प्रधानपुरुषेश्वरः। सोसृजद्दक्षिणाद्धाङ्गा
द्ब्रह्माणं लोकभावनम्। वामपार्श्वात्तथा विष्णुमादौ प्रभुरधासृजत्। शान्तिपर्वणि ईश्वरगीतनः कृतापुरुषः कारणात्मकः विष्णुब्रह्मा शशी सूर्यः शक्रो देवाश्च सान्वयाः। सृज्यन्ते पश्यते चे

वनमोभूतमिदं यदा । अप्रज्ञानं जगत्सर्वं तदा ह्येको महेश्वरः ॥ इति । तथा तत्रैव । निहतास्तेन एवं त्वं हतवानसि वैरिहन् । अप्रमेयप्रभावं तं देवदेवमुमापतिम् । भज त्वं नित्यं प्रपन्नो विश्वेशं ह
रमव्ययमिति । यार्थं प्रति कृष्णवचनम् । आश्वमेधिके । वयं सर्वे च नष्टाः स चास्माकं प्रसीदति । तत्प्रसादाद्धयं राज्यं प्राप्ताः कौरवनंदनेत्याद्युक्त्वा से तां महाराजमनसापि प्रधर्षयेत् । द्रोणा
कर्णमुखैर्गुप्तां महेष्वासैः महारथैः । ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् । तस्यैव च प्रसादेन निहताः शत्रवस्त्वयेति युधिष्ठिरं प्रति भीष्मवचनम् । राजधर्मे । स एव भगवानात्वा चिरं प्रलय
णपुधः । असृजत्सर्वशास्त्राणि महादेवो महेश्वरः । इत्येताः शंकरप्रोक्ताः विद्याः शास्त्रार्थसंयुता इति ॰ सौप्तिके । अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा । तस्मादिष्टतमः कृष्णादन्यो
मम न विद्यत इति । हरिवंशे । इति संस्तूयमानस्तु भगवान्गोवृषध्वजः । प्रसार्य दक्षिणं बाहुं वासुदेवमथाब्रवीत् । मनीषितानामर्थानां प्राप्तिस्ते तु सुरोत्तम मा यारिजाते च हर्तासी माभूते मनसि
व्यथो । पुराणेनात्कमाच्छिन्स्व तपस्त्वं स्वकरोर्यदा । तदा मम वचः कृष्ण स्मरस्व स्वस्थेर्यं मा मुहि । अवध्यस्त्वमजय्यश्च ततः स्मरतास्तथा । भविता सौम्य वो चंपत्रस्तथा ततदन्यये स्तुत्वा तत्रैव कृ
ष्णकृतस्तोत्रे । अहं तु स्तावकस्त्वेषो व्याप्य संततः पुत्राः सर्वे तु स्तवशा ह्यानिवीराः । एवं सर्वकारणानां त्वमीज्य इति । रामायणे युद्धकाण्डेनावतारितसुपुराणे तु स्ते शानाच्युतेशा पद्मापतिस्म
वर्षे स । भास्करे सर्वस्य साधारे ह्यपवपुषे नमः स्मारितास्तुत्वाच्युतमहेश्वरं त्वं शिवस्येवमदर्शितम् । मं स्ताभिमानित्याधिकारिके तत्त्वया योगात् रोषत्रपवपुषे नमः इति विशेषणासामर्थ्या
च्चा । आरण्यकाण्डेऽपि । कृताभिषेकः स रराज रामः सीताद्वितीयः सह लक्ष्मणेन । कृताभिषेकस्त्वगराजपुत्र्या रुद्रः सनन्दी भगवानिवेश इति उपमानिबंधव्याजेनेन आदिकविना प्यवो
त्कर्षः स्फुटीकृतः । उत्तरकाण्डेऽपि । कर्तव्यं कृतं विशेषविचारसमये वसिष्ठादीन्प्रति स्वच्चकीर्तिनेरव्यापिते । तेनु रामस्वनच्छ्रुत्वा नमस्कृत्य वृषध्वजं अश्वमेधं द्विजाः सर्वे एतच्चैतिरसमि
त्यशा इति प्रावसंवेधितत्वेनैव अश्वमेधस्य भ्रातृभ्नतोपन्यासेन च अश्वमेधेन रामचंद्रः प्रीतिं समाराधेति । रामोऽपि पालयामास राज्यं परमधार्मिकः । इत्याद्युपरिष्ठितेन विशेषाबद्धस्तरणान्त
र्नेरूजयामास चेश्वरम् । यज्ञेन यज्ञहंतारमश्वमेधेन शंकरमिति क्षौमवचनेन । अभिषिक्तस्ततो राज्ये रामो राजीवलोचनः । पालयन्पृथिवीं सर्वां धर्मेण मुनिपुंगवाः । अयजद्देवदेवे



श्री लिं० चं०
४

शमभ्रमेधेन शंकरामित्याद्यस्मपुराणवचने तथ्याविसरणमाध्यत्वमुक्तं। यत्तु वालकाण्डेप्पावनारायणयोः समरसन्नाहे। अधिकं मेनिरे विष्णुमितिदेवानां नारायणवलाधिक्यप्रतिपत्तिवचनं
तद्धारनाद्विष्णुप्राबेन नारायणाय स्वाधिकृतोर्ध्वरुद्रमितिप्रदिष्टाद्राज्यत्वरुत्वरणपरिपालनार्थं प्रावस्पन्दनवलत्वाभिमानेन अन्यथासिद्धं। भागवते च तत्पर्यस्कंधे। रत्नाखरेकृपितस्य
प्रावस्य शान्तिं प्रार्थयमानान्देवान्प्रति ब्रह्मणो वाक्यं। नाहं न यज्ञो न च यूयमन्ये ये देहभाजामुनयश्च तत्त्वं विदुः प्रमाणं वलवीर्ययो र्वा तस्यात्मतंत्रस्य क उपायं विधित्सेदिति। अष्टमस्कंधे
धेयिशिवे प्रतिदेवानां वचनं। तत्तेगिरित्राखिललोकपालाविरिंचिवैकुंठसुरेन्द्रगम्यं ज्योतिः परं यत्र रजस्तमश्च सत्त्वं नयद्ब्रह्म निरस्तभेदमिति। प्रावपुराणे। प्रतिसर्गप्रसक्तानां ब्रह्मणां शा
सुविस्तरं। उपदेशासयवांसो कालावच्छेदवर्तिनां। ईशानः सर्वविद्यानां समवाग्निरवृबुधाः। तस्याप्राव्योमरूपाविष्णुः सर्वज्ञानमहोदधिरिति। कूर्मपुराणे। ब्रह्मविष्णुरुद्रान्प्रस्तुत्योक्तं।
एभ्यः परतरो देवस्त्रिमूर्तिः परमा तनुः। माहेश्वरी त्रिनयनी योगिनां शान्तिदा सदेति। उत्तरभागेपि। सर्वासामेवशक्तीनां ब्रह्मविष्णुशिवात्मकाः। प्रधानाः संस्मृताः देवाः शक्तयः परमात्म
नः। आभ्यः परतामग्र्यवान्परमात्मा सदाप्रावः। गीयते सर्वशक्त्यात्मा शूलपाणिर्महेश्वरः। एतमेकेवदंत्यग्निं नारायणमथापरे। इन्द्रमेकेपरे प्राणान्ब्रह्माणमपरे जगुः। ब्रह्मविष्ण्वग्निव
रुणाः सर्वेदेवास्तथार्षयः। एकस्यैवाथ रुद्रस्य भेदास्ते परिकीर्तिता इति स्कांदे. ब्रह्माविष्णुश्च रुद्रश्च परतत्त्वविभूतयः। पर्यायत्रयाणामधिकः प्रावः परमकारणमिति यान्येमुनानि सर्व
शास्त्राणि पुराणान्यखिलान्यपि। धर्मशास्त्राणि सर्वज्ञत्वतः सतमहात्मने। अस्मात्कं संशयः कश्चित्सुमहान्हृदि वर्तते येनाहं रवसंजाताः छेतुं त्वं चत्वमर्हसि। कोदेवः परमो
ज्ञायान्कर्यं चाराध्यते हि सः। आराधिते फलं किं स्यादेतत्सर्वं ब्रूहि नः। इतितद्वचनं श्रुत्वा सु पप्रच्छ अत्रवैः कृषिभ्यामिश्चितसं पुरातनं। विष्णोः सनत्कुमारस्य संवादं पाप ना
शनं। इमेव पुरा प्रश्नं पप्रच्छ वान्विष्णुमव्ययं। सनत्कुमारो भगवान्पुराणविभागवान्। मुनेस्तस्य वचः श्रुत्वा विष्णुः सर्वविदांवरः। उवाच महाभाग तच्छृणुध्वमतंद्रिताः। इतिसूतस्य प्र
तिवचनं चोपक्षिप्य पूर्व वप्राबो त्मायान्द्विधा च वहुधाश्रुतः। वेदेषु च पुराणेषु सांगेष्वीक्षित्रमागि विष्णुवचनं। ब्रह्माण्डपुराणे। पुरा पितामहं देवं मेरुपृष्ठे महर्षयः प्रो

चुः प्रणम्य देवेशं स्थितमेकं तत्त्वमव्ययमिति। प्रश्नेनोपहृष्टस्य तस्माद्यथा महेशस्य मोहितो लोकसंभवः। अविज्ञाय परं भावं स्वात्मानं प्राह चार्षिणामित्यादिना ब्रह्मणो स्वपराभावोपदेशं तस्मात्सर्वा
सह मानस्य नारायणस्य स्वपराभवप्रतिपादनं चावतार्य एवं विवदतो मोहात्परस्परं जयैषिणोः। आजग्मुस्तत्र तौ देवौ वेदाश्चत्वार एव हि अन्वीक्ष्य देवं ब्रह्माणं नारायणमवस्थितम् प्रोचुः सं
विग्नहृदयौ याथात्म्यं परमेष्ठिनः ऋग्वेदः यस्यांतस्थानि भूतानि यस्मात्सर्वं प्रवर्त्तते तदाहुः परमं तत्त्वं स देवः स्यान्महेश्वरः यजुर्वेदः यो यज्ञैरखिलैरीशो योगेन च समर्च्यते तमाहुरीश्वरं देवः
स एव स्यात्पिनाकधृक् सामवेदः येनेदं भ्राम्यते चक्रं तदाकाशांतरं महत् योगिभिर्विद्यते तत्त्वं महादेवः स शंकरः अथर्ववेदः यं प्रपश्यंति देवेशं यतंतो यतयः परं महेशं पुरुषं रुद्रं स देवो भगवा
न्भवः एवं स भगवान्ब्रह्मा वेदानामीरितं शुभं श्रुत्वा विहस्य विश्वात्मा यज्ञश्चापि विमोहितः कथं तत्परमं ब्रह्म सर्वसंगविवर्जितं रमते भार्यया सार्द्धं प्रमथैश्चातिगर्वितैः इतीरिते यथ भगवान्प्रा
णवात्मा सनातनः अमूर्तो मूर्तिमान्भूत्वा वचः प्राह पितामहं प्रणवः न ह्येष भगवान्पत्न्या स्वात्मनो व्यतिरिक्तया कदाचिद्रमते रुद्रस्तादृशो हि महेश्वरः अयं स भगवानीशः स्वयं ज्योतिः
सनातनः स्वानंदभूता कथिता देवी नागंतुकी शिवेति विष्णुपुराणेऽपि ज्ञेयांपि ज्ञेयांपि ज्ञेयांजन्मपि ज्ञेयां येषां न वसति हृदये कुमतिप्रविमोचको रुद्र इति नागरखंडे माभूत्तत्र कुले जन्म शं
भुर्यत्र न दैवतमिति पाराशरस्मृतौ अंतरिक्षं तिये रुद्रं सदा वेदमनीषिया गर्हन्ति जिह्वया तेहि रसपूर्णा मतो रुद्रं अंतर्नेत्रं तिये रुद्रं भवानीसहितं भवं पुरीषमेव गर्हंति जिह्वया ते
न संशयः इति श्रुतिरपि अंतरिक्षं तितेजना रुद्रं परोमनीषया गर्हंति जिह्वया रसमपि पुरुषसूक्तमपि शिवपरमेव उत्तमतत्त्वस्येशानः इतीशानपदस्य हराशिवे रूढयपर्यवसानात् तत्त्वस्य
सामविधिब्राह्मणे इदं वो सस्य ह्यस्य स्यादिनावेष्टितां संहितामुपदेशात् अथर्वणोऽष्टादशमहाशांतिप्रकरणे तत्र छंतिसुरुक्तं देवस्य महत्रावि नियोगावसरे वैशम्पुरुषसूक्तमिति विधा
नात् शौनकबोधायनादिस्मृतिषु विष्णुपूजाध्यानहोमादिषु विनियोगाच्च विष्णुपरत्वमेव तस्य प्रतीयत इति चेन्न बौधायनसूत्रे शिवसंकल्पादिभिः सह श्रीरुद्रांगत्वेन समन्त्रे रूपदेशात् यं
योग्यतां केषांचित्प्राजसनेयिनां च महारुद्रजपमध्ये निवेशान्नमकं चमकं चैव पौरुषसूक्तं च नित्यशः जपंते नित्यमहादेवं गृहस्थ गृहपतिर्यथेति पुराणे च वायवीयसंहिताध्यात्मे शांतिमध्ये वायव्यकं भेदेवं

श्रीलिं·वं·
५

हं भुवनाधिपमित्युपक्रम्य नमस्कं च मत्कृतेवं पातकं तत्क्रमेव चेत्यादिनाक्रये विनियोगाश्च लैंगादित्यपुराणेषु सकृद्वेनसपुष्येण स्नापयेन्मंत्रसर्वकं मंत्राश्चनेष्वकस्याभिशणु सर्वार्थास
द्धये इत्युपक्रम्य जप्तेष्वसाम्नात्रयेरोवनयादेवदूतेरपि रथंतरोरणपुष्येन तत्क्रनपुहषेण शैनिप्याविभिषेकमंत्रेषु परिगणनाच्च नन्वत्वेवं विनियोगमात्रस्यान्यथासिद्धत्वात्पापु
रणो षुकेचित्संचरणत्रसंहिताविशेषेषु वचनाद्यपरस्य यतत्स्य प्रतिपादस्य त्वशीर्षत्वादिविशिष्टवृत्तरणाघुत्पत्तिस्याननतरवपद्व पुन्नरूपोपदेशे नेरोनत्तत्रस्पनन्नन्मंत्रार्थकथनमु
खेन ज्ञानायणपरतयाविवरणदर्शनान्नत्वरत्वमभ्युपगन्तव्यमुपबृंहणानुरोधित्वाद्धृदि कार्यस्यावस्थायाः स्मार्शक्य मंत्रविवरणरूपोपबृंहणानामश्रुतविनियोगांतरनिर्वाहार्थत्वेना
न्यथासिद्धसंभवान्नेनेः श्रुतिः नरनुकूलविनियोगमितं द्यौ मूर्द्धानं विमोत्तस्यत्वं नाभिः परमेष्ठिनः। सोमसूर्याग्नयो नेत्रे दिशः श्रोत्रे महात्मनः। वक्त्राद्दै ब्राह्मणाः सर्वे ब्रह्मा च भगवान्प्र
भुः इंद्रविष्णुभुजाभ्यां तु क्षत्रियाश्च महात्मनः। वैश्याश्चोरुप्रदेशात्तु शूद्राः पादाभिवाङ्गिनः इत्यादि लैंगादिवचोपबृंहणानरानुमोदितं च प्रिवपरत्वमस्य ज्ञापयितुमशक्यं मनुत्वावद्धर्म
शास्त्रोपसंहारे प्रशासितारं सर्वेषामणीयांसमणोरपि रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परमिति सर्वांतर्यामित्वगणकं परमात्मानमुद्दिश्य एनमेके वदंत्यग्निं मरुतोन्ये प्रजाप
तिं इंद्रमेकेपरे प्राणमपरे ब्रह्मशाश्वतमिति सर्वदेवैक्यव्यवहारबाहुल्यं प्रदर्श्य एष सर्वाणि भूतानि पंचभिर्व्याप्य मूर्तिभिः जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् इति मूर्तिपंचकेन
सर्वभूतव्यापित्वलिंगप्रदर्शनेन प्रावः परमात्मेति स्वमतं स्पष्टीचकार बोधायनश्चापि वृत्तज्ञाविधौ विष्णोर्लब्धवरत्वेन विशेषात् देवतांतरपूजाविधिषु शिवस्यावरणदेवतासु ऋत्संनिवेशा
त्तत्स्य सर्वोत्कर्षं सूचयामास कात्यायनोपि हरिहरैवैतत्सर्वमिति तस्य सर्वात्मकत्वेन परमात्मत्वं द्योतयामास आश्वलायनोपि यस्मात्परतरं नास्ति नापरं च परात्मनः नत्वायोग्यत नचाणी
योत्र मत्तस्मै स्वयंभुवे ये वेदमखिलं दृष्टी यत्र याम्नूतयः स्मृताः तस्मै प्रिणावमहतेन्नमः स्वन्यामप्रतात्मनेइति प्रणवपदवसर्वोत्कृष्टइति स्वमतं द्योतयामास केचित्त्स्ये महर्षयः परा
त्परतरो ब्रह्मा ब्रह्मणः परतो हरिः तस्मात्परतरो हरुद्रस्तस्मादग्निस्त्वायमीड्याः पद्माविहणाद्दिहरश्चवसञ्चसमारहरमधिकमाहुः तथाहि भगवान्पराशरः देवताभ्यः समस्ताभ्यस्तथा ब्र

त्वापरः स्मृतः ब्रह्मणश्च महाविष्णुर्वैरिञ्चः सर्वपालकः विष्णोरपि परः साक्षाद्रुद्रः संहारकारकः इति सूतगीतासु सूतोऽप्याह परमात्मविभागत्वं ब्रह्मादीनां द्विजर्षभाः समानमपि रुद्रस्य व
रिष्ठो नात्र संशय इति एवं ब्रह्मणो रूपं विष्णुर्विष्णोश्चापि परावस्था रुद्रस्त्यादिषु काश्यपस्य रुद्रगीतासारादिवचनेषु रूपं विष्णुर्विष्णोऽपि तस्योत्कर्षो विष्णुपुराणादिषु श्रूयत इति शास्त्र
कारेषु पातञ्जलिस्तावत् क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः इत्यस्य शास्त्रं निर्मितं तत्र निरतिशयं सर्वज्ञबीजं स एषः पूर्वेषामपि गुरुः कालेनानवच्छेदात्तस्य वाचकः प्रणव
इत्यत्र परस्परं भावनमिति परविषयाणि तत्पावस्य रागो वेधः कर्मो मायेयमेव च मालिनो बाधयत्यबन्धो त्युक्तं कारास्तथा न रागो न च वा द्वेषो शंभोरमिततेजसः न चाप्यभिनि
वेशोऽस्य कुशलाकुशलान्यपि स पुंविशेषकल्पितो भगवाननन्तकालिकः लोके शान्तिशयत्वे नास्मिन्नित्यं प्राक्कर्मनीषिणः प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरं उपदेष्टा स एवादौ
कालावच्छेदवर्तिनां कालावच्छेदमुक्तानां गुरूणामप्यसौ गुरुः सर्वेषामेव सर्वेशः कालावच्छेदवर्जितः प्रणवो वाचकस्तस्य शिवस्य परमात्मनः शिवरुद्रादिशब्दानां प्रणवो हि परः स्मृ
तः शंभोः प्रणववाच्यस्य भावनात्तज्जपादपि या सिद्धिः सा परा प्राप्या भवत्येव न संशयः इत्यादिवायुसंहितोत्तरभागसप्तमाध्यायपठितवचनैः कार्याणि तत्त्वानि तत्पावस्यैव परं भावं प्रति
पादयामास अत एव तदेकार्थ्याद्देवतानां तत्त्वमवधार्य तत्त्वकौमुदीकारः शास्त्राणां शिवविषयत्वं स्पष्टीचकार तथा देवतास्वरूपं च वाजसनेयिब्राह्मणे शाकल्ययाज्ञवल्क्यसंवादे वि
चार्य निर्णीयते तत्र शाकल्यः पप्रच्छ याज्ञवल्क्यो नाम देवताविस्तारसंक्षेपौ स्वरूपं च रुद्रमार्थः तत्रैवं श्रुतिः अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा
प्रति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति
होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिं
शदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं सर्वं वसु हितमेते हीदं सर्वं वासयन्ते तस्माद्वसव इति

श्री·लि·चं·
६

कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति कतम आदित्या इति द्वादश मासाः संवत्सरस्यैत आदित्या एते
हीदं सर्वमाददाना यन्ति ते यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति
कतमो यज्ञ इति पशव इति कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चैते षडेते हीदं सर्वं षडिति कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवा-
वित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति तदाहुर्यदयमेक एव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदि-
त्याचक्षत इति अस्याः श्रुतेरयमर्थः उपासनार्थं देवानां संख्याविस्तारेण शाकल्येन पृष्टो याज्ञवल्क्यो विज्ञो गोषु रूपायां प्रवृत्तत्वात्स्वबुद्ध्या मोहयति विदग्धस्य मुखं प्रतिपेदे निविच्छब्दो वैश्वदेवनामके
शास्त्रविशेषे वैश्वदेवनिविदि नानां संख्याभाषितानां पदानां समुदायमाचष्ट इति वेदे प्रसिद्धिः ततो यावन्तो देवा वैश्वदेवस्य निविदि पठ्यन्ते तावन्त उपास्यास्त्वयुक्तं भवन्ति तानि च पदानि त्रयश्च त्री च शतानि
शतत्रयं सहस्रत्रयं चेत्येवं च देवविस्तारकल्पे च कारणं तत्र न त्रयस्त्रिंशद्देवानां शंका पृच्छति एव देवाः सर्वविस्तारात्मता एव संक्षेपेणाभिधीयन्त इति तत्र न त्रयस्त्रिंशदर्थः कतीति संख्याप्रश्नः कतम इति स्वरूपवि-
शेषप्रश्नः तत्र शतसहस्रसंख्याकाः देवा उक्तास्ते सर्वे प्रधानभूतानां भवन्ति किं तर्हि प्राधान्येन इह विभुर्ज्ञा त्रयस्त्रिंशद्देवानां योगमहिमास्त्वीकृता रोहकविश्वता पवनतो न तेषां स्वरूपविशेषः एषामि-
रूपिणीयं त्रयस्त्रिंशद्देवेषु अन्तर्भावत्वात् तेषां पुराणप्रसिद्धेभ्यो वस्वादिभ्योऽन्ये न वसुशब्दं मघवानिन्द्रो गिर्वाणा वास्तु आख्यातः प्रजापतिशब्दोक्तस्तनयित्नुयज्ञयो वर्तन्ते
अन्नप्राणौ भोग्यभोक्तृरूपाभिमानिनौ अध्यर्धशब्दोक्ता संख्यावाचीयोगेन नमस्कृताः वायुर्व्याप्तिवायुः सूत्रात्मा वायुर्वै गौतम तत्सूत्रमिति श्रुतेः एते प्राणशब्दः परमात्मवाचकः तदेवस्वरूपिणं सशिवेत्युक्तं
सशब्दः परोक्षवाची प्राणशब्दवाच्यः परमात्मा पिवक्षेको मुख्यो देवः तत्त्वरूपिण इच्छेतां त्वतरावित्युक्तमाभवन्ति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधि-
वासः साक्षी चेता केवलो निर्गुणश्च एतमेव देवं शास्त्रकृताः शब्दविशेषैर्बहुधा वदन्ति तथा च मन्त्रवर्णः सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्तीति चैव च शब्दविशेषा

विस्य च मस्यास्मिन् मंत्रे श्रूयंते इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति नन्वेवं मित्रवरुणादयः शब्दा भिन्नदे
वतावाचिनो न त्वेकं देवमभिदधति अन्यथा वरुणयागे येयो मंत्रो युज्येत नार्थं तेषु एकत्वेपि देवस्य मूर्तिभेदेन मंत्रव्यवस्थोपपत्तेः यथा शैवागमेषु शिवस्यैकत्वेपि प्रतिमाभेदेन द
क्षिणामूर्ति चिंतामणि मृत्युंजयादयो मंत्रा मूर्तिविशेषेषु व्यवस्थिताः यथा वा वैष्णवागमेषु गोपालवामनादयो मंत्राः न चादेवेपि किं न स्यात् ननु द्रव्यदेवते यागस्य स्वरूपं रूपभे
दाच्च कर्मभेदः प्रतिपादितः नन्वेवं यद्यपि निदानं स वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र यथामिक्षावाजिनयोर्द्रव्ययोर्भेदस्तथा विश्वेषां देवानां वाजिभ्यो देवेभ्यो भेदोस्तु प
गंतव्य इति वाच्यं अभ्युपगम्यते एकस्यैव वास्तवस्य देवस्य कर्मानुष्ठानदशायामौपाधिको भेदः अत एव वाजसनेयिब्राह्मणे इषिप्रकरणे कर्मानुष्ठानप्रसिद्धं देवभेदमनूद्य पुनरेकत्वा
देन वास्तवं देवैकत्वमवधारितं तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा इति न चैकस्माद्देवात्फलभेदः संपादयितुमिति शंकनीयं उपा
स्तिप्रकारभेदेन तदुपपत्तेः तं यथा यथोपासते तदेव भवतीति श्रुतेः यथैकोपि राजा छत्रचामरादिसेवाप्रकारभेदेन हेतुफलदत् ननु देवः फलं ददातीत्येतन्मीमांसको न सहते
तथाहि नवमाध्याये विचारितं किं यागेनाराधितो देवतायाः फलं उतापूर्वद्वारकं यागस्य फलसाधनत्वमिति संशयः तत्र भंगुरस्य यागस्य कालांतरभाविफलं प्रतिसाधन
त्वायोगात् अवश्यं द्वारं किंचित्कल्पनीयं देवताप्रसादश्च श्रुतियुक्तिभ्यां न द्वारं स्यात् तदेवैनमिंद्रः प्रजया पशुभिस्तर्पयतीति श्रुतिस्तु च्यते इंद्रियपाद्या सुमिष्टतमत्वात् कर्म
कारकं प्रधानं नेतच्च कर्मणामाश्रयत्वात्संप्रधानं ततो विप्रधानं द्रव्याद्देवता च संप्रदानत्वेन प्राधान्यात् पूजामर्हति यागश्च पूजारूपत्वादतिथिभोजनमिव देवताया अंगं
स्यात् तस्मात्पूजादिवद्देवः फलं ददातीति पूर्वः पक्षः अत्रोच्यते यागदेवतयोर्योयमंगांगिभावस्तदुपन्यस्तः स तु शाब्दाकांक्षानुसारेण विपर्ययेति तथाहि यजेतेत्याख्यातेन
भावनाभिधीयते सा च किं केन कथमिति भाव्यं करणेतिकर्तव्यतालक्षणमंशत्रयं क्रमेणाकांक्षति तत्र यागस्य समानपदोपनीतत्वेप्ययोग्यत्वान्न भाव्यता स्वर्गस्य

श्री॰लिं॰च॰ तुवाक्यतात्प्रपनीतस्यापिपुरुषार्थत्वेनयोग्यत्वात्स्वर्गसाम्यात् तस्यचस्वर्गस्यसाधनाकांक्षायांयागः करणत्वेनान्वेति तच्चकरणंसाध्यरूपत्वात्स्वनिष्पादकंसिद्धं द्रव्य

७ देवतमितिकर्तव्यत्वेनगृह्णातिततोयागोऽमीदेवताचतद्रूपं एवंचसतितानिपिवद्देवतायागेनाराध्यते यानुश्रुतिस्तस्यएवेनमितिनासौस्वार्थेतात्पर्यवती प्रमाणा

दिविरोधात् नहिकाचिद्दध्यहवनीदेवताहविर्भुक्तान्नाफलंप्रयच्छंतीतिप्रत्यक्षेणोपलभ्यते प्रत्युततदभावः प्रत्यक्षेणायोग्यानुपलब्ध्यावाप्रमीयते किंचाश्वमेधेत्तेगोरंक्रा

ध्यामंकृताः कांस्यानिस्वाहाव्यावयवानारंखार्दृप्यारणांहविषांभोक्तृत्वेनतेमरुत्कारयमित्वंवोदेवताविशेषाः श्रूयंते नचतेषांफलप्रदातृत्वंसंभाव्यते ओषधीभ्यःस्वाहावन

स्पतिभ्यःस्वाहामूलेभ्यःस्वाहेत्याहावचेननानामोषधिवनस्पतितरवयवानांदेवतात्वंश्रूयते तत्रकुतोहविर्भोक्तृत्वंकुतस्तरांतर्पितः कुतस्तमंफलदानं तस्माद्धिग्रहादिमतोदेव

तानामभावान्नदेवताप्रसादेयागस्यफलदातृत्वंकिंतुश्रूयमाणफलसाधनत्वान्यथानुपपत्त्याकल्प्यमपूर्वं तच्चद्वारमभ्युपगतेष्वपिदेवेष्वपूर्वस्यैवफलदातृत्वमवश्यंवक्तव्यं मं

त्रार्थवादेतिहासपुराणेषुदेवतानामपितत्पञ्चरणानुष्ठानवृत्तान्तादिमंत्रप्रयोगेभ्यःसमाहितस्यानुकीर्तनात्तस्मान्नदेवःफलप्रदइतिसिद्धं औपनिषदास्तीश्वरस्यफलदातृ

त्वंमन्यंते तथाहितृतीयेशास्त्रेतृतीयाध्यायेविचारितं किंधर्मःफलंददातिअहोस्विदीश्वरइतिसंशयः तत्रमीमांसकोक्तन्यायेनधर्मःफलप्रदइतिपूर्वःपक्षःसिद्धांतस्तुकिंध

र्मस्यानपेक्षेतएवफलप्रदः किंवाकेनचिच्चेतनेनाधिष्ठितः नाद्यः अचेतनस्यानारत्यानभिज्ञस्यफलदातृत्वायोगात् द्वितीयेतुयेनाधिष्ठितःसएवफलदातास्तु

नचैवंधर्मवैयर्थ्यमितिशंकनीयंवैषम्यनैर्घृण्यपरिहारायधर्मापेक्षणात् अस्तितुधर्मकांक्षिदत्तमंसुखंदुःखंकांक्षिन्याधर्मकांक्षिदधर्मंप्रापयतीश्वरः कथंविषमोनभवेत्कथं

वाविचित्रंदुःखंप्रापयतीतिनिर्घृणोनभवेत् धर्माधर्मानुसारेणतत्तत्परोगृहपितनजातिनामिवनवैषम्यनैर्घृण्येप्राप्नुतः नहिदुष्टशिक्षांशिष्टपरिपालनंचकुर्वतांगुर्वादीनांवैषम्य

नैर्घृण्येविधेनपदुत्तंत्वेगामंःकारेतानिरश्रामोषधीवनस्पमारीमां [illegible] मिति तत्रपैवातुईश्वरस्यफलदातृत्वेअंशमूहः यद्यपितस्यएवेनमितिः प्रजापा

फलप्रदत्वेनादरनमापादनन्निमित्ततयाप्राधान्याविवक्षितत्वाधमफलप्रदत्वेनमवहाः ङ्कनस्मान्नस्मारितवान् फलप्रदञ्जगदीश्वरः पूर्वः एक एव सर्वः स एव स्वजनायस्मल
मतिप्रसंगेनेति पाद्मेगीतामाहात्म्ये ईश्वर उवाच कदाचित्पार्वतीदेवी नरम्येसुखासीनं मुदान्वितं आनंदयित्रीलोकानांलक्ष्मीः पप्रच्छसादरं श्रीरुवाच शयालसितदुग्धाब्धौ भगवान्केन
हेतुना उदासीन इवैश्वर्ये जगतिस्थापयन्नपि ईश्वर उवाच इतिदेव्यावचः श्रुत्वापुरभिन्नामगर्जितं उवाच श्लक्ष्णयावाचाविस्मयस्मेरलोचनः श्रीभगवानुवाच नाहंसमुद्रवर्तिनि
दृष्टंतुनिजंमाहेश्वरंमह रस्मात्तानुवर्तिमायशयाम्यन्तर्निमग्नया कुशाग्रयाधियाद्रेविपश्यन्तियोगिनोहृदि यद्रूपंतिपञ्चवेदानांसारंमीमांसतेमशं नदेकमक्षरंज्योतिरात्मरूपम
नामयम् आत्मानंदरसंदोहंनिष्पंदंद्वैतवर्जितं यदाश्रयाजगद्वृत्तिर्येनमयाचानुभूयते नयेनरहितंकिंचिज्जगदेतच्चराचरं सिद्धार्थोपदुधात्मनेवेदशास्त्रांबुधीन्सुधीः द्वैपायनोयदा
साहगीताशास्त्रंचित्तस्थवान् यदास्याघ्रहानंदनंदीभूनिमसन्निग्रान्तरेदेवःशिवसंध्याशौमनिमाभिनेः ईश्वर उवाच इतितस्यगिराजेतनिर्भरानंदनवचः प्रहृष्टोमुक्तलोला
सीम्नत्वाल्लक्ष्मीर्विसिस्मिये श्रीरुवाचभवानेवहृषीकेशध्येयोसियमिनांसदा तस्मात्वजः परंत्वत्यदितिकौतूहलंहिमे चराचराणांलोकानांकर्ताहर्तास्वयंप्रभुः यथास्थितस्त
त्वस्त्वंयदिमांबोधयाच्युत श्रीभगवानुवाच मायामयमिदंदेविवपुर्मेनतुतात्त्विकं सृष्टिस्थित्युपसंहारक्रियाजालोपबृंहितं अतोमत्परमनोरूपंद्वैताद्वैतविवर्जितं भावाभा
वविनिर्मुक्तमाद्यंतरहितंप्रिये शुद्धसंवित्प्रभाभासंपरानंदैकसुन्दरं रूपमैश्वर्यमात्रैकंगम्यंगीतासुकीर्तितं इत्याकर्ण्यवचोदेवीदेवस्यामिततेजसः शंकमानाहवाक्येषुपारस्पर
विरोधितं स्वयंचेत्परमानंदमवाङ्मनसगोचरं बोधयंतिकथंगीताइतिमेछिंधिसंशयं ईश्वर उवाच तच्छ्रुत्वावचवचोपद्मामितितस्यपुरःसरं आत्मानुगामिनीगीतांस्वयंबो

श्रीलिं॰चं॰
८

धितवान्प्रभुः अहमात्मा परेशोपि परापरविभेदतः द्विधाततः परः साक्षी निर्गुणो निष्कलः शिवः अपरः पंचवक्त्रोहं द्विधा तस्यापि संस्थितः तत्राद्ये भेदतो वाच्यो यथास्माहं महे
श्वरः गीतापावासरूपेण यच्छिवः शिवपतेर्दृहे मदीयः पाशबंधोयं संसारो विषयात्मकः परस्मात्सर्वशास्त्रेशः पंचवक्त्रो महेश्वरः इति तस्य वचः श्रुत्वा गीताशास्त्रमहोदधेः
इदं परविभेदेन बुध्यते भवभीरुभिः तमयच्छदिदं वाक्यमंगत्र्यंगसंस्थितं महात्म्यमिति हा संचसर्वं तस्मै स्ववेदयेत् शृणु सुश्रोणि वक्ष्यामि गीतासंस्थितं महात्म्यमिति हा
संचसर्वं तस्मै स्ववेदयेत् शृणु सुश्रोणि वक्ष्यामि गीतासंस्थितिमात्मनः वक्त्राणि पंच जानीहि पंचाध्यायाननुक्रमात् दशाध्यायान्भुजांश्चैकमुदरं द्वे पदांबुजे एवमष्टादशा
ध्यायी वाङ्मयी मूर्तिरैश्वरी जानीहि ज्ञानमात्रेण महापातकनाशिनी इत्यादिना गीता माहेश्वरी मूर्त्तिरित्युक्तं अत एव भगवता वासुदेवेनाप्यर्जुनं प्रतीश्वरः सर्वभूतानां
हृद्देशेर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतमित्यादिना ईश्वरशब्दवाच्य
स्य शिवस्यैव प्रसादाच्छिरतिशयशांतिप्राप्तिर्नान्यस्य प्रसादादिति गीताशास्त्रस्य तात्पर्यमिति ध्वनितं तथा नैष्ठापिकाः स्वाभिमतं परमात्मानं भवप्रियस्य स्थानेऽपीश्वरादिशब्दै
र्व्यवहरंतः परमेश्वरस्यैव परभावं स्वाभिमतं प्रकटयामासुः तथा भरतमुनिमतानुसारिणाश्च कल्पान्तरे कश्चित्तु रक्तालोकान्महेश्वरः मनसैवासृजद्विश्वं बुद्धानां च निजेच्छया
इत्यादिरसोत्पत्तिप्रकारेणादिषु व्यवहरंतः इत्युदाहार्यं बुद्धेस्तत्र कृतादिशब्दादेव प्रमिति इत्यभिधीयते रतौ ईशानशब्दस्यापि अभिधानस्य स्वापांतरनिषेधस्यान्यं गच्छमात्रः पुरुषः
परमात्मानिर्णयतः इत्ययमर्थः सर्वेषां संमतः तथा च पत्याय सोशब्देन च श्रुतौ अभिधानं तस्यो सापतेः परमात्मभावः तत्र कारणं तत्र इत्यस्य तोऽवसीयते देवतांतरयोगे तत्
त्पराया वा प्रयोगोपपत्तावेवानुशासनाभावात् रूढौ स्वभावे न तदभिधानस्य नित्वायोगादिति भावः यच्च पुराणादिषु कुचित्क्वचिद्विष्णोर्विधातुर्वा रुद्रादुत्कर्षः त
स्यापकर्षः प्रतीयते स तमोपाधितरतरात्मेदविषयः वेदस्य वेदपुराणेषु सोपकर्षोऽनुरूपते एतस्यासो हरस्यास्यविभूतेरेव केवलं उत्कर्षोयः पुराणेषु दृश्यते वेदम्

वेषु च असौ सत्वात्मना विष्णोर्न स्वरूपेण सत्वम् सर्वकारणमीशानः सांबः सत्वादिलक्षणः न विष्णुर्न विरिंचिश्च न देवो नापरः पुमान् इत्यादिपाद्मपुराणादिवचनदर्शनात् न
च शिवस्य विष्णोर्विरिंच्यादावुभयवादिवचनादपि निरूपस्तवनीयं अहं च भवतो वक्त्रात् स्यां ने द्वौ रक्तपद्मक शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रकः इत्युक्त्वा ब्रह्मणः पुत्रो ललाटादु
स्थितः प्रभुरित्यादिकौर्मराजधर्मादिवचनेन तस्य लोकानुग्रहार्थमैच्छिकावतारोक्तेः ब्रह्मा विष्णुश्च रुद्रश्च श्रीशम्भोरखिलेश्वरात् न भिन्नं तेन रुद्रत्वादवतारहरेरिव एवं तस्यावतारस्य
ध्स्मादेः कीर्तनं यथा न दीपत्वेन कीर्त्यं तेन महाविष्णोर्गुणात्मकापि एवं शिवस्य कीर्त्यते न रुद्रशेषं कृतार्थया सर्वकर्तृत्वसर्वान्तर्यामित्वप्रमुखा गुणा इत्यादिस्कन्दपुराणाच्च स्कान्दे शङ्कर
संहितायां यथा वेदेषु शास्त्रेषु विश्वाधिक उमापतिः पुरुषः परमः साक्षात् पाशविमोचकः परं ब्रह्म परं धाम परं ज्योतिरनाकुलः मंगलं मंगलानां च पावनानां च पावनम् सर्व
मंगलकोऽपि न मुतः शम्भुः सुमंगलः आगमान्तर्गतेऽप्यस्मिन्मतं प्रवदन्ति हि तद्देवपुराणानि शिवं साम्बं सदाशिवं स्वतन्त्रमेकमद्वैतं प्रवदन्ति निरंकुशं ब्राह्मं पाद्मं वैष्णवं च शैवं भाग
वतं तथा भविष्यं नारदीयं च मार्कण्डेयमतः परं आग्नेयं ब्रह्मवैवर्तं लैङ्गं वाराहमेव च स्कान्दं च वामनं चैव मात्स्यं कौर्मं च गारुडं ब्रह्माण्डं चेति पुण्योयं पुराणानामनुक्रमः तत्र शैवानि
शैवं च भविष्यं च द्विजोत्तमाः मार्कण्डेयं तथा लैङ्गं वाराहं स्कान्दमेव च मात्स्यमन्यत्तथा कौर्मं वामनं च मुनीश्वराः ब्रह्माण्डं च दशेमानि त्रीणि लक्षाणि संख्यया ग्रन्थानां महिमा सर्वैः
शिवस्यैव प्रकाश्यते असाधारणया मूर्त्या नाम्ना साधारणेन च वदन्ति शिवमेतानि शिवत्वेन प्रकाश्यते विष्णोर्हि वैष्णवं तद्वत्तथा भागवतं तथा नारदीयपुराणं च गारुडं वैष्ण
वं विदुः ब्राह्मं पाद्मं ब्रह्मणो हि अग्नेराग्नेयमेककं सावित्रं ब्रह्मवैवर्तं वै वस्वं चैवमष्टादशं स्मृतं दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः अष्टौ यानि द्विजवरैस्तेषां धर्मस्तु तत्र यत्
वैष्णवानि च चत्वारि नामसानि मुनीश्वराः सात्त्विकानां श्रौतधर्मास्तेषु तद्देवताहरिः ब्रह्मेतु राजसे वैश्यसेव्ये सर्वत्र संमते तस्मात् शैवानि विप्राणां पुराणानि हितानि हि त
स्मात्तेषु सर्वात्मा साम्बः सर्वोत्तमोत्तमः एवं सर्वमनर्हित्वा वैकुण्ठप्रमुखानपि इत्युक्तं शौनकादिभ्यो सत्यवत्यात्मजेन हि एवमेव पुराणेऽपि दर्पणः प्राप्तसंशयाः मेरोरन्त्यादि



श्रीलिं·चं० ८

धातारं दृष्ट्वा तत्र प्रजापतिम् स्तुत्वा तैर्विविधैः स्तोत्रैः पप्रच्छुर्विनयानताः ब्रूह्येषां भगवन्नाद्यः संशयाविष्टचेतसां परं ब्रह्म परं ज्योतिः को वा देवो भवेदिति तेषां तद्वचनं श्रुत्वा ब्रह्मा ध्या
त्वा सुरगणं तदा तमुंडरीकमध्यस्थं नीलग्रीवं त्रिलोचनं चंद्रार्द्धभूषणं सोमं सच्चिदानंदविग्रहम् अलक्ष्मपिंगलमीशानमर्त्तं सर्वपरात्परं आनंदाश्रुकलान्सिंचन् हर्षगद्गदवाग्वयं ईशा
नः सर्वविद्यानामीश्वरो जगतां प्रभुः ब्रह्मणोधिपतिः शम्भुः विष्णोरधिपतिः स्वराट् सदाशिवः परं ज्योतिरोंकारनिलयो महान् स एव शंकरः शंभुः परब्रह्म न चेतरः सेव्यः सर्वपु
नः सत्यमुद्धृत्य करमुच्यते तस्मात्स एव सर्वेशः शतवारं मयोच्यते तत्समो नास्ति लोकेषु न परो नापरः क्वचित् सर्वस्यापालनरक्षोपायस्थलयोर्हरः स्वः शिवः इति विदितिष्ठति सर्वात्मानेन
ह्यतोसिदं जगत् यस्माद्वाचो निवर्त्तंते अप्राप्य मनसा सह आनंदमस्य यो वेत्ति न भयेतस्य कुत्रचित् अद्यापि ब्रह्मविष्णुभ्यां न दृष्टोऽयं महेश्वरः पशूनां पतिरीशोयं ब्रह्माद्याः पश
वः स्मृताः बहुनात्र किं परं ब्रह्म स एव ब्रह्मर्षिसत्तमाः सत्यमो हि महादेवं परं ब्रह्म सनातनम् ज्ञात्वा प्रणम्य धातारं स्तुत्वा च विविधैः स्तवैः धृतत्रिपुंड्ररुद्राक्षमालाभरणविभूषिताः
कैवल्यमापपुः सर्वेपि ह्यवमत्याप्रजापतेः निश्चितं ब्रह्मणा एवमेवं वेदांतसारतः इति वेदांतवाक्यानां निष्ठा काष्ठा महेश्वरे आगमेषु तु वेदेषु शिवस्य सर्वोत्कर्षप्रतिपादनं विस्प
ष्टमस्ति ननु शिवागमानामप्रामाण्यमाशंकनीयं प्रमाणमूर्द्धन्येषु शैवपुराणेषु बहुधा तेषां बहुकरणात् कंठोक्त्या केषुचित्प्रामाण्यव्यवस्थापनाच्च महाभारते सांख्यं योगः पां
चरात्रं वेदः पाशुपतं तथा ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै इति वचनात् पाशुपतागमानां सांख्ययोगादिवत् वैदिकप्रस्थानात् प्रस्थानांतरत्वोक्तत्वात् पुराणं तर्क
शास्त्रं च छंदोऽलंकारलक्षणं वेदमीमांसकोद्वापि च धर्मं तथैव च सप्तद्वीपवृषिश्चासुराज राज्ञो भवेन्नृप इति आगमपुराणादिषु तद्दानप्रशंसनात् यत्तु कौर्मे उपरिभागे
पंचदशाध्याये पाखंडिनो विकर्मस्थान् धर्मोचार्यालये वच पांचरात्रान्पाशुपतान्वाङ्मात्रेणापि नार्चयेत् तत्रैव तत्कोनविंशोऽध्याये बोधः श्रावकनिर्ग्रंथाः पांचरात्रविदो
जनाः कापालिकाः पाशुपताः पाखंडापे च तद्विधाः तथा च मनुः पाखंडिनो विकर्मस्थान् वैडालव्रतिकान् शठान् हैतुकान्वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेदिति तथा पाराश

रपुराणे दशमाऽध्याये अथातः संप्रवक्ष्यामि ज्ञानानुत्पत्तिकारणमित्युपक्रम्य वेदानां च विरोधः स्मृतीनां च तथैव च पुराणानां च विद्वेषो भारतस्य तथैव च तेषां मध्ये तु विद्वेषः स्मृ-
तीनां च तथैव च पुराणानां च विद्वेषो भारतस्य तथैव च तेषां मध्ये तु विद्वेषस्तेषां बाधश्च केशव तेषामर्थापहारश्च ज्ञानानुत्पत्तिकारणं तस्मात्कौर्मवासिष्ठलैंगपाराशरपुराणादी-
नां सर्वमीमांसापारदृश्वमाधवाचार्यनिबंधानां च पर्यालोचनया पाशुपतादीनामप्रामाण्यमेव कल्प्यत इति । ननु अवैदिकांशेऽप्रामाण्यं न वेदाविरुद्धांशे उक्तं च सूतसंहितायां मुक्ति-
खंडे चतुर्थाध्याये तथापि योंऽशो मार्गाणां वेदेन न विरुध्यते सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणामिति वेदाविरुद्धांशे प्रामाण्यं किं न स्यादित्याशंक्य तत्तद्वत्सेवाधिकारिविशेषं प्र-
तीत्याह । तथापीति माधवः । यज्ञवैभवखंडे द्वाविंशेऽध्याये सूत उवाच अथातः संप्रवक्ष्यामि मार्गप्रामाण्यनिर्णयं श्रद्धया सहिता यूयं शृणुध्वं मुनिपुंगवाः वेदाश्च धर्मशास्त्राणि
पुराणं भारतं तथा वेदांगान्युपवेदाश्च कामिकाद्यागमानपि कापालं लाकुलं चैव तयोर्भेदान् द्विजर्षभाः तथा पाशुपतं सौम्यं भैरवप्रमुखागमान् तेषामेवोपभेदांश्च शतशोऽथ स-
हस्रशः विष्ण्वागमांस्तथा बौद्धानार्हतागमानपि लोकायतं तर्कशास्त्रं विस्तारसंयुतं मीमांसामतिगंभीरां सांख्ययोगौ तथैव च निर्ममे शंकरः साक्षात्सर्वज्ञः स्वयमेव
च अधिकारिविभेदेन नैकस्यैव सदा द्विजाः तत्तदुक्तेन मार्गेण तु तत्तदाप्नोति सिद्धिमिति अत एव मानवपुराणे आगमानुपक्रम्य अधिकारिविशेषेण प्रवृत्तिर्नहि संशय इत्युक्तं अत एव
पार्थसारथिमिश्रैरपि पाञ्चरात्रे श्रुतौ कर्म सर्वतो चान्यथा प्रतीयते तावत्तयोर्विरुद्धत्वेऽपि नानुष्ठानमिष्यते इति वार्तिकमुदाहृत्य मतेन पुंसां तत्र प्रामाण्यं श्रुतिविरुद्धानां स्मृत्यादीनामित्युपसंहृत्य भा-
ष्यमप्यनुष्ठानरूपाप्रामाण्यपरं व्याख्येयमित्युक्तं अत एवोत्तरतंत्रे आगमानामविरुद्धांशे प्रामाण्यपरं व्याख्येयमित्युक्तं अत एवोत्तरतंत्रे आगमानामविरुद्धांशे प्रामाण्यं स्वीकृतं भट्टैः एवं
यानि पाशुपतागमनिंदावचनानि तानि अश्रौतपाशुपतागमविषयाणि तदुक्तं वायुसंहितायां शैवागमोऽपि द्विविधः श्रौतोऽश्रौतश्च संस्मृतः श्रुतिसारमयः श्रौतः स्वतंत्र इतरो म-
तः स्वतंत्रो दशधा पूर्वमिमारभ्य श्रुति[illegible]मयस्तु श्रौतः कोटिप्रविस्तरः परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यते इत्यनेन श्रौताश्रौतविभागस्य स्फुटं प्रतिपादनात् श्रौतपाशुपतस्याथर्व-

श्री लिं॰ चं॰ ण्डिरः कालाग्निरुद्रोपनिषदादुपदिष्टपाशुपतशांभवादिसंज्ञितपरमवैदिकव्रतमप्यं चेतनस्य वैदिकमार्गाद्भिन्नमतत्वाभावात् एवं पाशुपतो योगः सेवनीयो मुमुक्षुभिः मसमच्छन्नेर्हिसततं नि

१० ष्कामैरिति हि श्रुतिस्मृतिस्मार्त्तस्मपुराणाद्य अघोरागमानामपि सर्वांशेनाप्रामाण्यं किंतु वैदिकमार्गविरुद्धवामाचारतन्त्रमुग्धकनाघनच्छेयांशे बुद्धविष्णुमहादेवप्रमुखैः पौरकीर्तिताः आ

गमाख्यानयानेयाहिशानेवान्यथा बुधः अन्यथानेतुनेपाश्रेद्धितद्वाः स्युनसंशयः इत्यादिमानवपुराणोक्तरीत्या श्रुत्यविरुद्धार्थकथं चित्रत्वतिपस्य अप्रामाण्येचैव शास्त्राणि लोकेस्मिन्मोह

नायवै वेदवादविरुद्धानि मयैव कथितानि तु इत्यादिकौर्मवचनोक्तरीत्यानामसज्जनव्यामोहार्थविप्रलम्भमूलत्वस्य वाक्यस्य नयासर्वथा अप्रामाण्यवारणेन प्रामाण्यव्यवस्थापनसंभवे महापुरु

षप्रणीतानां तेषां सर्वथैव अप्रामाण्यकल्पनायोगात् भागवते अक्रूरस्तोत्रे त्वयाचविधयाकेचित्स्युपक्रम्य त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं वह्वाचार्यविभेदेन भगवंत्वामुपासत

इत्यादिनातेषां अधिकारिविभेदेन प्रामाण्यविभावनाच्चास्वतंत्रागमोदितेष्वाचारेषु केऽधिक्रियंत इति चेदुक्तं पाद्मे गोतमादीनां पापाद्वामहतो नराः येन तावेदबाह्यत्वं येच संकीर्णयोनिमा

तेधिक्रियंते तं वेषु स्त्रीशूद्रास्त्वपयाययं अनुग्रहार्थमेतेषामागमाः निर्मिताः पुरा तस्माद्वेदवाह्यानां रक्षणार्थं च पापिनां विमोहनाय शास्त्राणि करिष्यामो वृषध्वज एवं संचोदितो रुद्रो माध

वेन मुरारिणा चकार मोहशास्त्राणि केशवोपि शिवेरितः इत्यादिनातेषां कथंचित्प्रामाण्येताभ्यां पाशुपतयोबराजादयः प्रणीतास्तित्वरणीने तत्वैदिकमार्गवहिर्भावानांतेत्राधिकार इत्यां प्रपंचितरस्य

लमतिप्रसंगेन एवं श्रुतिस्मृतिपुराणमहाभारतरामायणानेकग्रंथशास्त्रकारसंमत्या शिवएवं सर्वोत्तर इति सिद्धं ॥ अथ एवं सर्वैर्निषेव्यत इति प्रतिपद्यते सकलगुणनिलयस्या

स्याभावात् भगवतो श्रुतिरन्यमजनमत्संनमादरेण निषेधयति शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्येत्यादिना शिवशब्दवाच्यस्य वस्तुन एव ध्येयत्वं अन्यथाकथं सा रनिवृत्तिः

निरस्तसमस्तदोषकलंकनिरतिशयमंगलाधारत्वं शिवत्वं यस्यानान्मोक्षरूपं फलमुच्यते यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीति शिव एको

ध्येयः शिवंकरः सर्वमन्यत्परित्यजेति शिवमतिरिक्तस्य मुमुक्षुणां ध्येयत्वं [illegible] आयते अतः शिव एव मोक्षकामैर्ध्यानयोग्यो नान्य इतिस्थाने अन्यदेवान्तरस्त्यज्यये यजेत्सं वासमोक्षाय

सर्वमंत्रान्परित्यज्य जपेत्संचाक्षरीं सदेति वायवीसंहितायां अन्ये त्वा मंत्रिणो ज्ञानयज्ञस्य तपस्विनः शिवं साक्षात्तं बहुगुणं भजन्मा बहुपुण्यं सर्वपापनाशं ये विहाय साक्षमीशानं भजंते देवतांतरं ते
महाघोरसंसारे पतंति परिमोहिताः पाद्मे महेश्वरात्परं सर्वं त्रैलोक्यं सचराचरं ते लब्ध्वा मनुष्यत्वं येन भक्ता महेश्वरे तेष्वज्ञाता हृदं देवं यः सेवेतान्यदेवतां स गृहे भागीरथीं त्यक्त्वा कांक्षते मृगतृष्णि
कां नारदपंचरात्रे नारद उवाच बृहस्पते न प्रकाभोगान्सुविपुलान्प्राप्नोति परमं पदं सुरासुरनराणां च मुनीनामपि दुर्लभं तद्गुह्य सकलं नाथ नातः परमहं वृणे अनेन ज्ञानपापो ध्येयत्वं प्रभो भोग
मोक्षदं बृहस्पतिरुवाच शृणु पुत्र प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् न कस्यापि मया ख्यातं भवभूरिभयावहम् परात्परतरं पुत्र नारायणपरायणाः प्राप्नुवंति परं स्थानं यज्ज्ञानं तत्सुखं महत् जपय
ज्ञतपोहोमव्रतस्वाध्यायसंयुताः दयादानदमस्नानशौचाचारसमन्विताः अपि ते न प्रपश्यंति ये शिवं निःशंकाः अन्यं तमः प्रपद्यंते ये वै शंकरं निःशंकाः तस्मादेकांतचित्तेन सर्वाराध्यपशंकरं
अविकार्यतिमीशानं शवं चंद्रावतंसकम् त्रिनेत्रं शूलपाणिं च भुक्तिमुक्तिप्रदं शिवं प्रपद्येत ब्राह्मणाः सर्वसिद्ध्यर्थं कुर्या ओंकारपूजनं ब्रह्मविष्ण्वादिदेवानां परमापि सर्वपूजया अथवैकं सर्वसुरत्वं
वपरं गांधर्वं एर्वकं सार्वभौमत्वमीशस्य पूजया वै हि सिध्यति मनोहरास्त्रियः सौख्यं कल्याणभवनानि च अपवर्गं तथानंतं चापि पूजया शूलिनः खलुः अश्वमेधसहस्राणि राजसूयशतानि च महेशा
र्चनपुण्यस्य कलां नार्हंति षोडशीं वायवीसंहितायां अंत्यजो वा धर्मो वापि मूर्खो वा पतितोपि वा शिवं प्रपन्नश्चेल्लुप्सः पूज्यः सर्वसुरासुरैः तस्मात्सर्वप्रयत्नेन भक्त्यैव शिवमर्चयेत् अभक्तानां
क्वचिदपि फलं नास्ति पतत्वतः वस्त्रांमतिर्हत्संते शृणु कल्मषवो मम वेदेः शास्त्रैर्वेदविद्भिर्विचार्य सुविनिश्चितं ब्रह्महा वा सुरापो वा स्तेयी वा गुरुतल्पगः मातृहा पितृहा वापि वीरहा भ्रूणहापि
वा संपूज्य मंत्रकं भक्त्या शिवं परमकारणं तैस्तैः पापैर्विमुच्येत तद्वर्षैर्द्वादशभिः क्रमात् तस्मात्सर्वप्रयत्नेन पतितोपि यजेच्छिवं ॥ कृत्वापि सुमहत्पापं भक्त्या पंचाक्षरेण तु पूजयेद्यदि देवेशं तस्मात्
पापात्प्रमुच्यते अब्भक्षा वायुभक्षाश्च ये चान्ये व्रतकर्षिताः तेषामेतैर्व्रतैर्नास्ति शिवलोकसमागमः भक्त्या पंचाक्षरेणैव यः शिवं सकृदर्चयेत् सोपि गच्छेच्छिवस्थानं शिवमंत्रस्य गौरवात्
तस्मात्तपांसि यज्ञाश्च सर्वे सर्वस्वदक्षिणाः शिवमूर्त्यर्चनस्यैते कोट्यंशेनापि नो समाः यः सकृत्पतितो वापि मूढो वा मुच्यते नरः पूजयेत्तुच्यते भक्त्या नात्र कार्या विचारणा दुर्लभं प्राप्य मानुष्यं ये



श्रीलिं॰चं॰
११

र्चयंति पिनाकिनं तेषां हि सफलं जन्म कृतार्थास्ते नरोत्तमाः सौभाग्यं कान्तिमद्रूपं सत्संगः प्रभावना शौर्यं च जगति ख्यातिः शिवमर्चयतो भवेत् त्वरितं जीवितं याति त्वरितं याति यौवनं त्वरितं व्या
धिरभ्येति तस्मात्पूज्यः पिनाकधृक् न शिवार्चनतुल्योऽस्ति धर्मोऽन्यो भुवनत्रये इति विज्ञाय यत्नेन पूजनीयः सदाशिवः आध्यात्मिके चाधिदैवे चैवं चैवाधिभौतिके देवासीनो विरिंचं वै मोक्षार्थी शिव
मर्चयेत् तथा लैङ्गे बहुनोक्तेन किं विप्र महादेवस्य पूजनात् निकृष्टोऽपि विमुच्येत स्वसंसारमहोदधेः सौरपुराणे ये नराः सततं देवं पूजयंति त्रिलोचनं ते धन्यास्ते महात्मानस्ते कृतार्थाः प्रकीर्तिताः
सफलं जन्म जयते यस्त भगवन्तमुमापतिं अश्वमेधायुतैः पुण्यं फलं भवति नारद अथैकं शिवसंभक्त्या यः पूजयति शंकरं सोऽपि याति शिवस्थानं किं पुनर्बहुशोऽर्चनात् जीवितं च चलं ज्ञात्वा यावद्यत्र वोर्दकं
मृत्युरंतावत्कालस्ततः कुर्याच्छिवार्चनं भवव्यालमुखस्थानभीतानां देहिनां मुने तस्माद्धि मोचकं नैवास्ति शिवलिंगस्य पूजनं शिवपुराणे यावत्तावत्स्वेति मरणं यावत्तावत्स्थितिर्जरा यावन्नेन्द्रिय
वैकल्यं तावच्छिवमर्चयेत् ये पंचत्वं न रे देवे शं विषयासक्तमानसः शोचंति ते मरणाश्चैव पंके मग्ना गजा इव कालः सन्निहितो यावः संपदः परमा यतः समागमाः सापगमाः सर्वाणि शिवम
र्चयेत् भक्त्या शिवं भजेद्यस्तु महापातककृतोऽपि सोऽपि याति परं स्थानं त्रिसप्तपुरुषान्वितः किं बहुनात्रैव केवाशास्त्रेषु लौकिके वा शास्त्रेषु शिवाराधनप्रसंगो नास्ति प्रदेशोऽस्ति भक्तस्येव न
स्माद्देवतान्तरं पर्युदस्य उमासहायः सदा शिवः पूज्य इति सिद्धं तत्र शिवपूजनं लिंगे कार्यं उत प्रतिमायामिति विचार्यते विश्वेश्वरसंहितायां बेरमात्रे तु सर्वे त्वयं पूज्यन्ते देवतागणाः लिंगे चैव हि
सर्वत्र कथं संपूज्यते शिवः इति शौनकादिभिः पृष्टे सूत उवाच शिव एको द्विविधः प्रोक्तो निष्कलः सकलस्तथा निष्कलत्वान्निराकारं लिंगं तस्य समागतं सकलत्वात्तथा बेरं साकारं तस्य संगतं शि
वस्य ब्रह्मरूपत्वं निष्कलत्वाच्च निष्कलं लिंगं तस्यैव पूजायां सर्ववेदेषु संमतं शिवस्य जीवरूपत्वं सकलत्वात्तथैव च सकलं च तथा बेरं पूजायां लोकसंमतं सकलाकलरूपत्वाज्जीवब्रह्मात्मे
धः शिवः तस्माल्लिंगे च बेरे च शिवः संपूज्यते जनैः अब्रह्मत्वात्तदन्येषां निष्कलत्वं न हि क्वचित् तस्मात्ते निष्कले लिंगे नाराध्यन्ते सुरेश्वराः अब्रह्मत्वाच्च जीवत्वात्तथान्ये देवतागणाः स
र्वे सकलमात्रत्वात्पूज्यन्ते बेरमात्रके शिवस्योभयरूपत्वाल्लिंगे बेरे च पूज्यते तत्रैव शिवेनोक्तं लिंगबेरसमं तुल्यं पूजनं लिंगमुत्तमं तस्माल्लिंगं परं पूज्यं बेरादपि मुमुक्षुभिः बेरप्रतिमा तदुक्तमम

रकोशास्पदीकायां कुत्सितं नैवेरं शरीरं यस्यासौ कुवेरः लि पिववमूर्ध्वेषयाल्लिंगपूजायां विशेषो भस्म भारमेदो राघवेरीतात्मसेनोक्तो अस्मभस्म्यामानं प्रति देवदेव त्वमेवास्मान्नजे पीविश्वसुरःअपः सर्व

रूपं भवेज्ज्ञात्वा लिङ्गं वंदति तं प्रभुमिति तत्रैव कृष्णार्जुनगोरवकथने जन्मकर्मतपोयोगास्तपोस्तव च पुष्कलाः आश्यां लिंगेद्भुतोऽदेवत्वया श्रीपांडुगंयुगे श्रीकालोत्तरे स्थिरलिंगे सदाकार्ये सि

द्धिकामैः प्रयत्नतः भुक्तिमुक्तिप्रदं पुंसां चरलिंगे पिवार्चनं सर्वत्र संस्थितः शंभुः सर्वाधारेषु सर्वदा तथापि लिंगे भगवान् जंगमे च प्रतिष्ठितः अथ शल्यो कृत्वा सत्रा मंत्र ब्रुअक्तिपादिभि तथापि

लिंगे संपूर्णा पूजा भवति विशेषतु त्वपिपावरहस्ये प्रतिमायां प्रयत्नेन कृतयासौ गपूजया यत्फलं तत्फलं प्राप्य लिंगपालिंगपूजया प्रतिमायां यथा शास्त्रं सांगं शंकरस्तनं कर्तुं न शक्यते यस्माल्लिं

गपूजा संप्रयत्नतः स्कान्दे योऽर्चयापामर्चयेत् ज्ञानतो वर्षशतं नरः लिंगमेकं नरः पूज्य समभेतत्र संशयः लिंगेर्चिते यथा देवि प्रीतिस्तु मम पार्वति नतेषां प्रतिमायां तु पुराणोक्तोदितेनेपि लिंग

पुराणे पिवल्लिंगे सदाकाम्यो पिवपूजा मनोविभिः लिंगे भंगापि सांगे वपिवपूजायतो द्विजैः लिंगरूपं समासाद्य परमेते गिरिजापतिः वेदान्तिमयनं मंलिंगं मम यार्वेति सर्वदा स्कान्देपि शम्भो

लिंगं समभ्यर्च्य पुष्पधायेत्र तु षष्ठं प्राप्नोति त्रयमास योनात्र कार्या विचारणा समर्च्येशं भवेल्लिंगं अपि जन्मशतार्जितं पापपुंजं जहात्येव पुमानत्र संशयः कुर्वे किंकिन संभवेत्त्र पिवल्लिंगस

मर्चनात् त्रैलोक्यैश्वर्यसंपत्तिर्मया प्राप्ता सहस्रगे वायुपुराणे अपमेवपरो धर्मस्त्विदमेव परं तपः इदमेव परं ज्ञानं पिवल्लिंगं परार्च्यते येर्लिंगं सहाराध्य यो पूजितं पार्वतीपते कुतो जन्मभयं

तेषां संसारे दुःखसागरे सर्वपापस्मरंवेपो लिंगं शरणं गतः नतं पापानि बाधंते महान्त्यपि द्विजोत्तम नलिंगाराधनात्पुण्यं त्रिषु लोकेषु पावनं कालिकापुराणे लिंगेऽर्चिते र्चितं सर्वं जग

त्स्थावरजंगमं संसारार्णवमग्नानां नराणां तारणसाधनं अज्ञानतिमिरांधानां विषयासक्तचेतसां प्लवो नान्यो ति जगति लिंगाराधनमंतरा सौरसंहितायां हृद्लिंगार्चनं भक्त्या कुलते वेरव

र्जेना सर्वपातकयुक्तोपि पूज्यते मानवो चिरात् याद्ये महेश्वरकृतं सर्वं त्रैलोक्यं सचराचरं तेकृत ब्रूभ विष्णुप्रियेन भक्त्या महेश्वरे स्कान्दे जहरे लीयते ब्रह्मा वामनन्त्र जनार्दनः रुद्रयेचैवगाय

त्रीसर्वे देवालया गते लीयते मूर्ध्नि वैवेरः सर्वांगपरक्रमाः तस्माल्लिंगं पूजयते लिंगं विहाय प्रतिमां नरः भविष्ये यस्तु पूजयते लिंगे रेवार्दिमां नरतरं न स्यप्रीतः प्रशस्यापि प्रभावल्लोकानतुत्तमा ह

श्रीलिं० चं०
१२

शिवरात्रिवसंवारे लिंगमध्ये महादेवः साक्षाद्देवो व्यवस्थितः अनुग्रहाय लोकानां तस्माल्लिंगं प्रपूजयेत् कुरुक्षेत्रे निवसतां यत्फलं नैमिषे कृते प्रयागे च प्रभासे च गंगासागरसंगमे ॥ कृत्वो
व्यांगयायां च शालग्रामे महेश्वरे पुष्करे भारभूतेशे गोकर्णे गोकर्णेश्वरे तत्फलं दिवसेनैव मनुष्यो लिंगार्चनाद्भवेत् नास्ति लिंगार्चनात्पुण्यमधिकं भुवनत्रये लिंगेऽर्चिते निखिलं विश्व
मर्चितं स्यान्न संशयः यानि यानि तीर्थानि पुण्यान्यायतनानि च शिवलिंगे वसन्त्येव तानि सर्वाणि नारद तस्माल्लिंगं सदा पूज्यं भक्तिभावेन निश्चयः स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु
दीक्षितः यस्तु लिंगार्चनं कुर्याद्भक्तिभावेन नारद शिवाख्ये नरनाथ नित्यं महापातकसंभवैः दोषैः स्पृष्टो न लिप्येत पद्मपत्रमिवांभसा लिंगार्चने भवे दुःखलेषामेवात्र भास्कर येषां पुनर्भवच्छे
दविकीर्षति महेश्वरः न लिंगाराधनात्पुण्यं त्रिषु लोकेषु चापरं सर्वतीर्थाभिषेकः स्याल्लिंगस्नानांबुसेवनात् तस्माल्लिंगत्वमप्येकं समर्चयमहेशानं संप्राप्तं परमां लक्ष्मीं महातेजो भि
जंभशिरा सौरपुराणे विष्णुं प्रति शिववाक्यं लिंगे मां पूजयेद्देवि लिंगमूर्तिधरो ह्यहं अनर्च्य तु न संदेहः सर्वेषामेव दोषकृत् लिंगाराधनतः शिवमज्ञानेनाशयाम्यहं लिंगार्चनरतानां च
नास्ति संसारजं भयं तत्रैव नारदं प्रति वृत्तगोवाक्यं नास्ति लिंगार्चनात्स श्रेयो योऽस्मिन्भुवनत्रये ज्ञात्वा त्वमेवं देवर्षे लिंगार्चनरतो भव वाशिष्ठलैंगे जन्मान्तरसहस्रेषु यत्कृतं ना
ऽऽभिर्द्विजाः नराणां क्षीणपापानां श्रद्धा लिंगार्चने भवेत् यज्ञाश्च यांति दानानि तीर्थसेवा जपोत्सवं सर्वे लिंगार्चनाहीनं फलाय न भवेद्द्विजाः सर्वेषामेव धर्माणां मलिंगाराधनं वरं
कौशिके शिवप्राशाद्वीपत्रं लिंगं कृत्वा पूजां तये ये कृतं मरणमयं वापि ते भवंत्येव भूभुजः कर्मयुक्तो न च लिंगार्चनात्पुण्यं लोकेऽस्मिन्भीतिनाशनं तस्माल्लिंगेऽर्हितायेषां लोकानां पूजयेच्छि
वं यः शिवं पूजयेल्लिंगं स लिंगे भक्त्या मुने नृपः अहं चूनारकं द्वारं शिवलोकपुरं प्राप्नुयात् ज्ञानानि यज्ञाश्च महातपांसि सर्वं सा मद्धति भक्ति शिवलिंगरूपत्वं सर्वं ततस्तं भवतीश्वरस्य लिंगस्य नित्या
र्चनयेति विद्धि शिवरहस्ये विना लिंगार्चनं यस्य कालो गच्छति नित्यशः महाहानिर्भवेत्तस्य दुर्वृत्तस्य दुरात्मनः यज्ञतः सर्वदानानि व्रतानि विविधानि च तीर्थानि नियमा यज्ञाः लिंगा
र्चिते कृतं सत्ता कलौ लिंगार्चनं श्रेष्ठं यथा लोके प्रदृश्यते तथा नास्ती[illegible]शास्त्राणामेषु निर्णयः न लिंगाराधनादन्यत्पुण्यं वेदचतुर्ष्वपि विद्यते सर्वशास्त्राणामेष एव विनि

स्वपः सर्वमसत्सारमज्ञकर्मजालमशेषतः यन्नाशमायाति लिङ्गं येऽर्चयन्ति समाश्रयेन काशीवरे यस्मिन् स्नानमवेक्ष्य लिङ्गं विधिना समर्च्चिते समेऽत्र सोऽपरमां नाशं तमो
संचयं यान्ति न तु व्यतितयाशा मुर्यज्ञदानतपोव्रतैः यथा तु श्वेतसत्पुलिंगे विधिना श्रद्धार्चनेन सिद्धि लिङ्गार्चनविधानतो लिङ्गार्चनरताः सदा अमराः एव सविशेषः सास्यान्तज्ञो
पि मानवः न गोशतप्रदानेन सुवर्णशतदानतः यत्फलं लभते पुंभिः लिङ्गे लिङ्गपूजनात् सौरपुराणे धर्मार्थकाममोक्षाणां लिङ्गार्चा हेतुरुच्यते उपसर्गाः शमं यान्ति छि
द्यन्ते विघ्नपल्लवाः मनः प्रसन्नतां याति पूज्यमाने महेश्वरे पूजिते सर्वदेवेशे सर्वदेवनमस्कृते पूजिताः सर्वदेवाः स्युर्यतो सौ सर्वगो विभुः लिङ्गार्चनरतो नित्यं महापातकसं
भवैः दोषैर्न लिप्यते विद्यासमपत्रमिवाम्भसा. किमत्र शास्त्रमालाभिः संक्षेपेणोपदिश्यते आपातालात्सकलां त्यक्त्वा पूजयध्वं महेश्वरं शिवेदैः किन्तु बाणाद्यैः किं वा तीर्थादिसे
वया शिवः संपूज्यतां नित्यमुपदेशोयमुत्तमः सम्यग्विचारितं विचार्य सारं विचार्य पुनः पुनः असारेऽस्मिन् संसारे सारं पश्य पूजनं न दस्मरस्य संसारे स्थिरत्वं न दुर्भेद्यः यो निर्मूल
विच्छिद्यन्ते येषां लिङ्गार्चनं येषामदेवं हि यज्ञतिनित्यं सद्गुणशीलान् किल लिङ्गमूर्तेः तेषां सत्दोषा हि भवन्ति मर्त्ये भवाम्बुराशिं विषमं तरन्ति ते तेषीर्थविधियै यज्ञैर्देवार्चापरमा
नवाः नार्चितास्तुर्गतं गच्छन्तु यै शिवो भगवान्भवः कर्मभूमौ हि मानुष्यं जन्म नानि पुनेरपि स्वर्गापवर्गफलदं कदाचित्प्राप्यते नरैः तदिदं दुर्लभं प्राप्य नार्चयन्तीह ये शिवं ते वां हि
मूढमूर्खाणां विवेकं कुत्र तिष्ठति अयमेव परो धर्मः श्रीरोमेतत्परं तपः इदमेवाखिलं ज्ञानं पूजनं यन्महेशितुः तस्मात्सर्वं परित्यज्य कलौ पूज्यः सदा शिवः पद्मपुराणे त्रिलिंगे
पूजैव कर्तव्या मुमुक्षुभिरहर्निशं बहवो मोक्षमापन्नाः शिवलिङ्गस्य पूजया देवैर्नरैश्च गन्धर्वैर्मुनिभिश्च मुमुक्षुभिः अप्रमादेन कर्तव्या लिङ्गपूजैव सर्वथा शिवस्य संनिधिर्लिङ्गे
सर्वकालेषु सर्वदा तिष्ठत्यतो लिङ्गपूजा कर्तव्या सततं बुधैः वेदोक्तलिङ्गपूजैव कर्तव्या सततं द्विजैः वेदमार्गरतैः श्रेष्ठैर्मोक्षरूपफलार्थिभिः सर्वे शिवनार्चन नित्यं सुलभं लिङ्गपूजनं
स्नानमात्रं जनाः सर्वे नरके निपतन्त्यहो लिङ्गपूजनमात्रेण बहवो मुनयः पुरा ययुः कैलासनिलयमपत्ते ते बहु दुर्लभं लिङ्गपूजापरं शैवं निरीक्ष्य यमकिंकराः दूरादेव पलायन्ते स्मरतो

श्रीलिं·चं·
१३

यमशासनं न लिङ्गपूजनात्तस्मात्त्रिष्वपि सततं परं सत्यमेतत्सत्यमेतत्सत्यमेव न संशयः लिङ्गार्चनस्य माहात्म्यमसेयं निगमैरपि न ज्ञातं सर्वथा सम्यक् ब्रूतं विष्णुसुरैरपि कूर्मपुराणे लि
ङ्गात्परतरं नास्ति लिङ्गं मोक्षप्रदं मतं तस्माल्लिङ्गं चयेदीशं सर्वकामप्रदं विभुं अनुत्तमस्थानसंस्थं शिवलिङ्गं शिवात्मकं पूजनीयं प्रयत्नेन तस्मात्समाराधनं यतः शिवं प्रयांत्यप्रयत्नेन सर्वे
पि शिवपूजया अतो नानाविधोपायैः कर्तव्यं लिङ्गपूजनं सर्वज्ञः श्रीमहादेवः स सर्वव्याप्यकोपि सन् स्वभक्तानुग्रहार्थाय लिङ्गाकारेण तिष्ठति संसारनहमूलानि लिङ्गार्चनरता
निना सद्यो भवंति दग्धानि प्रबलान्यपि सत्वरं प्रगूढमूलसंबंधं महासंसारपादपं लिङ्गार्चनकुठारेण छित्वा यांति परं शिवं पुरा संसारशांत्यर्थं बहवो मुनीश्वराः लिङ्गस्याराधनं
कृत्वा मुक्ताः संसारबंधनात् विना लिङ्गार्चनं कस्य संसारो न विनश्यति अतः संसारशांत्यर्थं कुर्यात् शिवपूजनं ब्रूतं वैवर्ते द्वितीयविभागे उपमन्युहरिं प्रति नंदिवाराणश्यन
नाः लिङ्गाराधनतोऽस्येपि मुक्तिं मुक्तिं समागताः शिवरहस्ये गर्भधारणयंत्रेशस्तस्मात् सफलस्ततः यः कुर्मान्निर्गतः पुत्रो लिङ्गार्चनरतो भवेत् तदेव कुलङ्कस्यार्चनमेवैकं
कलौ सारतरं स्मृतः तदेव घोरसंसारमहासागरतारकं संसारानलतप्तानां शिवलिङ्गार्चनामृतं संसारतापं पापं च सद्यो दूरीकरोति हि शिवलिङ्गं समभ्यर्च्य यः पश्यति शिवं मुदा स
एव सर्वभाग्यानामालयो भवति ध्रुवं शिवेकं बहुनोक्तेन नित्यं यो लिङ्गपूजकः स्मयमाति प्रियतमः सत्यं सत्यं न संशयः कलौ तु मानुषं जन्म भवसत्यंत दुर्लभं तत्र चेन्मानुषं जन्म कृ
तं चेल्लिङ्गपूजनं मानुष्येष्वपि चेज्जन्म ब्राह्मणो ब्राह्मणोपरि तस्मात्तत्वं कर्तव्यं शिवलिङ्गस्य पूजनं सनत्कुमारसंहितायां वर्णानां परमो धर्मः शिवलिङ्गार्चनं परं ततस्मात्सपरोध
र्मो वर्णानां परमो तपः द्विजानां तु विशेषेण शिवलिङ्गार्चनं परं यत्फलं प्राप्यते राजन् शिवलिङ्गस्य पूजया न तत्फलं नैव संप्राप्यमश्वमेधार्बुदैरपि लिङ्गार्चनेन यत्प्राप्यं तत्प्राप्यं ना
न्यधर्मतः सत्यमेतत्सत्यमेतद्दितिजावालवाहनः लिङ्गार्चनप्रभावस्तु देवैः पुवहुधास्तुतः वेदैरपि न विज्ञातस्तन्माहात्म्यं वरानधे य धर्माः सन्ति सहस्रशोपि निगमे तत्रास्तथा तेष्वपं ध
र्मश्रेष्ठ इति श्रुतो बहुविधैर्वेदैस्तथाकोऽपि लिङ्गाराधनलक्षणाः सार्वभिःसाध्योन्यधर्मो मतः लिङ्गाराधनसंविकाधिकुरुते शर्वात्मकं वासापि सा रत्नैर्नीलमयं लिङ्गं विष्णुः पूजयते सदा

ऽिवचनैर्विश्वोरणि लिङ्गाराधनं नियमेनैव स्मृयते। किमुतान्येषां जीवानां। लिङ्गं परस्यार्थमहाकालोऽन्ते लीयं तेऽयत्र भूतानि निर्गच्छन्ति यतः पुनः। तेन लिङ्गं परमो मनिष्कलः परमः शिवः। लि
ङ्गत्वेन चिन्त्यते येन भावेन भगवान् शिवः। योगिभिस्तत्त्रिधा लिङ्गं व्यक्ताव्यक्तोभयात्मकं। व्यक्तं तत्सकलं ज्ञेयमव्यक्तं निष्कलं मतं। ज्ञानं ज्योतिर्मयं लिङ्गं व्यक्ताव्यक्तमिदं स्मृतं। तथा खलु रामेश्वर वृद्धेश्व
राख्यामेश्वर बिल्वकेश्वर वसिष्ठेश्वरागस्त्येश्वरेत्यादीनि लिङ्गानि ऋषिभिः नैस्तैर्महापुरुषैः प्रतिष्ठितानि स्वर्चितानि च तत्र नाम सर्वाणि दृश्यन्ते। तद्विवरणं पुराणाख्यानानि च शतशः श्रूयन्ते
ततो लिङ्गाराधनमेव प्रतिमापेक्षया सर्वार्थसाधकतमोक्तं विजयपरत्वेति सिद्धं। लिङ्गाभावे तु प्रतिमायां शिवपूजनं कार्यं। तदुक्तं शिवेश्वरसंहितायां। लिङ्गं प्राधान्यतः पूज्यं तदभावे तु चेष्टेरकं लि
ङ्गाभावे तु वेरं स्यात्पूजायां स्थापने मम मेति। लिङ्गमुक्तानि शैवागमे पद्मरागकाश्मीरपुष्परागेन्द्रनीलगोमेदविद्रुममौक्तिकरजतसौवर्णहीरकपारदबाणजशिवनाभिपार्थिवमुत्तरोत्तरमुत्त
ममिति वर्णभेदेन लिङ्गभेदमाह शिवेश्वरसंहितायां। रसलिङ्गं ब्राह्मणानां सर्वाभीष्टप्रदं भवेत्। बाणलिङ्गं क्षत्रियाणां महाराज्यप्रदं शुभं। स्वर्णलिङ्गं तु वैश्यानां महाधनपतित्वदं। शिला
लिङ्गं तु शूद्राणां महाशुद्धिकरं शुभं। स्वीयाभावे मदीयं तु पूजायां न निषिध्यते। स्त्रीणां तु पार्थिवं लिङ्गं सभर्तृणां विशेषतः। विधवानां निवृत्तानां रसलिङ्गं विशिष्यते। विधवानां प्रवृत्तानां स्फाटि
कं परिकीर्तितं। बाणलिङ्गलक्षणमुक्तं स्कन्दसंहितायां। नर्मदाजलमध्यस्थं बाणलिङ्गमिति स्थितं। बाणेन सुरार्चितं लिङ्गं बाणलिङ्गं तदुच्यते। तत्रापि त्रिपञ्चवारं यस्येव तुलासाम्यं न जायते
तदा बाणं समाख्यातं शेषं पाषाणसंभवं। नर्मदां वा प्रविश्य डूयोपरा तदुपलभ्यते। बाणलिङ्गं तदाविद्धि सर्वलिङ्गोत्तमोत्तमं। स्फाटिकं त्रिविधं प्रोक्तं सर्पचन्द्रानलात्मकं। श्वेतं रक्तं च पीतं च क्रमा
त्प्रोक्तं द्विजादिषु। अथ शिवनाभिमहिमा पाद्मे। शालग्रामशिलालिङ्गं यः करोति ममार्चनं। तेनार्चितः कार्तिकेयगणानामेकसप्ततिलिङ्गं स्फटिकवनामाख्येन हि पीठमकलं तमनं। इयं लिङ्गभेद
व्यवस्था पुराणान्तरविषया। कृते मणिमयं लिङ्गं त्रेतायां हेमसंभवं। द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे। सर्ववर्णाश्रमाणां तु कलौ पार्थिवमेव हि। एवकारेण कलौ पार्थिवलिङ्गस्यैव सर्वसाधार
णत्वेन तल्लिङ्गं बोधकत्वात्। तदुक्तं वायुपुराणेऽपि। कलौ हि पार्थिवं लिङ्गं सिद्धिप्रसिद्धिकारकं स्मृतं। पार्थिवेन तु लिङ्गेन नवकृत्वः सिद्धिमागताः। देवासुरमनुष्याश्च यक्षगन्धर्वराक्षसाः। अन्ये सृष्टिषु सर्वासु

मूर्तिर्वै पार्थिवी वरा तस्मात्तु पार्थिवं लिङ्गं सर्वेभ्यः श्रेष्ठमुच्यते लैङ्गे शैवे लिङ्गं महाविष्णुर्भक्त्या मुकुन्दं च पार्थिवं बाहुवित्तं समभ्यर्च्य लब्धवान्स्मरमंपदं ब्रह्मा सर्वं जलजं मल्लिङ्गं शिवमर्चनात् भारतो
मा सर्वानाभुत स्मात्तु ज्ञं महिमयं मन्मयं लिङ्गं सम्यगर्च्य स्वभर्त्रेन्द्रवल्लभाभवत् शचीदेवी स्त्रियश्चान्यास्तस्मात्० मन्मयं लिङ्गं सम्यगर्च्य महतः सकला अपि लब्धवन्तः श्रियं परां तस्मात्० यस्ये
न्द्रिपालि सर्जार्थं भवन्ति शुभदेहिनः कदाचिदपि वा विप्र सफलं तस्य जीवितं एककालं द्विकालं वा त्रिकालमथवा नरः लिङ्गं महीमयं सम्यक् शिवसायुज्यमाप्नुयात् आरिसपुराणे लिङ्गानाम
पि सर्वेषां पार्थिवं लिङ्गमुत्तमं तस्य संपूजनाद्देव सर्वान्कामानवाप्नुयात् शिवरहस्ये शिवलिङ्गसहस्राणां पूजापापफलं भवेत् ततः शतगुणं बाणलिङ्गस्य पूजने अनन्तबाणलिङ्गानां पूज
पापफलं भवेत् ततोऽनन्तगुणं पुण्यं रसलिङ्गस्य पूजने ततः शतगुणं पुण्यं मृत्तिकालिङ्गपूजने तस्मात्सर्वप्रयत्नेन लिङ्गं पूज्यं महीमयं अकृत्वा पार्थिवं लिङ्गं योऽन्यदेवं प्रपूजयेत् वृथा भव
ति सा पूजा स्नानदानादिकं वृथा मुने सर्वप्रयत्नेन कर्तव्यं लिङ्गमुत्तमं पार्थिवं हि नरैर्नित्यं कार्यमुद्दिश्य यत्नतः अर्चा पार्थिवलिङ्गस्य कोटियज्ञफलप्रदा भुक्तिमुक्तिप्रदा नित्यं तस्मात्पार्थि
वोत्तरणं शिवरहस्ये कुबेरवल्लि हिमालयवाक्यं नित्यं पार्थिवलिङ्गानि पूजयस्व नरेश्वर यस्तु पार्थिवलिङ्गानि पूजयिष्यति सादरं स महाभाग्यभुग्भुक्त्वा लभते शाङ्करं पदं यस्यास्ति श्रद्धया सोऽपेक्षा
तेन यत्नेन सादरं पूजनीयं विधानेन पार्थिवं लिङ्गमुत्तमं पूजया पार्थिवलिङ्गस्य पूजनाद्देव सर्वथा मुक्तिः कान्ता समायाति स्वयमेवाति यत्नतः मन्मयं लिङ्गमभ्यर्च्य सर्वपापैः प्रमुच्यते अतः शैवो
भवप्रीत्या पार्थिवं लिङ्गमर्चयः तत्पूजया तु वेद्यार्थाः सिद्ध्यन्त्येव न संशयः कुरुष्व पार्थिवं लिङ्गं सर्वलक्षणसंयुतं पूजयस्वाति यत्नेन सांबं संवत्सरावधि सनत्कुमारसंहितायां यथा नदीषु स
र्वासु गङ्गा श्रेष्ठा सरिद्वरा तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते यथा मेरुश्च सर्वेषु पर्वतेषु महान्स्मृतः तथा सं० पार्थिवाराधनं पुण्यं धनधान्यविवर्धनं पुत्रदं तुष्टिदं श्रीदं कार्यं साधकस
त्तमैः यः कृत्वा पार्थिवं लिङ्गं पूजयेच्छुभवेदिकं अनेनैव स्वदेहेन रुद्रसंनिधिरूपो ध्रुवं मन्मयं लिङ्गमभ्यर्च्य पुरा लक्ष्मीः प्रयत्नतः जाता सौभाग्यसंपन्ना महादेवप्रसादतः लैङ्गे जाबालोपनिषत्सा
र्धीममत्तात्स्य सिद्धये प्रधानसाधनान्याहुर्द्विजानामाररेणतु अविमुक्तं श्मशाने तु मन्त्रामृतमंशुभं शतरुद्रियजाप्यं च तथा संन्यासमुत्तमं भस्मनोद्धूलनं चैव त्रिपुण्ड्रस्य च धारणं रुद्राक्षधार

रां सासान्नथापार्थिवरजनं भस्मसंपातं नंध्यानं ममैवपरमस्यच पत्नानिसाधनास्याहप्रधानानि ममप्रिये सपाल्लघोपचारैश्चषोडशैः प्युक्तपापुनः स्जपेत्पार्थिवंलिंगंवेदोक्तविधिनाद्विजः
अथकामनाभेदेनपूजाप्रकारश्चोक्तोऽधुनामले ऋणमोचनकामश्चेत् शतदिनपर्यंतं प्रत्यहमेकंलिंगं अक्षताहतीपुष्पं हुतनैवेद्यं अनन्तरं अस्मिन्नृणपरस्मिथं ततीयेलोके ऋणस्या
म येदेवयानाः उतपितृयानाः सर्वान्पथोऽनृणाऽआसीयेमेति मंत्रं मष्टोत्तरशतंजपेत् पुत्रकामस्तु द्विशतदिनपर्यंतं प्रत्यहंद्विलिंगं द्वयं कुर्यात् पंचामृतेनाभिषेकः मल्लिकापुष्पं गुडोदन
नैवेद्यः काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि एवानोदूर्वेप्रतनु सहस्रेणशतेनचेतिशतमष्टाधिकंजप्त्वा याशतेनप्रतनोषि सहस्रेणविरोहसि तस्यास्तेदेवीष्टकेविधेमहविषावयमि
तिमन्त्रेणाष्टोत्तरशतं प्रतिदूर्वांमंत्राहृत्यादूर्वांसमर्प्पयेत् कन्याकामस्तु त्रिशतदिनपर्यंतंत्रिलिंगं त्रयंकुर्यात् करवीरपुष्पंशर्करानैवेद्यं पावीरवीकन्याचित्रायुः सरस्वतीवीरपत्नीधिय
धात् ग्नाभिरच्छिद्रं शरणं सजोषादुराधर्षंगृणतेशर्मयंसत् इतिमन्त्रेणाष्टोत्तरशतंजपेत् द्रव्यकामस्तु चतुःशतदिनपर्यन्तंचत्वारिलिङ्गानिकुर्यात् पालाशपुष्पं कदलीनैवेद्यं श्रीसूक्तं प्र
त्यहंदशवारंपठेत् विवाहकामस्तुपंचशतदिनपर्यंतं प्रत्यहंपञ्चलिङ्गानिकुर्यात् चंपकपुष्पंपायसनैवेद्यं गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी अष्टापदीनवपदीब
भूविषीसहस्राक्षरापरमेव्योमन्निति मन्त्रंप्रत्यहमष्टोत्तरशतंजपेत् कलहनिवृत्तिकामः त्रिशतदिनपर्यंतंषड्लिङ्गानिकुर्यात् बकुलपुष्पंमधुनैवेद्यं मुंचामीत्वाहविषेतिसूक्तंदशधा
प्रत्यहंपठेत् तीर्थयात्राकामः पंचाशद्दिनपर्यंतंप्रत्यहंसप्तलिङ्गानिकुर्यात् शतपत्रपुष्पं दध्योदननैवेद्यं प्रत्यहंरुद्रैकादशनीजपेत्पंचरुद्रैकादशनीजपप्रकारस्तु मत्कृतेरुद्रकल्पेद्रष्टव्यः
विद्याकामस्तु त्रिशतदिनपर्यंतंअष्टौलिङ्गानिप्रत्यहंकुर्यात् बिल्वपत्रपुष्पंचाणकपिष्टलड्डुकनैवेद्यं यः छन्दसामृषभोविश्वरूपः छन्दोभ्योध्यमृतात्संबभूव समेन्द्रोमेधयास्पृणोतु अमृतस्यदेव
धारणोभूयासं शरीरंमेविचर्षणं जिह्वामेमधुमत्तमा कर्णाभ्यांभूरिविश्रुवं ब्रह्मणःकोशोसिमेधयापिहितः श्रुतंमेगोपाय आवहन्तीवितन्वाना कुर्वाणाचीरमात्मनः वासांसि
ममगावश्च अन्नपानेचसर्वदा ततोमेश्रियमावह लोमशांपशुभिःसहस्वाहा आमायन्तुब्रह्मचारिणःस्वाहा शमायन्तुब्रह्मचारिणःस्वाहा विमायन्तुब्रह्मचारिणःस्वाहा प्रमायन्तुब्रह्मचा

रिणः स्वाहा दमायंतु ब्रह्मचारिणः स्वाहा शमायंतु ब्रह्मचारिणः स्वाहा यशोजनेसानि स्वाहा श्रेयान्वस्यसोसानि स्वाहा तंत्वाभगप्रविशानि स्वाहा समाभगप्रविश स्वाहा तस्मिन्सहस्रशा
खेविभगाहं त्वयिमृजे स्वाहा यथापः प्रवतायंति यथामासा अहर्जरं एवंमां ब्रह्मचारिणः धातरायंतु सर्वतः स्वाहा प्रतिवेशोसि प्रमाभाहि प्रमापद्यस्वेत्यनुवाकं प्रत्यहं दशधा पठेत् अथ
मृत्युहरणकामः एकशतदिनपर्यंतं नवलिंगानि कुर्यात् धत्तूरपुष्पैर्घोरन्नेनैवेद्यं त्र्यम्बकंयजामहे सुगन्धिंपुष्टिवर्द्धनम् उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतादिति मंत्रमष्टोत्तरस
हस्रंजपेत् हरणमनस्यागमनकामः वर्षमेकं रुद्रलिंगानि कुर्यात् काञ्चनद्रुमपुष्पं अर्घ्यं नैवेद्यं रुद्रैकादशिनीजपः दारिद्र्यनिवृत्तिकामः षण्मासपर्यंतं प्रत्यहं एकादशलिंगानि कुर्यात् रक्ता
बंधूकोरणपुष्पं वा मुद्गान्नं नैवेद्यं गोदानकं नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमः इत्यं च अष्टोत्तरशतं प्रत्यहं जपेत् कारागृहपतितस्य मोक्षकामः एकविंशतिदिनपर्यंतं एकोत्तरवृ
द्ध्या एकादशदिनं ततः द्वादशदिनमारभ्य एकैकह्रासेन तस्यैवं एकविंशतिदिनपर्यंतं सोमाहृत्याधारयेयामिति रुद्रस्य एकादशवारं जपः भूम्यां वह्निस्यंत स्योना पृथिवी त्यस्या अष्टोत्तरशतं जपः स
हस्रं वा एकोत्तरवृध्या लिंगानि कुर्यात् द्वाविंशतिदिनमारभ्य एकैकह्रासेन लिंगानि कुर्यात् यावल्लिंगैः कंभवति तावन्त्प्रत्यहं रुद्रैकादशिन्या अभिषेकं कुर्यात् पालाशपुष्पं दधिमधुयुतान्नम
न्नं नैवेद्यं यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्त्विति त्वरितरुद्रमष्टसहस्रं जपेत् इतिकामनाभेदेन रुद्रजाप्रकारः अथ कामनाभेदेन संख्या
मात्रभेदः एकं पापहरं द्विलिंगं श्रीकरं लिंगत्रयं सर्वकामदं विद्याकामो सहस्रं स्त्रीकामे पंचशतं पुत्रकामे सहस्राणि पंचदश कन्याकामे दशसहस्रकं भूकामे अष्टसहस्रं रूपकामे षट्सह
स्रं तीर्थयात्राकामे पंचसहस्रं सुतरकामे सहस्रैकं वस्त्रकामे अष्टसहस्रं राज्यकामे लक्षं मारणे सप्तशतं उच्चाटने सार्द्धसहस्रं स्तम्भने सहस्रैकं कारागृहमोचने अयुतं निगडमोच
ने सार्द्धसहस्रं पंचसहस्रं वा चोरभेदे द्विशतं शाकिन्यादिभये पंचशतं सहस्रं वा राजभये अयुतं दुरितमोचने पंचसहस्रं सर्वकामे अयुतं वंध्यायाः पुत्रकामे अयुतत्रयं कन्यायाः प्रति
कामे अयुतं मोक्षकामे लक्षं इतिसंख्यामात्रभेदः अथ कामनाभेदेन लिंगभेदः सौवर्णं सौभाग्यकरं लोहमयं मारणकरं सीसमये आयुःकरं पाषाणमयं पुण्यकरं काश्मीरं श्रीकरं या

रक्तं शान्तिकरं इन्द्रनीलमयं पोषणकरं मुक्तामयं श्रेयस्करं पारदं सर्वसिद्धिकरं चंदनमयं ज्वरनाशकरं कर्पूरमयं शान्तिकरं कस्तूरीसंभवं सुगन्धिकरं गोरोचनसम्भवं रूपकरं पद्म
कर्दममयं प्रीतिकरं गोमयसम्भवं सर्वरोगहरं भस्मोद्भवं मोक्षकरं हरिद्रं प्रीतिकरं नवनीतजं कीर्तिकरं दधिजं लक्ष्मीकरं दुग्धजं सुखकरं शर्करामयं पुत्रकरं नवनीतजं कीर्तिकरं दधिजं ल
क्ष्मीकरं दुग्धजं सुखकरं शर्करामयं पुत्रकरं लवणसंभवं सर्वलोकवशकरं आर्द्रकीपिष्टजं अतिसौख्यकरं तुषोत्थं शत्रुमारणकरं गुडजं प्रीतिकरं यवपिष्टजं वंशकरं तंदुलपिष्टजं व
पुत्रकरं धान्यजं धान्यकरं फलोद्भवं फलप्रदं धात्रीफलोद्भवं मोक्षकरं दूर्वाग्रीवासंभवं अपमृत्युहरं इक्षुरसोद्भवं शत्रोरुच्चाटनकरं कौंकुमं कान्तिकरं श्वेतागरुसम्भवं महावृद्धिकरं कृष्णा
गरुसंभवं धारणाप्रदं गोधूमपिष्टजं गोधनकरं मुद्गपिष्टजं मुक्तिकरं माषपिष्टजं निसमधान्नप्रदं बाणकपिष्टजं वृद्धिकरं प्रियङ्गुपिष्टजं यमलोकनिवारकं नीवारसम्भवं सर्वारिष्टनिवारणं
श्वेततिलसम्भवं श्वेतद्वीपवासप्रदं कृष्णतिलसम्भवं स्त्रीणां कामप्रदं एतेषां लिङ्गानां संख्या सापेक्षत्वात् उक्ता संख्यानां लिङ्गापेक्षत्वात् कामनेक्षसमुच्चयः कार्यः इति कामनाभेदेन
लिङ्गभेदः अथ ऋतुभेदे न लिङ्गभेदः वासिष्ठे लैङ्गे ग्रीष्मे मल्लिकापुष्पसम्भवलिङ्गं पूजनाल्लभेद्वृद्धिर्भवेत् वर्षासु कनकपुष्पसम्भवं शरदि नीलोत्पलमयं हेमन्ते जातिकुसुमैर्लिङ्गं ल
ब्धा पूजयेत् शिशिरे करवीरपुष्पसम्भवं वसन्ते धत्तूरपुष्पसम्भवं अथ पुष्पभेदेन कालविशेषमाह तत्रैव वत्सरं मत्स्यपं लिङ्गं बृहतीकुसुमैर्नवैः संपूज्य कपिलाज्येन नैवेद्यं दापयेद्दश
त् पक्वानि च प्रदेयानि नित्यं सार्द्धशतत्रयं एवं यः पूजयेद्भक्त्या सकथं ज्ञानिको भवेत् नीलोत्पलैः समभ्यर्च्य मन्मयं लिङ्गमुत्तमं महानिधिपतिर्भूत्वा मुक्तो भवति बन्धनात् जपापुष्पैः
समभ्यर्च्य मन्मयं लिङ्गमुत्तमं महानिधिपतिर्भूत्वा मुक्तो भवति बन्धनात् जपापुष्पैः समभ्यर्च्य स्फाटिकं लिङ्गं च पार्थिवं महाव्याधिविनिर्मुक्तो दीर्घायुर्जायते नरः एकविंशतिलिङ्गानि पार्थि
वानि प्रयत्नतः निर्मलं पूजयापुष्पैर्मासमेकं प्रपूजयेत् श्वेतगोहुतदीपाश्चेयाः शतचतुष्टयं सघृते क्षीरनैवेद्यं क्षीरान्नं च प्रकल्पयेत् भोजनीयाः प्रयत्नेन विप्राः स्वादुन्नैः सुरसायनैः सु
वर्णदक्षिणा देया पयदाकुशलं कृतं एवं यः पार्थिवे लिङ्गे पूजां कृत्वा प्रयत्नतः स महारोगकोटिभ्यो मुक्तो भवति सर्वथा योऽर्चयेन्मन्मयं लिङ्गं नित्यं दूर्वासहस्रतः स सर्वविद्यासंपन्नो गतहि

श्रीलिं०चं०
१९

द्व्यभविष्यति प्रातर्गोमयलिङ्गानि तु संख्या प्रपूजयेत् हृदन्तो बिल्वयोः पत्रैर्नैवेद्यं गुडमेव च एवं मासत्रयं कृत्वा तस्य तत्सम्पत्ति धनं एकादशे वलिङ्गानि गोमयोत्थानि योजयेत् प्रातर्म
ध्याह्नयोः सायं त्रिशौचे प्रतिवासरं तं सर्वोऽसंपदो पायात्त्वरमासान्तेवमाचरेत् योयज्ञेश्वि चुम्बन्ते स्थैः पत्रैर्गोमयसम्भवं षण्मासमेकलिङ्गं तु नैवेद्यं गुडसम्भवं कूष्माण्डमहाध्वान्तं धापयेत्तस्य पूज
यत्नेऽर्हस्तत् ननु सर्वोत्तरसमस्तवाषेषु विविधफलवाञ्छया समाराध्य शिवलिङ्गार्चनं काम्यमेव न नित्यमिति चेन्न यावज्जीवसदा नित्य शौचैर्नित्यत्वावगमात् स्मार्ते किंदैवैः किं तनः शा
स्त्रैः किं तपोभिरध्वरैः शिवः संपूज्यते नित्यमुपदेशोऽयमुत्तमः लैङ्गे आपातकसकलात्मत्वात्पूजयध्वं सदा शिवं शिवधर्मैर्मन्त्रैश्चैवेकमनाभूत्वा यावज्जीवं प्रतिज्ञया अर्चयेत्तं महादेव
माप्नोऽपि सदा बुधः तथा विष्णुश्रवणात् पुत्रपुष्पादिभिर्भक्त्याचिरं वेदोक्तवर्त्मना लिङ्गं दिने दिने देवं पूजयेत् दरेशान लिङ्ग पूजायां अकरणे प्रत्यवायस्मरणात् तथाह शिवरहस्ये
शिवलिङ्गमनभ्यर्च्य ये भुञ्जते मोहसंगतः सयाति नरकं घोरं यावदाचन्द्रतारकं लिङ्गार्चनविहीनस्य समस्तानिष्फलानि क्रिया ततः सर्वोपासिच्छर्चत्लिङ्गपूजाविधीयते नित्यकर्मेसमस्थार्च्ये
नित्यमेवमुक्तं मुने तस्माल्लिङ्गार्चनं कार्यं यत्नेन प्रत्यहं द्विजैः शिवलिङ्गार्चनं कार्यं यत्नात्कार्यमतो यतः यदि त्यजति मोहेन प्रयत्यवेतिनसंशयः सनत्कुमारसंहितायां अनभ्यर्च्य महादेवं
योश्नाति फलमम्बु वा स प्राप्नोति मुकृतं मस्सुदूचरण त्वयो निषु यास्ये योन पूजयते लिङ्गं कृत्वा दिनां प्रकाशकं शास्त्रविरुद्धं वेत्ताप्यचन्द्रवेदीयमुत्तम लिङ्गपूजायां अकरणे प्रत्यवायप्र
तिपादिकामारभ्यापिकामाह शिवरहस्ये आर्यावर्ते पुरा कश्चिद् ब्राह्मणो वेदवित्तमः सर्वसौभाग्यसंपन्नः सर्वशास्त्रविशारदः कलत्रपुत्रयोर्नादि सौख्यवृद्धिकरः सदा नित्यं शिवार्च
नरतः कृतज्ञः सर्वसमतः कदाचित् अधितः श्रांतो विस्मृत्य शिवपूजनं चक्राश्रोत्तनं मत्तः प्रदोषे बालवत् ब्रुतः ततः स दैवयोगेन पंचत्वमगमद्विजः ततो यमभटैर्नीतः फलैः संताडि
तोऽभृशं यमाग्रे सन्निवेश्यैवं पुनः संताडयन्मुदा नानुवाच यमः श्रीमान् तत्र कोपमितिस्फुटं यमदूतांश्च यमायं ब्राह्मणाः सर्वविहाय शिवपूजनं दुर्वासेकदिनं मत्तः शुद्धः स्मरणं वि
ना अनेनभुक्तं मत्तेन श्रान्तेन क्षुधितेन च शिवाय नार्पितं दिव्यमन्नं स्वप्रमादतः विप्रस्य स्य त्वमेतस्य नरके वसतिर्मता कीदृशे नरके योग्यो वद सर्वमशेषतः यम उवाच शि


शिवलिङ्गार्चनं नित्यं नित्यं नित्यमप्यक्रमणेन किं कदाचिदुन्नतान्यत्र मत्यं न त्याज्यमेव वः यमदूता ऊचुः शिवलिङ्गार्चनं नित्यं कृत्वा नैव स्थितं पुरा कदाचिदेकदामन्त्रं श्रुत्वैतेन मयोदितम् २
तिन्न वचनं श्रुत्वा विचार्य वदथायमः धर्मशास्त्रविरोधेन वचः शास्त्रविचक्षणाः पञ्चवक्त्रस्य रूपं यत् तेन प्रवेशितो निरन्तरं निष्फलत्वं न तेनासौ भूमौ स्वयमेव पतिष्यति इति एवं यमेनोक्तं तदा तत्र भवत्व-
था ततोऽपतन् नरके च्युत्वा लिङ्गपूजाविरतं स्नानं संध्यां लिङ्गपूजां होमं स्वाध्यायतर्पणं स्वाध्यायं स्वाध्ययं प्रेष्ठैः कर्तव्यं नियमेनाऽपि नित्यत्वेनैव विधिना प्राप्तं लिङ्गस्य पूजनमिति तथा च
शिवपूजार्थमालस्यं यः करिष्यति गृहे नित्यं शिवलिङ्गार्चनं शिवे तद्गृहं चाण्डालगृहमेव न संशयः शिवलिङ्गं न यस्यास्ति गृहे बिल्वदलार्चितं तद्गृहं दूरतस्त्याज्यं श्मशानागारवद्गृहं
शिवलिङ्गं न यस्यास्ति बिल्वपत्रादिपूजितं तद्गृहे जलमप्यन्नं न पेयं सर्वथा द्विजैः येन नाभ्यर्चितं लिङ्गं मोहात् त्यक्त्वापि सर्वथा न संवदेन्मेणापि तेन सार्द्धं न संवसेत् शिवलिङ्गार्चनं यस्तु न
करोति दुर्मतिः तस्य दर्शनमात्रेण सचैलं स्नानमाचरेत् शिवलिङ्गार्चनेऽयस्य नास्ति साधारणामतिः चण्डालः स तु विज्ञेयः सर्वकर्मबहिष्कृतः शिवलिङ्गार्चनं नित्यं पत्युर्जो द्विवेक-
तः सपाति नरकं घोरं यावदाचन्द्रतारकम् अत्यन्तदुर्लभं जन्म कल्पे प्राप्यापि मानुषं यो नाराधयेच्छम्भुं तस्य जन्म निरर्थकं न पेयं पानमप्यास्ये मामनभ्यर्च्य सर्वथा शिवे यदि प्रमादेन नरः
पापी भविष्यति लिङ्गपुराणेऽपि शिवलिङ्गार्चनं सम्यगाभोक्तुमिच्छति यो नरः तमानीपापसेः पिण्डैः संतानायतिभास्करिः येन निक्षिप्तं देवि शिवलिङ्गस्य पूजनं तमानीय पातयेत्त्वं नर-
के घोरे यावदहं पातयेऽपि लिङ्गपूजां विहायैव यदि भुङ्क्ते स माहिजः नरान्तरं नित्यकास्यचेतत्त्राह्मणाष्टकं तथा तत्रैव लिङ्गार्चनं विहायैव भुङ्क्ते मेनेदुरात्मभिः यः शिवेनाम्भिकुर्यात्स्यान्न-
मिभक्ष्यान्नान्न वृत्तो नरः खलो वंशाणापरिष्मागः छेदनं शिरसोऽपि वा न त्वनभ्यर्च्य भुञ्जीयाद् भगवन्तं त्रिलोचनं तथा बृहज्जाबालोपनिषदपि अहरहः शिवलिङ्गम् अनभ्यर्च्य नाश्नीया-
त् फलमन्नमन्यद्वा यद्यश्नीयाद्रेतोभक्षी भवेत् न्यायः शिवे यदि शिवेनापयोभवेन्नमारैने कदाचनमभ्यर्च्य मां भुक्त्वा भोजयित्वा वा केशान्वा पायित्वा गन्धामपि पञ्चसंगत्यो यो यजलेनस्यात्तेन वाजयेत्त्रि-
वारं शतरुद्रियमादित्यं पश्यन्नभिध्यायंस्त्वत्कं कर्म तज्जोसे दुर्देवमन्त्रैर्मार्जनं कुर्यात्ततो भोजयित्वा ब्राह्मणान्ततो भवति अन्यथा परेतो पातनाममस्तु इति तथा चोक्तं वायवीयसंहितायां अ-

संसृज्य न भुंजीत शिवमाप्राणसंचरात् परिपाकेन भुंजीत स्वैरं तस्य न निष्कृतिः प्रमादेन तु भुक्तं चेत् द्रुतीयं प्रपद्यते स्नात्वा द्विगुणमभ्यर्च्य देवं देवीमुपोष्य च शिवस्यायुतमभ्यस्येद्ब्रह्मचर्य
पुरःसरं शिवस्य मन्त्रमिति शेषः परेषु शङ्कितोऽस्वासुवर्णादि शिवाचार्य च शिवभक्ताय वा दत्त्वा महाप्रसादं शुचिर्भवेत् धर्मपुत्रोपि नार्चयन्ति त्वयेतं शिवं त्रिदशैर्वंदितं तेषां ज्ञानं न तपो य
ज्ञातृयाजी विद्वमेव च यो मोहादथवा लोभाद्दत्वा शिवप्रसादजं भुंक्ते स याति नरकानन्ते पुरःकृत्य तं वृजेत् इत्यादि शिवप्रसादाङ्गीकारे प्रत्यवायवाक्यश्रवणान्नित्यं काम्यं चेति सुस्थितं कथमेकस्यो
भयविधित्वमिति चेदुच्यते यथा ज्योतिष्टोमेन स्वर्गकामो यजेत तमेव वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन इत्यादि श्रुतेर्मुमुक्षुः कामनिष्कामानुष्ठितस्याग्निष्टोमादि
कर्मणः स्वर्गापवर्गहेतुत्वमत्र नित्यभावः ननु लिङ्गैः सुकोटिभिर्दृष्टैर्यत्फलं लभ्यते तेन शालिग्राममपि त्यक्त्वा पातु स्वेके नापि च तद्वेदादि वचनानां का गतिरिति चेदुच्यते एकशालिग्रामप
जाकोटिलिङ्गार्चयासमा इत्यादिवाक्यस्य स्वार्थे न तात्पर्यं स्तावकत्वात् सर्वथा न हि निन्दयंति निन्दितुम् हि निंकिंतु प्रशस्तं स्तोतुमर्हतीति न्यायेन तद्वाक्यं लिङ्गपूजां न निन्दति किंतु शालिग्रामपूजां स्तौ
ति यथा तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुनेत्यत्र योगिनस्तत्वज्ञानाधिक्यमुक्तं न तु तज्ज्ञापीतिवद् अथ शिवपूजाधिकारिणो ले
हे ब्राह्मणोनेवरज्योऽहं शुचिनाऽशुचिनापि वा स्त्रीशूद्रकरसंस्पर्शो वज्रादपि सुदुःसह इति अत्र केचित् स्त्रीशूद्राणां स्पर्शसत्तिदितनरजानि वेधार्थत्वमविशेषेण मन्यन्ते केचित्तु पूजानि
षेधो ब्राह्मणस्त्रीव्यतिरिक्तविषय इत्याहुः तदसत् ब्राह्मणपत्नीहरं विष्णुं न स्पृशेच्छूद्रसूनुरिति सतां धारमतः तथा ब्राह्मणस्यानास्तीति निष्कृतिरिति प्रयोगपारिजाते स्थात् वस्तुतस्तु स्त्रीशू
द्रस्पर्शनिषेधः प्रतिष्ठितलिङ्गशालिग्रामविषयः यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथाविधि तदाप्रभृति शूद्रश्च योषिद्वापि न संस्पृशेदिति ब्रह्माण्डादिपुराणवाक्याभ्यां प्रतिष्ठितलिङ्गस्प
र्शनिषेधात् विहितस्त्वबाणलिङ्गे बुस्पर्शः स्त्रीशूद्रयोरपि तस्यावरेषु लिङ्गेषु सम्यमेतदर्थ्यते इति लिङ्गे चरलिङ्गे स्वेदस्पर्शविधानाच्च तत्रापि बाणपार्थिवयोरेव स्पर्शः कार्यः तदुक्तं
शिवबाहुले स्पर्शः पार्थिवलिंगस्य बाणलिङ्गस्य चादरात् स्त्रीभिः कार्यस्तथा शूद्रैर्वेश्यात् स्वविनिर्णय इति स्थावरेषु चलिङ्गेषु यदि स्पृश्यते नरः स पर्वणा कल्पं स्पर्शनं स्त्रीभिरादरात्,

पूजाप्यस्माद्यथायोग्यं पञ्चाक्षरपुरःसरमिति। एतेन स्त्रीणामनुपनीतानां शूद्राणां च जनेनेश्वरस्पर्शनेनाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च। शूद्रो वाऽनुपनीतो वा स्त्रियो वा पतितोऽपि वा। के
शवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते इत्यादिनिषेधा अपि व्याख्याताः। यत्तु नारदीये शालिग्रामे रमाकान्तं बाणलिङ्गे शङ्करं। स्त्रियः शूद्राश्च मोहाद्वा नार्चयेयुः कदाचनेति स्त्रीशूद्राणां वा
णपूजनेऽपि नाधिकारोऽस्तीत्युक्तं तत्स्त्रीशूद्रविषयं तदुक्तं सनत्संहितायां विरक्तानां तु शूद्राणां बाणोऽमन्त्रपूजनं स्मृतमिति। अथवा सत्स्त्रीशूद्रैस्तु ब्राह्मणद्वारा पूजनं कार्यं तदुक्तं भविष्ये से
व्यापुत्रैस्तथा शूद्रैर्मद्यपानविवर्जितैः। कर्तव्यं ब्राह्मणद्वारा शालिग्रामप्रपूजनमिति। असत्स्त्रीशूद्रनिषेधस्त्वाध्याये हितो वाराहपुराणे। मद्यपस्तु भवेच्छूद्रो मम पूजापरायणः। तस्य पापं
प्रवक्ष्यामि शृणु सुन्दरि तत्त्वतः। एकजन्म भवेत्सोऽयं चाण्डालः सप्तजन्मसु। पूजादेवालये स्थाप्य शूद्राणां मम परिकीर्तितमिति। अथवा तैः प्रतिमादिषु पूजनं कार्यं तदुक्तं पुराणार्थप्रबोधे। अप्रतिष्ठि
तशैलेषु लिंगेषु स्वाणकेषु च वेरेषु वा स्त्रियः शूद्राश्चार्चयेयुर्महेश्वरमिति। स्त्रीशूद्रस्यापि नाल्लिङ्गस्पर्शनाद्भोगी यावदाचन्द्रतारकं। शूद्रैस्तु स्थापितं लिङ्गं विप्रं वा पूजयेन्नरः। सकुलको
टिसंयुक्तो रौरवं कल्पं नरके वसेदित्यादिवाक्यवाक्यानि विस्तरभीयान्नलिख्यन्ते। ब्राह्मणो नैव पूज्योऽहमित्यत्र ब्राह्मणपदं क्षत्रियवैश्ययोरप्युपलक्षणं। एवकारस्तु चकारार्थः। ब्राह्मणैः क्षत्रियै
र्वैश्यैः कार्यं लिङ्गार्चनं प्रिये इति सनत्कुमारसंहितायां क्षत्रियवैश्ययोरपि पूजाविधानात्। इयांस्तु विशेषः ब्राह्मणेनस्तु शिव एव पूज्यो न देवतान्तरं। त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु ब्राह्म
णो वै ब्राह्मणमुपधावतीति प्रयपरास्यसामश्रुतेः। पाराशरपुराणे च। ततो विप्रस्य सर्वं धं प्रावे नैव हि पूज्यते। शङ्करः सर्वदेवाश्च ब्रह्मा लक्ष्मीपुरन्दरः। पितामहस्तु वैश्यश्च क्षत्रियः परमो ह
रिः। ब्राह्मणो भगवान्रुद्रः सर्वेषामुत्तमोत्तमः। ब्राह्मणो वै सदा लोके ब्राह्मणं चोपधावति। महाब्राह्मणमीशानमुपधावन्ति चेतरमिति। तथा च ब्रह्म मनुः। विप्राणां दैवतं शम्भुः क्षत्रियाणां
तु माधवः। वैश्यानां तु भवेद्ब्रह्मा शूद्राणां तु पुरंदरः। यजुर्वेदेऽपि यो वै स्वां देवतामतियजते प्रस्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान्भवतीति। यः स्वां देवतामतिक्रम्य देवतान्तरं यज
ते स पापीयान्भवतीत्यतो ब्राह्मणेन शिव एव पूज्य इत्यर्थः। भागवते तृतीयस्कन्धे चतुर्दशाध्याये। न मे गर्भमिमं ब्रह्मन्भूतानामृषभोऽवधीत्। रुद्रः पतिर्हि भूतानां यस्याकरवमंहसं इति

इति वाक्यं श्रुत्वा तदा विश्वेश्वरः क्रुद्धो भगवान्लोकभावनः हनिष्यस्यवतीर्याजौ यथा दृष्टतत्पर्वं धर्मीति कश्यपेनोक्तेऽपि ते वयं भगवता साक्षात्तु नाभोऽरवाडुना आशासे पुत्रयोर्मे
त्वं मा कुरु ब्रह्महत्यां प्रभो न ब्रह्महत्यादन्यत्पातकं भूतमपरस्य च नास्माभिश्चानुगन्तव्यो योऽतिमहासौगत इत्यादि वाक्येनापि वेदवृत्त्यपरस्यानिरीतिस्त्वाच्च तथा शङ्करसंहितायां शिव
रहस्ये कालोपदेशखण्डे एकोनाशीतितमेऽध्याये महाब्राह्मणमीशानो विष्णोः सृष्ट्याधिपत्यया विशामधिपतिर्वृत्तान्तसाक्षी न्याय्यरणाद्यः यज्ञेनैव यतिः कस्यापि नः पति
तात्वतेऽतिप्रियवस्य ब्राह्मणत्वोक्तेश्च तथा वृत्तचारिगृहस्थश्च वानप्रस्थो यतिस्तथा एवं एतेनैतेनैव तु यजयेत्स्वकामितं वर्णाश्रमाचारवतां एष्टो देवो न चान्यथा अथवा स्त्री
भिक्षुभर्तुरनुमतेनैव प्रियवत्यजनं कार्यं तदुक्तं वायवीयसंहितायां नमार्चनं च वक्ष्यामि नियोगो भर्तुरस्ति चेत् तदा स्त्री भिक्षुकर्तृत्वमन्यथा नारकं वृजेदिति स्कान्देऽपि या नारी भर्तृ
शुश्रूषां विहाय वृततत्परा सा नारी नरकं याति नात्र कार्या विचारणेति पाद्मेऽपि नाधिकारः स्वतो नार्याः प्रियविष्णोश्च यजने नियोगाद्भर्तुरस्त्येव भक्तिपुत्रापरीश्वरे तथैव भर्तृ
हीनायाः पुत्रादेरप्यनुज्ञयेति शुद्धवैदिकैस्तु वेदोक्तविधिनैव ऋग्यजुःसामाथर्वोक्तैर्मन्त्रैः यजनं कार्यं तदुक्तं शिवरहस्ये वैदिकानां तु सर्वेषां यज्ञा वैदिकमार्गतः यो वैदिकमनादृ
त्य विधिं स्मार्त्तं यथापि च अन्यत्समाचरन्विप्रो नरकं प्रतिपद्यते ईशानसंहितायां ब्राह्मणैः सम्यग्वैदिकैर्वेदमार्गानुसारिभिः वेदमन्त्रैर्यजेदेशं तस्मै तन्त्रमार्गतः शूद्राणां पुन
रतो ब्राह्मणानां तु वेदोक्तमार्गेणाराधनं स्मृतं स्त्रीशूद्रजातीनां वैदिके नापि तन्त्रतः भक्तिशिवेऽपयोर्वैदिकतन्त्रो योऽर्धकल्पः शूद्रजातीनां तु केवलं तन्त्रतीति विवेकः त
न्त्रोक्तदीक्षितानां च तन्त्रोक्तविधिनैव हि लिङ्गेऽपि अथ वैदिकभक्तानां पार्थिवार्चनमुच्यते वेदोक्तविधिना सम्यक् सर्वकामफलसिद्धये वृत्तचारिगृहस्थानां वानस्थानां तथैव च
सद्योजातादिभिर्मन्त्रैरस्मै ब्राह्मणलिङ्गकैः शतरुद्रियसम्मन्ते लिङ्गं यजनमुच्यते सन्यासी देवदेवेशं प्रणवेनैव यजयेत् नमोऽन्तेन प्रियां ये ति स्त्रीशूद्राणां प्रकीर्तितमिति यति
ते नाम मन्त्रकं यजनं कार्यं तदुक्तं वायवीयसंहितायां समन्त्रकं मां यतिनः प्रजयेद्यतिमोहितः तारकीत्या त्वं देहस्त्यात्तु सम्यग्यजयेत् यतिनस्य यजायां मन्त्रनिषेधोऽपश्यत्र हस्वयति

रिक्तो ज्ञेयः तदुक्तं स्कन्दसंहितायां वसिष्ठेन समन्त्रकं तु पतितोऽप्यर्चयेद्यदि पग्रजः नारकी स्यान्न संदेहो मम पञ्चाक्षरं विनेति न नीचैरपि मनुष्याणां रहस्यं च वदामि मुनिपुंगवाः हिता
य सर्वलोकानां पतितानां विशेषतः समन्त्रकं स्पृष्ट्वापि पतितः पूजयेद्यदि नारकी स्यान्न संदेहः शैवपञ्चाक्षरं विनेति वह्निनात्र किमुक्तं नयस्य भक्तिः शिवे दृढाः सर्वथा त्राधिकारी स्यान्ना
स्यचित्तः कथंचन जननाशौचे तथा शावाशौचेऽपि शिवार्चनं तस्माज्ज्यं किन्तु स्पर्शरहितं कार्यं तदुक्तं स्कान्दे जननाशौचमध्येऽपि कर्तव्यं शिवपूजनं शावाशौचेऽपि कर्तव्यं विनास्पर्शं प्रयत्न
तः पाण्डुरार्चनकाले तु द्विजो नाशौचदोषभाक् अस्पर्शदोषं नाशार्थं स्नानं कान्ते प्रयत्नतः रौद्रेण कुर्यात्कार्यो हि मो रौद्रैः स्मृतिरुक्तेन प्रसवो जायते यस्या तया तु शिवपूजनं कर्तव्यं मा
नसं नित्यं दशाहान्तं यथाक्रमं दशाहे समतीते तु स्नात्वा स्नानं यथाविधिः शिवलिङ्गार्चनं कार्यं द्विजस्त्रीभिर्द्विजैरिव होमो यं पुरुषाणां च स्त्रीणां तु न कदाचन दशाहान्ते तु कर्त
व्यं नाभिरन्तरितार्चनं ननु सूतिकां पुत्रवन्तीं विंशतिरात्रेण कर्माणि कारयेन्मासे नस्त्रीजननीमिति ये ठिन स्मृतिवचन विरोधात्कथं दशाहान्ते शिवपूजनमिति चेन्न दशाहान्ते तु कर्तव्य
मिति विशेषवचनेन तस्य बाधात् शिवपूजातिरिक्तविषयत्वाच्च दशाहान्ते पूजाविधानात् द्विजस्त्रीविषयं न शूद्रस्त्रीविषयं नाभिस्तु पुत्रजनने विंशतिरात्रान्ते कन्याजनने मासान्ते
कार्यं दशाहान्ते पूजाविधानवाक्ये द्विजस्त्रीणामेव पूजाविधानात् द्विजो वा द्विजनारी वा मन्त्राशङ्का पूजनं यदि भुंक्ते तरायो निर्वाणलीं प्राप्नुते ध्रुवमिति वृत्तवेव द्विजनारीणामेव
पूजाकरणे प्रत्यवायस्मरणाच्च अथ भस्मरुद्राक्षधारणं विनापि शिवपूजनं न कार्यं तदुक्तं लैङ्गे विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया पूजितोऽपि महादेवो न तस्य फलदो भवे
त् शिवरहस्ये विभूतिधारणं त्यक्त्वा यः शिवं पूजयिष्यति स दुर्मतिः शिवद्वेषात्तस्य सर्वं निरर्थकमिति स्कान्देऽपि विना रुद्राक्षभस्माभ्यां पूजयेद्यः स पापिवं स याति नरकं घोरं याव
दिन्द्राश्चतुर्दश ननु भस्मधारणं शिवपूजायामेव कार्यं ननु कर्मान्तरेष्वपीति चेन्न कर्मान्तरेष्वपि तद्विधानात् तथाह बृहज्जाबाले ये भस्मधारणं त्यक्त्वा कर्म कुर्वन्ति मानवाः तेषां ना
स्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः महापातकयुक्तानां पूर्वजन्मसु सर्वतः त्रिपुण्ड्रोद्धूलने द्वेषो जायते सुदृढं बुधः तेषां कोपो भवेद्धूलनं ललाटे भस्मदर्शनात् तेषामुत्पत्तिसांकर्यं



मनुमेयं विप्राश्रुतायेषां ज्ञोधोमवेद्भस्मधारणेन तस्य मालाके ते महापातकैर्युक्ता इति शास्त्रस्य निर्णयः शिवरहस्ये सर्वकर्मवहिर्भूतो भस्मधारणवर्जितः भस्मनारहितं कर्म ह्यथा भवति सर्वथा
विभूतिधारणं त्यक्त्वा कुर्वन्मन्तुलामपि तत्फलं न समाप्नोति पतितोपि भविष्यति स त्याज्यः शिवार्चनादौ नित्यकर्म्यल्पेनापि वस्तुनः वैदिकानि तनत्सेषु कर्तव्यं भस्मधारणं यज्ञोपवीतरहितैः
सन्ध्या न क्रियते द्विजैः तथा संध्या न कर्तव्या विभूतिरहितैरपि विभूतिधारणं त्यक्त्वा यदि सन्ध्यां करोति सः प्रत्यवैत्येव चये नासौ नाधिकारी न तत्र द्विजः यथाधीत्यां त्यजो वेदान्न त्यजेत्तथा
द्विजः प्रत्यवैति न संदेहो संध्याकर्मस्य वर्जितः न संविशंति पापानि भस्मनिष्ठेन तत्सदा कर्तव्यमिति यत्ने न बाल्ये रौमे भस्मधारणं यत्कृतं भस्मनिष्ठेन श्रीमहादेवपूजनं तत्सर्वमीप्सितं
स्यात्कर्तव्यं भस्मधारणं उद्धूलनत्रिपुण्ड्राभ्यामत्वेल्लजनतनुः शिवं योर्चयिष्यति तन्तुल्यो भुवि कोवा भविष्यति शिवगीताटीकायां वसिष्ठः न तच्छ्रौतं न तत्स्मार्तं न तद्दानं जपो न सः त्रिपुण्ड्रे
णविनायेन विप्रेणापरिनुष्ठितं ज्ञात्वायतोपि श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः तथा भविष्यपुराणे सत्यं शौचं जपो होमस्तीर्थं देवादिपूजनं
तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत् महाभारते आयुष्कामोथवा राजन्भूतिकामोथवा नरः नित्यं वै धारयेद्भस्म मोक्षकामी च वै द्विजः विष्णुधर्मोत्तरे नारदः भस्म वै परमं पुण्यं ब्रह्म
विष्णुशिवात्मकं येन दृष्टेन पापानि नाशमायांति सर्वथा तैत्तरेयकश्रुतिः भूत्यै न प्रमदितव्यमिति एवमाथर्वणसंहितायां च भूतिशब्दार्थस्पष्ट एवान्तर यथा सत्साद्भर्मो
ज्ञ्वकुशलाद्भस्मनोद्धूलनादपि त्रिपुण्ड्रधारणाच्चैव सहानप्रत्युनोभवेदिति कश्चित्कूलखंतां प्रति विष्णुवचनं तच्चैव विभूतिधारणं त्यक्त्वा त्यक्त्वाऽत्रास्यधारणं मामार्चयति विश्वशं
शिवलिंगस्वरूपिणं सनत्कुमारसंहितायामपि यथैव वारणालोच्छिष्टं श्राद्धार्थे नोपयुज्यते एतिपर्युषितं यच्च निर्भस्मे वं शिवार्चनं रायादृष्टीनो न पुनर्मतः पिशाचवा
प्स्यति तथा भस्मविहीनोपि शिवार्चनफलं परं यथाद्दृशानुगृहीतोऽपि घ्नरो नैव शोभते अशेषसाधनोपेतं भस्महीनं शिवार्चनं विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः भव
न्ति पञ्च नामानि यञ्चभिर्हेतुभिर्भृशं ऐश्वर्यकारणाद्भूतिर्भस्म सर्वाघभक्षणात् भासनाद्भसितं क्षारणादापदां क्षारमापदं रक्षार क्षोगणेभ्य रक्षणात्परिकीर्तितं तस्य नार्द्वविधं विद्धि मुख्यं गौणं

तथैव च मुख्यं प्रोक्तं परं ब्रह्म गौणमाग्नेयमुच्यते गौणं नानाविधं विद्धि ब्रह्मन्ब्रह्मविदां वर अग्निहोत्राग्निजं तद्वद्विरजाहोमजं मुने औपासनसमुद्भूतं समिदग्निसमुद्भवं पचनाग्निसमुद्भूतं दा
वानलसमुद्भवं एतेषां भस्मभेदानां वर्णभेदेन व्यवस्थोक्ता स्कान्दे ब्रह्मक्षत्रियवैश्यैस्तु अग्निहोत्रसमुद्भवं शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवं अन्येषामनुलोमानां सर्तं दावानलो
द्भवं आश्रमभेदेनापि व्यवस्था तत्रैव समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिभिः अग्निहोत्रसमुद्भूतं गृहस्थैर्वनवासिभिः श्रोताग्निरहितानां पचनेषामौपासनोद्भवं विरजानलजं धार्यं चतुर्था
श्रमवर्तिभिः अतिवर्णाश्रमीणां तु श्मशानाग्निसमुद्भवं शूद्रहस्तात्तु द्विजैर्भस्म न ग्राह्यं तत्राह भरद्वाजः शूद्रहस्तस्थितं भस्म न हि धार्यं द्विजातिभिः शूद्रैरन्त्यजहस्तस्थं न धार्यं भस्म जातुचित्
धारणे मन्त्रानाह पुलस्त्यः अग्निरित्यादिभिर्मन्त्रैः शुद्धं भस्माभिमन्त्रितं शिवमन्त्रेण वा धार्यं मन्त्रेणाष्टाक्षरेण वा गायत्र्या वापि देवर्षे मन्त्रेण प्रणवेन वा यत्तेषां फलविशेषं स एवाह करोति
शिवमन्त्रेण यस्त्रिपुण्ड्रं द्विजोत्तम अक्षः शूलधरः सोऽप्यत्र शिवलोके महीयते अष्टाक्षरेण मन्त्रेण यः करोति त्रिपुण्ड्रकं विष्णोः परमवाप्नोति नान्यथा श्रुतिचोदितं सौरं परमवाप्नोति
गायत्र्या मुनिसत्तम प्राप्नोति ब्रह्मणः रूपं प्रणवेन न संशयः अत्राष्टाक्षरमन्त्रस्तु नारायणायेति गायत्र्यपि सर्वसाधारणा ज्ञेया विष्णुपदसौरपदयोः फलत्वावगमात् अथ धारणे वर्णा
श्रमभेदेन मन्त्रभेदमाह स्कन्दे त्रियायुषैर्मन्त्रेण त्रिपुण्ड्रं ब्रह्मचारिणा अग्निरित्यादिभिर्मन्त्रैः पंचब्रह्ममयेन वा त्रियम्बकेन मन्त्रेण नारायणेन तथैव च पंचाक्षरेण मन्त्रेण प्रणवेनान्वि
तेन च त्रिपुण्ड्रं धारयेन्नित्यं गृहस्थश्च वनाश्रमी प्रणवेनैव संधार्यं संन्यासाश्रमवासिभिः नमोऽन्तेनाप्यनेनैव धार्यं शूद्रैः स्त्रिभिस्तथा अन्येषामपि सर्वेषां विना मन्त्रेण सुव्रत भस्म
स्य धारणं प्रोक्तं नित्यं शैवागमेषु च उद्धूलनं त्रिपुण्ड्रं च द्विविधं धारणं स्मृतं अत्र केचित्त्रिपुण्ड्रोद्धूलनयोः समुच्चयेन धारणं नेच्छन्ति प्रमाणमप्युदाहरन्ति च उद्धूलने ह्यशक्तश्चेत्त्रिपुण्ड्रा
णि धारयेदिति बृहज्जाबाले तथा वायवीसंहितायां भस्मनोद्धूलनं चैव समानं त्रिपुण्ड्रकैः तस्मात्त्रिपुण्ड्रमेवैकं लिखेदुद्धूलनं विनेति तन्न सत् उद्धूलनं त्रिपुण्ड्रं च नित्यं धार्यं प्रयत्ने
नः उद्धूलनं त्रिपुण्ड्रं च मनसापि न लंघयेदिति केदारखण्डे समुच्चयविधानात् उद्धूलने ह्यशक्तश्चेत्यनेन शक्तस्य तदुभयं विधीयत इति बृहज्जाबालस्याशयः वायवीसंहितास्थवचनं त्रि



पुण्ड्रस्तुतिपरं विद्येश्वरसंहितायामपि तस्मादुद्धूलनं सर्वं त्रिपुण्ड्रं धारयेत्परमिति समुच्चयो विहितः उद्धूलनं द्विविधं स्नानार्थं शुद्ध्यर्थं चेति अत्र स्नानार्थं सजलेन भस्मनैव कार्यं शुद्ध्यर्थं तु
केवलेन भस्मनैव कार्यं विद्येश्वरसंहितावचनात् शंखतोयेन मूलेन भस्मना मेलनं भवेदिति बृहज्जाबालेपि तथोक्तत्वाच्च केचित्तु मध्याह्नात्प्राक् जलैर्युक्तं तोयं तत्परं तु वर्जयेदिति वचनात्
मध्याह्नात्प्राक् सजलेन भस्मना तदूर्ध्वं केवलेनेति व्यवस्थामाहुः तन्न दिवा वा यदि वा रात्रौ नारी वाप्यथवा नरः स्नानार्थं सजलं भस्म शुद्ध्यर्थं केवलं भवेदिति विद्येश्वरसंहितायां माध्याह्नादू
र्ध्वमपि सजलस्यैव धारणविधानात् अथवा मध्याह्नात्परतो जलनिषेधो वनस्थयतिकन्यादीक्षाहीनविषयः तदुक्तं स्मृतिसंग्रहे धार्यं भस्म त्रिसन्ध्यं तु गृहिणां जलसंयुतं सर्वकालं भवेद्वी
राणां पतीनां जलवर्जितं वनस्थयतिकन्यानां दीक्षाहीननराणां तथा मध्याह्नात्प्राग्जलैर्युक्तं परतो जलवर्जितं त्रिपुण्ड्रं तु सजलेनैव कार्यं तदुक्तं तत्रैव सर्वदा सजलं भस्म त्रिपुण्ड्रेणैव धा
रयेदिति तथा त्रिपुण्ड्रं सजलं भस्म धृत्वा स्नानं करोति यः शिवस्नानफलं साङ्गं तस्यैव हि न निश्चितमिति स्कन्दसंहितायां भस्मना सजलेनैव धारयेच्च त्रिपुण्ड्रकमिति मुमुक्षुर्वा युमुक्षु
र्वा द्विजेन्द्रः शुद्धवैदिकः धारयेत्सारं नित्यं भस्म वेदोक्तमार्गतः वेदोक्तेनैव मन्त्रेण क्षितं भस्माग्निहोत्रजं धारयेद्वैदिकः प्राज्ञस्त्रिपुण्ड्रोद्धूलनात्मना तिर्यक्त्रिपुण्ड्रमुक्तं तत्पुरुषार्थैकसाधनं
पुण्ड्रान्तरं अस्माद्धापि वैदिको नैव धारयेत् पुण्ड्रान्तरं कदाचिद्वाप्यश्रौतं शुद्धवैदिकः धारयेद्यदि मोहेन पतत्येव न संशयः यत्तु व्यासः जाह्नवीतीरसंभूतां मृदं मूर्ध्नि बिभर्ति यः बिभर्ति रू
पमर्कस्य तत्तमोनाशाय केवलं तथा सत्यव्रतः ऊर्ध्वपुण्ड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते स चाण्डालोपि शुद्धात्मा पूज्य एव न संशयः बृहन्नारदीयेपि ऊर्ध्वपुण्ड्रं यः करोति तुलसीमूलमृत्तिकां
नेत्रे वनेत्रं तस्य स्यान्मूर्ध्नि दोर्विभयात्कलौ यज्ञो दानं तपो होमः स्वाध्यायं पितृतर्पणं वृथा भवति विप्रेन्द्र ऊर्ध्वपुण्ड्रं विना कृतं बृहज्जाबालेपि अशुचिर्वाप्यनाचारो मनसा पापमाचरेत् शु
चिरेव भवेन्नित्यमूर्ध्वपुण्ड्राङ्कितो नरः ऊर्ध्वपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित् श्वपाकोपि विमानस्थो विष्णुलोके महीयते इत्यादिवचनजाते मृदोर्ध्वपुण्ड्रविधानात्कथं पुण्ड्रान्तरनिषेधः
क्रियत इति चेदुच्यते मृदोर्ध्वपुण्ड्रविधानं द्विजेतरविषयं अश्रौतमूर्ध्वपुण्ड्रादि ललाटे स्मृद्ध्यानुये धारयिष्यन्ति मोहेन युगान्ते समुपस्थिते इति वासिष्ठलैङ्गे तत्र माध्याये अश्रौतमिति वि

शेषितेनतस्याश्रौतत्वात् तर्हि स्मृतिषु विधानाभावादेकादशिनां तस्याविधित्वेन विषयत्वमिति चेन्न प्रत्यक्षस्मृत्यभावेऽप्यनुमितश्रुतेस्तत्र सद्भावात् तर्हि त्वनुमितश्रुतिसद्भावो ऊर्ध्वपुण्ड्रस्य
अस्त्विति चेन्न एकादशीव्रतस्य कुत्राप्यनिषिद्धत्वादनुमितश्रुतेः सम्भवात् ऊर्ध्वपुण्ड्रस्य तु पुराणेषु बहुशो निषेधादनुमितश्रुतिसद्भावस्य कल्पयितुमशक्यत्वाच्च तथा हि पराशरे सौकरे पु-
राण्ड्रं तरंगं तरङ्क्रियते ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरस्रकं अर्द्धचन्द्रादिकं लिंगं वेदनिष्ठो न धारयेत् जन्मनालब्धजातिस्तु वेदपंथानमाश्रितः पुण्ड्रान्तरं भ्रमाद्वापि ललाटे नैव धारयेत् ति-
र्यक्त्रिपुण्ड्रं संत्यज्य श्रौतं पुण्ड्रान्तरं भ्रमात् ललाटे धारयन्मर्त्यः पतत्येव न संशयः न दाहयेद्द्विजश्रेष्ठं न देहे चक्रलक्षणैः अंकितो यः स्वदेशात्तु राजा शीघ्रं प्रवासयेत् अतीव पतितानां हि स्वप-
चार्पं कृतं तु नराणां विधीयते न मुख्यानामतः मुद्रं न चांकयेत् अध्यापने चाध्ययने श्रौतस्मार्त्तेषु कर्मसु संभाषणे च संबंधे नाधिकारी च लांछितः नारदीये तप्तशंखचक्राद्यैर्लिङ्गैरङ्कित-
विग्रहं दृष्ट्वा तु नरकप्राप्तिर्जायते नात्र संशयः यस्तु संतप्तशंखादिलिङ्गाङ्किततनुर्नरः स सर्वयातनाभोगी चण्डालो जन्मकोटिषु द्विजः संतप्तशंखादिलिङ्गाङ्किततनुं नरं संभाष्य
रौरवं याति यावदिन्द्राश्चतुर्दश चक्राङ्किततनुर्यत्र तत्र कोपि न संविशेत् यदि तिष्ठेन्महापापी सहस्रं ब्रह्महा भवेत् गङ्गास्नानेनैनो वापि अश्वमेधशतेनापि वा ब्राह्मणः क्षत्रियो वैश्यः
शूद्रो नारी तथेतरः चक्राङ्किततनुं स्पृष्ट्वा रौरवं युगमश्नुते लिङ्गाङ्किततनुं दृष्ट्वा पश्येत्सूर्यं नरेश्वर हेमाद्रौ प्रायश्चित्तकाण्डे वायुपुराणे ब्राह्मणो यदि मोहेन तापयेद्वह्निमुद्रया न क-
र्मार्हो भवेदत्र सर्वपापक्षयसंज्ञकः लिङ्गपुराणे शंखचक्रे तापयित्वा यस्य देहे प्रदृश्यते स जीवन्कुणपस्त्याज्यः सर्वधर्मबहिष्कृतः आदित्यपुराणे एवं जन्मान्तरं दग्ध्वा शंखचक्रादि-
भिः एषकृततनुस्य निष्कृतिर्दृष्टा स्नानदानजपादिभिः प्रयोगपारिजाते पृथ्वीचन्द्रोदयादिनिबन्धेषु विष्णुः शंखचक्राद्यङ्कनं च गीतनृत्यादिकं तथा एकजातेरयं धर्मो न जातस्य द्विजन्म-
नः स्मार्त्तेति निशानातपहारीतवाक्यादिश्रुतानि न चात्र तप्ततनुर्न तरमोक्षमश्नुते रितिश्रुतिविरोधे न स्मृतीनामप्रामाण्यं श्रुतेर्यौक्तत्वात् लिङ्गवाक्यपरत्वादिना तप्ततनुरसंतापितदे-
होऽतपवामोऽपक्वोऽस्वरणादिः पुमान्नु ब्रह्म नाप्नुते ना स्नातीति श्रुतेरर्थः सूतसंहितायामपि वेदमार्गैकनिष्ठस्तु मोहेनाप्यंकितो यदि पतत्येव न संदेहस्तथा पुण्ड्रान्तरादपि नांकनं

विग्रहे कुर्याद्देवं यथा नमाश्रितः लोकिकताश्च नसंभाष्या नस्पृश्याश्चरुराचन नरशनीयास्तान् राजादेशाच्छीघ्रं प्रवासयेत् ऊर्ध्वपुण्ड्रं ललाटे नु वर्तुलं चार्धचन्द्रकं धारयिष्यन्ति मोहेन पातकिनोयत्
ताजनास्मारिपुराणवचनैः सांकनस्योर्ध्वपुण्ड्रस्य निरसनात्तानुमिताश्रुतिकल्पितं तु शक्यापकारश्रीवृत्तनिषेधस्य सर्वत्राभावात् तत्रानुमिताश्रुतिरस्येव तस्माच्छ्रौतं पुण्ड्रं तत्र विहाय वैदिक
श्रौतं त्रिपुण्ड्रं भस्मनैव धार्यमिति सुस्थितं ननु ऊर्ध्वपुण्ड्रं सदा धार्यं विप्रेणा वृत्तवारिणा उद्धृतासीति मन्त्रेणावैष्णवेन विशेषतः ब्राह्मणः क्षत्रियो वैश्यः शूद्रो नारी तथेतरः वक्राधरं
कयेन्नत्रमात्मनः परयामुदेत्यादि वचनैः प्राधान्येन सांकनं पुण्ड्रं न द्वर्णाश्रमवतामेव प्रोक्तमिति चेदुच्यते स्मृतसंहितायां नान्त्रिकाणामपि वर्णाश्रमासंतीति चोक्तत्वात् नान्त्रिककवि
षयत्वं तस्य कल्पनीयं तथाहि विष्वागमादिनान्त्रेषु दीक्षितानां विधीयते शंखचक्रगदापद्मैरङ्कनं नान्यदेहिनां दीक्षितानां तु तंत्रेषु तराणामंकनं द्विजाः उपकारकमेवोक्तं क्रमेणामुनिपुंगवाः
आनिपथगलितानां मानुषाणां तु तंत्रे ग्रहग्रहणक्लेशः सर्वविप्राहृशम्भुः आनिपथनिरतानामत्रिनेवात्रकिंचिन्निह्नवकारि सर्वपुष्कलं तस्यमुक्तं आनिपथगलितानां मानुषाणां
तु तन्त्रे हरिरपि मुनिमुख्याः प्राह धर्मं स्वकीये विधिरपि मनुजानामाह वर्णाश्रमाश्च आनिपथगलितानामेव तंत्रे स्वकीये आनिपथगलितानां तेन संसेवनीयाः आनिपथसमभार्गे नैव स
त्यं मयोक्तं तथा भस्मनापि वैदिकानसेन यो विहितोर्ध्वपुण्ड्रः सोपि वैदिकेन धार्यः किंतु तान्त्रिकेणैव मनुमुक्तम् मन्त्रादिनाप्रमन्त्रेण तस्य विहितत्वात् भस्मनैवोर्ध्वपुण्ड्रं वर्तिर्य कुर्यान्म
दं तथा ब्रह्महत्यासमः प्रोक्तो मुनिभिर्वेदपारगैः तथा ऊर्ध्वपुण्ड्रं सदा कुर्यात्त्रिपुण्ड्रं भस्मनैव हि ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा चंदनेन विधीयते इत्यादिवचनैर्विशेषेण भस्मनोर्ध्वपुण्ड्रस्य निषेधाच्च
यत्तु वायवीयादौ पुनर्मंत्रकारणेमन्त्री त्रिपुण्ड्रं भस्मनाग्निरवेत् आवक्रमाभ्रतं व्यतं ललाटे गन्धवारिणा इतं वा चतुरस्रं वा बिंदुमर्धेन्दुमेव वा लिङ्गसोपार्धचंद्राभं चतुरस्रं च वर्तुलं त्रि
पुण्ड्रं चेति कथितं षड्विधं पुण्ड्रवर्णासनमित्यादि तत्रापि तान्त्रिकविषयं न वैदिकविषयं वर्तुलं बुद्धभक्तानां लिङ्गं बिन्दुस्तथैव च वैष्णवानां लिङ्गपीठं चतुरस्रार्धचंद्रकं भस्मनापि वभक्तानां
लिङ्गं धार्यं त्रिपुण्ड्रकमिति तन्त्रे चोक्तत्वात् वेदमार्गैकनिष्ठानां शैवानां वेदवर्तिनां ललाटे भस्मना तिर्यक्पुण्ड्रं प्रोक्तं सदैव हि निश्चितां तरान्च तथा गोपी चंदनसंयुक्तं भस्मना तिर्यक्त्रि

पुण्ड्रकं षष्टिवर्षसहस्राणि नरकं तत्र वेशयेदित्यादिस्मृतिसमाचारात् मुमुक्षोपि नियुक्तः नत्वं श्रौतानूर्ध्वपुण्ड्राद्याचारपरिग्रहे श्रौतं भस्म त्रिपुण्ड्रत्यागे च किं कारणमिति चेदुच्यते
परकारिये महापापवतां नराणां वेदसिद्धे महेश्वरे त्रिपुण्ड्रोद्धूलनादौ च प्रद्वेष अप्रजापतेत्यादि आदित्यपुराणे दुर्वाससो मुनेः शापात् कुपितस्य महात्मनः कण्वशापाद्भृगोः शापादुपम
न्योश्च शापतः दधीचस्य मुनेः शापाद्गौतमस्य च शापतः विप्राणां हस्तिगात्राणां पापोपहतचेतसां प्रायेण भस्मनि द्वेषो किंचिदुद्भवति वासिष्ठलैङ्गे येषां भस्मनि विद्वेषो वर्त
ते रुद्रयेतरा संकीर्णा सा भवेद्धूलनं तेषां वंशपरंपरा सूतसंहितायां श्रुतौ चैव महादेवे त्रिपुण्ड्रे भस्मगण्डने प्रज्ञानकुत्सने मर्त्यः पुण्यलेशविवर्जितः वेदोक्तेष्वपि वा लोकेषु विपोत्कर्षे
नये च वच त्रिपुण्ड्रोद्धूलने लक्षं श्रद्धापुण्यवतां भवेत् तस्मान्निषिद्धमश्रौतं त्यजेत् पुण्ड्रं नरं द्विजः श्रौतं नित्यं लिखेत् त्रिपुण्ड्रं सितभस्मनेत्यादि सिद्धं यत्तूक्तं नृसिंहपरिचर्यायां न
समुद्धरणं श्रौतमिति तत्र श्रुतयः यो ह वै श्लोकमौलेर्धर्मानुनुतिसमानोऽस्मिन्नाचक्रं धत्तेऽग्निर्वै सहस्रारः सहस्रारेणेमे तिग्मिनात प्रतनूः सायुज्यं सलोकतामाप्नोतीति तथा
चक्रं बिभर्ति वपुषाभितप्तं बलं देवानाममृतस्य विष्णोः स एति नाकं दुरितानि विधूय विशन्ति यतयो वीतरागाः तथा चरूपीपिठे अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्त
स्तत्समाशतेति तत्र यो ह वै इति वचनं शतपथश्रुतिस्थमिति रामार्चनचन्द्रिकाकारादिभिरुक्तं न च तच्छतपथब्राह्मणे उपलभ्यते किंच नेह विधिश्रूयते अपि च पतितादिविषयकं
मेव प्राकरणत्वस्मादित्वात् न च स्वस्यान्यस्मृतेः संकोचोऽनुपपन्न इति वाच्यं विशेषविषयिण्या सस्यासामान्यस्मृतेः संकोचस्य सर्वसंमतत्वात् अन्यथा पतितस्याप्यग्निहोत्रप्रसंगात्
कलावपि नरमेधाश्वमेधादेः प्रसंगाच्च तत्र यदि पतितानां कर्मानधिकारबोधकस्मृत्या नरमेधाश्वमेधकाविति कलौ निषिद्धपरिगणनस्मृत्या च अग्निहोत्राश्वमेधादिश्रुतीनां संको
च इति ब्रूषे तर्हि प्रकृतेऽपि तुल्यं एतेन चक्रं बिभर्तीत्यादिवचनमपि गतार्थं यदप्युक्तं अरकारीपिठ इति तत्र नैरुपारिपिठं किंतु सप्तमाष्टकेयथन्इति तावत् वैदिकेष्वपि ग्रहणं किं
च नास्य त्वदभिमतोऽर्थः संभवति इदं तु उपजीव्यमेगोत्रस्यं आख्यानं पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः अतप्ततनूर्नेति ऋगन्त्रं ब्राह्मणे वेदस्य च

नुर्मुखस्याब्राह्मणजातेर्वा पनेरस्तकेतिविष्णुसंबोधनं प्रमुखत्वं त्विष्वन्तोविष्वेर्वा गात्राणिपर्येषन्तर्पामितयाभाप्नोषि तादृशस्यते तत्पवित्रं सुदर्शनं अर्थान्तेनेतिलभ्यते अत
प्ततनूः असंस्कृतशरीरः आमः अदग्धपापः तद्भ्रमात्नुते नचैतच्छास्त्रमात्रं प्रामाणिकं तस्मात्नुद्राविनश्शापवित्रंवितत्वंत पवित्रंतेविततंब्राह्मणस्यतदितिविततस्मात मणिमंत्रप
तेयजमानस्यापत्तंवस्त्रेणउभ्यारभ्यैः द्रोणकलशशोवितस्मानस्पवित्रस्यानुमंत्रणोपतन्नेत्रविनियोगात् तथाचहेब्राह्मणस्यतेसोमतेतुभ्यंत्वत्पावनार्थंदृंदृशापवित्रंविततंतस्य
धोभाव्यसंमतः अपिच सोमस्यधरापचतस्युपक्रमात् शोचंतोअस्यजंतवः स्युत्तरत्ररशंनात् पवमानसोमोदेवतेत्यनुक्रमणिकावचनात् सर्वोप्ययलंवस्त्रात्छत्वउक्तोर्थोः संगतपूर्व
पद्मपुत्तंविष्णुमक्रचक्रोदये नारायणायुधैर्युक्तं कृत्वास्मानंकलौयुगे कुरुतेपुण्यकर्माणिमेहतुल्यानसंशयः स्मार् — ब्रह्मपुराणवचनानीति तदपिसमूलत्वेसर्वत्रद्विजेतरविषयमवस्थाप
ते — नगतार्थं प्रमुत्तव्रह्मपुराणोदशमाध्याये तप्तमुद्रास्थंतत्रापहारिणानिर्मितापुरा भूदेवस्तस्मुद्रांतुचिन्हंकृत्वाविमूढधी ऋजन्मनिमृशास्यान्त्यस्थाचमविद्यामिर्दितिक अथोद्धू
लनप्रकारेजावाले तत्रादौश्लोकः प्रस्थितोभस्मग्रन्हीयात्स्वपंवानुचरोपिवा नचापुक्तकरेदद्यात्नचाशुचिजलेक्षिपेत् यावंतःपतिताःभूमौभस्मतःपरमाणवः तावद्वर्षसहस्रा
णिरौरवंनरकंव्रजेत् भूत्वातस्मात्सावधानोधारयेद्भस्मबुद्धिमान् आदेशसमादायभस्मपात्रेनिधायतत्प्रक्षाल्यपादौहस्तौचद्विराचम्यसमाहितः गहीत्वाभस्मनोमुष्टिंसद्योजातादि
भिर्गृहीत्वा प्राणायामत्रयंकृत्वाधात्वाचेवस्सरापिवं अग्निरित्यादिभिर्मंत्रैर्मिश्राचरमभिमन्त्र्यतत् ईशानेनपंचधाभस्मविकिरेन्मूर्द्धवततः मुखेचतत्पुरुषेनाघोरेणाथधारदि वा
मेनगुह्यदेशेतुत्रिदशस्यानमेदतः अथधासधमंत्रेणपादौचवुद्ध्वालयत्ततः संध्यात्रयेनिशीथेचतथादर्शावसानयोः सुप्ताभुक्तापयःपीत्वाकृत्वाचावश्यकादिकं स्त्रियंनपुंसकं
गध्रंविडालंवकमूषकौ स्पृष्ट्वातथाविधानमात्रभस्मनास्नानमाचरेत् देवाग्निगुरुवृद्धानांसमीपंमजदर्शने अभ्युद्धतलेमार्गेकुर्यात्रोद्धूलनंव्रती शंखतोयेनमूलेनभस्मनाभिमंत्रणं
भवेत् योजितंचरतेनापिवाणिसंपुतंजुवा चंदनेनसमंलिपेत्सानोधामस्मचवाहि मध्यान्हात्प्रागजलैर्युक्तंतोपांतरन्तुवर्जयेतं अथत्रिपुण्ड्रधारणविधिस्तत्रैव तत्रुषड्डंधं तदुक्तं

वायवीयसंहितायां लिङ्गे तथार्द्धचंद्राभं चतुरस्रं च वर्त्तुलं त्रिपुण्ड्रं चेति कथितं बुद्ध्यं शिवशासनं सर्वस्थापितं तेन च वर्त्तुलं वृत्तभक्तानां शाक्तानां चतुरस्रकं वैष्णवानां दीपसमं स्यादर्द्धचंद्राभमे
व च सदाशिवस्य भक्तानां शाक्तानां चतुरस्रकं वैष्णवानां दीपसमं स्यादर्द्धचंद्राभमेव च सदाशिवस्य भक्तानां लिङ्गं स्निग्धं त्रिपुण्ड्रकं वर्णभेदेन वक्ष्योक्तं सिद्धांतशेखरे विप्रे त्रिपुण्ड्रमुद्दिष्टं
चतुरस्रं तु पार्थिवे वैश्ये अर्द्धचंद्रमुण्ड्रं शूद्रे वर्तं प्रकीर्तितमिति क्रियासारे मध्यांगुलित्रयेणैव स्वस्वस्थिराकारयेत्तु षडंगुलायतं मानमपि चाधिकमानगं नेत्रयुग्मप्रमाणेन भालेषु
यो त्रिपुण्ड्रकं वर्णभेदेन मानमुक्तं सिद्धांतशेखरे षडंगुलायतं विप्रे शेषेष्वङ्गुलहानितः यथासम्भवतः कुर्याद्देशकालाद्यपेक्षयेति तत्रैव श्लोकाः त्रिपुण्ड्रं कारयेन्नित्यं वृत्तविस्तु
शिवात्मकं ऊर्द्ध्वपुण्ड्रं भवेत्साम मध्यपुण्ड्रं यजूंषि च अर्द्धपुण्ड्रमथर्वाः साक्षात्तस्मात्पुण्ड्रं त्रियायुतं आदरेण समादाय भस्म पात्रे निधाय च प्रक्षाल्य पादौ हस्तौ च ह्रिणच्य समाहितः गृही
त्वा भस्म तत्स्थं च तूष्णीं मन्त्रैः शनैः करे पंचब्रह्ममंत्राः सद्योजातादयः अग्निरित्यादिभिः षड्भिर्मंत्रैश्चैवाभिमंत्रयेत् ॐ मायो ज्योतिरित्युक्त्वा ध्यात्वा विष्णुं जलादिपं संयोज्य वारिणा भस्म मानसो
केनिमर्दयेत् मध्यांगुलिभिरनामिकाभिर्मूलमंत्रितं अनामामध्यमांगुष्ठैरथवास्यात्त्रिपुण्ड्रकं अकारोनाभिकाप्रोक्ता उकारो मध्यमांगुलिः मकारस्तर्जनी तस्मात्त्रिभिः कुर्यात्त्रिपुण्ड्रकं अग्नि
र्योमध्यात्समारभ्य यावत्तो भवेद्भ्रुवौ अकारो गार्हपत्याग्निर्भूश्च धर्मश्च रजोगुणः ऋग्वेदश्च क्रियाशक्तिः प्रातःसवनमेव च महादेवश्च रेखायाः प्रथमायाश्च देवता उकारो दक्षिणाग्निश्च भुवः
सत्त्वं यजुस्तथा मध्यंदिनं च सवनमिच्छाशक्तिस्तथैव च महेश्वरश्च रेखायाः द्वितीयायाश्च देवता मकार आहवनीयश्च परमात्मा तमो दिवः ज्ञानशक्तिः सामवेदस्तृतीयं सवनं तथा शिवश्च
तृतीयायाः रेखायास्त्वधिदेवता एतान्नित्यं नमस्कृत्य त्रिपुण्ड्रं धारयेच्छुचिः स्मरन्नमः शिवायेति ललाटे च त्रिपुण्ड्रकं कुर्याद्भुवः पितृभ्यां तु उमेशाभ्यां तथोपरि ईशाभ्यां नमस्त्युक्त्वा
र्धयोश्च त्रिपुण्ड्रकं स्वच्छाभ्यां नमस्त्युक्त्वा धारयेत्प्रकोष्ठयोः भीमायेति ततः पृष्ठे शिवायापि हरे तथा नीलकण्ठाय शिरसि क्षिपेत्सर्वात्मने नमः पापं च नाशयेत्सर्वमपि जन्मशता
र्जितं कण्ठोपरिकृतं पापं नष्टं स्यात्तद्धारणात् कण्ठे च धारणात्कर्णभोगादिकृतपातकं बाह्वोर्बाहुकृतं पापं वक्षः सुमनसा कृतं नाभ्यां शिश्नकृतं पापं पृष्ठे गुदकृतं तथा पार्श्वयो

श्री लिं· चं·
२३

द्धारणात्सापंचरछ्याल्लिंगनादिकं तभस्मधारणं कुर्यात्सर्वत्रैवत्रिपुंड्रकं ब्रह्मविष्णुमहेशानांत्रैयग्नीनांचधारणं गणालोकत्रयाणांचधारणंतेनवैकृतं भस्मोपरिचंदनादि
कंनधार्यंतदुक्तंकौर्मे वैदिकैर्मंत्ररहितंचंदनागरुकुंकुमं तिर्यक्पुण्ड्रंनधार्यंकान्तिसौख्याभिलाषिभिः पुण्ड्रोर्ध्वंचंदनाद्यैरितिभस्मनसंत्यजेत् इत्येतभस्महंसागीस्मृतौ
शक्तोध्र्ववन्दितः चन्दनाद्युपरिप्राज्ञोधारयेभस्मवैदिकं लौकिकंचंदनाद्यंतुभस्मोपरिनधारयेत् भस्मवच्चंदनादीनांन्यागेःनर्थोनविद्यते चन्दनादिनयत्नोलौकिकान्येवात्र
नसंशयः इत्यकांम्याद्यर्थंचंदनादेरुपरिभस्मनिषिध्यते किंचिच्चंदनादेधारणस्यफलंनचेत् उपरिष्टाच्चंदनादेर्धनेऽत्येसितभस्मनि चन्दनाद्यंभस्मोस्यफलाप्तेःकोनिवारकः त्रिपु
ण्ड्धारणंमंत्ररहितंतूष्णींनकार्यं तदुक्तंविद्येश्वरसंहितायां जाबालोक्तादिकैर्मन्त्रैर्धार्यंभस्मत्रिपुण्ड्रकं अन्यथावेत्तत्त्वेयावत्तुजलंन्नारकंबुजेदिति ष्टावधर्मे येनभस्मोक्तमार्गेण
नधृतंमुनिपुंगव तस्यविद्धिमुनेजन्मानिःफलंरुद्रोयथा मंत्रसारसुधानिधौत्रिपुण्ड्रंसदाकुर्यात्मंत्रएतेनभस्मना मंत्रेणानेनयःकुर्यात्सपापभागीभवेन्नरः इतिभस्मधारणविधिः
अथरुद्राक्षधारणविधिः बृहज्जाबाले अथभुसुण्डःकालाग्निरुद्रंपप्रच्छकथंरुद्राक्षोत्पत्तिस्तद्धारणेकिंफलमिति सहोवाचभगवान्कालाग्निरुद्रस्त्रिपुरवधार्थायाहंमीलिताक्षोऽभवं
तेभ्योजलबिंदवोभूमौपतितास्तेरुद्राक्षाजाताः सर्वानुग्रहार्थायतेषांनामोच्चारणमात्रेणदशगोप्रदानफलंदर्शनस्पर्शनाभ्यांद्विगुणंफलमतऊर्ध्वंनशक्नोमि तत्रैतेश्लोकाः धात्रीफल
प्रमाणंयत्श्रेष्ठमेतदुदाहृतं बदरीफलमात्रंचमध्यमंप्रोच्यतेबुधैः अधमंचणकाकारंप्रक्रियैषामयोच्यते रुद्राक्षाणांवै रुद्राक्षाणांफलंशास्त्रंदेविसर्षपमात्रकं सर्षपादधिकाश्रा
त्याआर्द्रधात्रीफलावधि तदूर्ध्वंसात्त्विकेग्राह्यावेश्येग्राह्यास्तदूर्ध्वकं तदूर्ध्वंशांकरैर्ग्राह्यंएवंरुद्राक्षलक्षणं ब्राह्मणोबिभृयात्श्वेतान्रक्तान्राजातुधारयेत् पीतान्वैश्यस्तुबिभृया
त्कृष्णान्शूद्रस्तुधारयेत् स्वयमेवकृतद्वारंयत्तत्स्यादितिहोत्तमं यत्पौरुषयत्नेनकृतंतन्मध्यमंभवेत् समान्स्निग्धान्दृढान्स्थूलान्कण्टकैःसंयुतान्शुभान् हृतान्सोमस्यसूत्रेण
धारयेत्सर्वदानरः निर्वर्णहेमलेखाभायस्यांरेखाप्रदृश्यते तदेवमुक्तमंविधानरुद्रप्रावजकैः ननुनाम्युचिर्धारयेद्रुद्रमात्रांमन्त्रेणवधारयेदित्यादिपर्यालोचनयाधारयेत्सर्वदानरः

तिनु मूत्रपुरीषोत्सर्गादिरहितकालो धारणं कार्यमिति केचिदाहुः तन्न सर्वदात्वस्य संकोचे मानाभावात् नाशुचिर्धारयेदित्यस्य जपमालापरत्वाच्च पुरीषोत्सर्गे धारण
विधानाच्च तदाह वाशिष्ठलैङ्गे जिघ्रन्नपि तथाचाश्नन् अलपन्नपि संततं कुर्वन्नपि यथा गच्छन् निस्सृजन्नपि मानवः रुद्राक्षधारणादेव सर्वैः पापैर्न लिप्यते विसृजन्मूत्रपुरीषमित्यर्थः
शुचिर्वाप्यशुचिर्वापि सर्वावस्थां गतोऽपि वेत्यादि लिङ्गवचनात् शिवरहस्ये रुद्राक्षस्पर्शनेनापि नश्यत्यघकुलं सदा तस्मात् रुद्राक्षमालिकां कृत्वा कुरु रुद्राक्षधारणं रुद्राक्षधारणं कृत्वा
भस्मधारणपूर्वकं कृत्वानन्तमहापापोऽप्यनायासेन मुच्यते वेदस्वाध्ययनं कार्यं उपवीतैर्यथा तथा रुद्राक्षधारणं कार्यं सर्वपापनिवृत्तये विभूतिधारणं कृत्वा कृत्वा रुद्राक्षधारणं
यः शिवं स जपेन्मन्त्रान् स मोक्षमधिगच्छति बोधायनोऽपि मानवाय तानि रुद्राक्षाणि त्रयो वेदा धारयन्ति तस्मादेव धारयन्ति यस्तानि धारयन् गच्छति उन्मिषन्नपि सर्वावस्थे नासित
रन्ति धारयन्ति तस्मादेव धारयन्ति यस्तानि धारयन् गच्छति स्वपन् तिष्ठन् उन्मिषन्नपि सर्वावस्थे नासितरं तिष्ठ रुद्रभूत्वा शमनं त्वमनीति स्नाने दाने जपे होमे वैश्वदेवे सुरा
र्चने प्रायश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः अरुद्राक्षधरो मर्त्यो यत्किंचित्कर्म वैदिकं कुर्यात् विप्रस्तु यो मोहात् नरकं स वा प्राप्नोति तत्फलमिति वर्जनाहतं त्वेव कृमिदष्टं छिन्नं भिन्नं कंटके
हीनमेव च व्रणयुक्तमवृत्तं तत्परं रुद्राक्षाणि वर्जयेत् संक्षेपतस्त्वेवोक्ता शिखायामेकरुद्राक्षं त्रिंशतं शिरसा वहेत् षट्त्रिंशतं गले द्वाभ्यां कर्णयोः षोडश षोडश द्वादशं मणिबन्धे पि स्कन्धे
पंचशतं वहेत् अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत् द्विसरं त्रिसरं वापि सराणां पंचकं तु वा सराणां सप्तकं वापि बिभृयात् कण्ठदेशतः त्रिंशतं सप्त धर्मे पंचशतं मध्यमं मुच्यते सहस्रमु
त्तममप्रोक्तमेवं भेदेन धारयेत् तुलोत्तरत्वतो सहस्रं धारयेद्यस्तु रुद्राक्षाणां सुधीः नरः तं नमन्ति सुराः सर्वे यथा रुद्रस्तथैव सः अभावे तु सहस्रस्य बाह्वोः षोडश षोडश एकं शिखायां
करयोर्द्वादश द्वादशैव हि द्वात्रिंशत्कण्ठदेशे तु चत्वारिंशत्तु मस्तके एकैकं कर्णयोः षट् षट् वक्षस्यष्टोत्तरशतं यो धारयति रुद्राक्षान् रुद्रवत्सोऽपि पूज्यते मुक्ताप्रवालस्फटिकवैडूर्यरौ
प्यकांचनैः समन्वितान् धारयेद्यस्तु रुद्राक्षान् शिवो भवेत् केवलान्वापि रुद्राक्षान् यो धारयेत् भावभक्तियः यस्यांगे नास्ति रुद्राक्ष एकोऽपि बहुपुण्यदः तस्य जन्म निरर्थं स्यात् त्रिपुण्ड्ररहितं यथा

स्कान्दे ॐकारमहात्म्ये रुद्राक्षाणां सहस्रं हि मुमुक्षुर्धारयेत्सदा तदभावे शतं वापि दश चैकमथापि वा शंकरसंहितायां धत्तेऽयमेतत्सूत्रेण सोऽवतीर्णो नाथवा द्विजाः एतेन च तन्त्रेण रुद्राक्षं च गलादिषु यज्ञोपवीते वा चैकं भस्मवत्सर्वथा द्विजाः तस्मात्सर्वप्रयत्नेन भस्मरुद्राक्षभूषणाः न विभ्यति च शत्रूणां यथा निर्भयपयवसः रुद्रस्यास्तु तथा विप्रा रुद्राक्षाणामिति कीर्तितं रुद्राक्षधारकेशश्मश्रुः परिहर्ता रुद्राक्षवान् रुद्राक्षधारकाः सर्वे रुद्राकारं प्रकीर्तिताः ज्ञात्वा ये शिवभूषणं परतमं स्वर्गापवर्गप्रदं रुद्राक्षं विधिनामुना निजतनौ सम्यक्सदा विभ्रति तेषां दग्ध निजेन साम्यमिह फलं ज्ञानाति को वा सुधीः स्कान्दे शंकरमंबिकां गणपतिं नंदीनयाषण्मुखं धारणे मंत्राश्चोक्ता बृहज्जाबाले सद्योजातेन शिरसि वामदेवेन कर्णयोः अघोरेण गलेधार्यं तत्पुरुषेण च ईशानाख्येन मंत्रेण करयोर्धारयेत्सुधीः ब्रह्मचारिगृहस्थानां वनस्थानां तथैव च रुद्राक्षधारणे मंत्राः प्रोक्ता वै विश्वयोनिना प्रणवेनैव संधार्यं यतिभिः सर्वसद्धपे द्विजानां मंत्रतः प्रोक्तमन्येषां मंत्रवर्जितं रुद्राक्षमध्ये एकमुखपंचमुखौ धारणे स्यातिश्रेष्ठौ धारयतां नरैः रुद्राक्षाणां पंचमुखस्तथा चैकमुखः स्मृतः ये धारयंत्येकमुखं रुद्राक्षं नित्यमेव हि जीवन्मुक्ताश्च विज्ञेया नरास्ते नात्र संशयः एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ये रुद्राक्षं पंचमुखं धारयंत्यनिशं नराः रुद्रलोकं च गच्छंति रुद्रेण सह रेजिरे अथ मालाप्रकारो रुद्रयामले त्रिंशद्भिः कृता माला धनदा जपकर्मणि सप्तविंशतिसंख्यातैः रक्षैः पुष्टिप्रदा भवेत् पंचविंशतिसंख्यातैः कृता मुक्तिप्रदा भवेत् अक्षैस्तु पंचदशभिरभिचारफलप्रदा स्कान्देऽपि अष्टोत्तरशतेनापि माला सर्वार्थसाधका रुद्राक्षमूलं तद्ब्रह्मा तन्नालं विष्णुरुच्यते तन्मुखं रुद्र इत्याहुर्बिंदवः सर्वदेवताः अक्षसूत्रं प्रकुर्वीत गोपुच्छवलयाकृति वक्त्रं वक्त्रेण संयोज्य पुच्छं पुच्छेन योजयेत् मेरुमूर्ध्वमुखं कुर्यात्तदूर्ध्वं नागपाशकं प्रक्षाल्य गंधतोयेन पंचगव्येन चोपरि ततः शिवाम्भसा क्षाल्य मूलमंत्रं ततो न्यसेत् पश्चात्संरक्षयेत्तां हि गन्धपुष्पाक्षतादिभिः मूलमंत्रं समुच्चार्य मूर्ध्नि मौनी निधाय च पूजयेन्मूलमंत्रेण तस्यां देवं सहाम्बया रुद्राक्षमाला चैवं हि जपयोग्या ततो भवेत् नामुं विधिं धारयेद्रुद्राक्षमालां भक्त्यैव धारयेत् अक्षमाला प्रगोप्या जपकाले सुमेधसा परहस्तगता माला निष्फला जपकर्मणि जपकाले त्वक्षमालां गोपयेदपिनद्धयेन इति रुद्राक्षमालाप्रकारः ० यथालब्धोपचारैश्च योऽशेषैः श्रद्धया पुनः

पूजयेत्सार्घ्यं च लिङ्गं वेदोक्तविधिना द्विजः इति षोडशोपचारैः पूजनमुक्तं षोडशोपचारास्तूक्ताः स्मृतौ आवाहनासने पाद्यमर्घ्यमाचमनीयकं स्नानं वस्त्रोपवीतं च गंधपुष्पे च धूपकं दीपम
न्नं नमस्कारः प्रदक्षिणा विसर्जनं इति ननु पंचवाणलिङ्गे आवाहनविसर्जनयोरभावात्कथं षोडशोपचारत्वमिति चेत्सत्यं आवाहनं नाम ध्यानेन संमुखीकरणं विसर्जनं नाम प्रार्थना
नयोस्तत्र संभवात् षोडशोपचारत्वं सुस्थितं अत एव स्कान्दे ध्यानं च स्वासनं पाद्यमर्घ्यमाचमनीयकं स्नानं वासोपवीते च भूषणानि च नैवेद्यं च गंधपुष्पे तथा धूपं दीपमन्नं निवेदनं प्र
दक्षिणा नमस्कारः स्युपचारास्तु षोडश इति ध्याननमस्काराभ्यां षोडशसंख्यापूरणं कृतं अथवा आवाहनं नाम अभिव्यक्त्यनुसंधाने विसर्जनं नाम निजरूपेणावस्थानं तदुक्तं कालोत्तरे
आवाहनमभिव्यक्तिर्निजभावो विसर्जनं एवं दिने दिने देवं पूजयेद्विकायतिमिति सिद्धान्तशेखरे पूजाभेदे न यजनं पंचधा परिकीर्तितं आराधनार्चने पूजा यागोर्हा चेति पंचधा आरा
धनं तु दीपान्तं मुनीनां मुक्तिदायकं अर्चनं स्याद्धविष्यान्तं बुभुक्षोर्मुक्तिदायकं पूजोत्सवान्ता विज्ञेया ग्रामादेः सर्वसौख्यदा यागो नृत्यान्तको ज्ञेयो राज्यसर्वसमृद्धिकृत् विप्रभोजनपर्यन्तं सा
दर्हा सर्वशांतिदा इत्थं पंचविधं प्रोक्तमुपचारक्रमेदतः इति तन्त्रसारसंग्रहे आवाहनञ्चासनं चाद्यान्तं वै पुष्पांजलिं हरेः तस्यैवोन्मुखता प्राप्त्यै तथा चोद्वासनेऽर्चयेत् पुनः पुष्पांजलिं दद्यात् शालि
ग्रामपिण्डादिषु भागवते उद्वासावाहने न स्थिरायामुद्धवार्चने अस्थिरायां विकल्पस्स्यात्स्थण्डिले च भवेद्द्वयं कालिकेऽपि तु उपचारान्तर्गतत्वे नावाहनविसर्जने सः इत्युक्तं ना
रायणभट्टैः शैवागमेऽप्युपचाराष्टकमेवमुक्तं गंधं पुष्पं च धूपं च दीपमन्नं निवेदनं तांबूलं च नमस्कारः प्रदक्षिणा समापनेरिति असमशक्तेन षड्भिरेवोपचारैः पूजनं कार्यं तदुक्तं स्कान्दे अ
भिषेकादात्मशुद्धिर्गन्धात्पुण्यमवाप्यते आयुर्वृद्धिः पुष्पदानात् धूपाद्वर्चमवाप्यते दीपाज्ज्ञानमवाप्नोति नैवेद्याद्भोगमवाप्नुयात् तस्मात्स्नानादि षट्कं च प्रयत्नेन प्रसाधयेत् असमशक्तेन तु
द्विविधैरेवोपचारैः पूजनं कार्यं तदुक्तं सौरसंहितायां अभिषेकं च नैवेद्यं नमस्कारस्तथैव च एतावदेकं त्वशक्तेन प्रपन्नतः वायव्यसंहितायां तु असमशक्तस्य पुष्पमात्रसमर्पणमुक्तं पा
द्यादि मुखवासांतमर्चनं वापि संकरे पुष्पविक्षेपमात्रं वा कुर्यादभावपुरःसरं तावतैव परो धर्मो भावेन पूजकृते भवेदिति पाराशरीये प्रदक्षिणात्रयं कुर्यान्मूलमन्त्राप्रणतिर्भुवि सान्तिपूजान्तिके

लिं॰ व॰
२५

स्थाणौ सर्वदोषविवर्जिताः अयत्नलभ्याः सर्वेषां भुक्तिमुक्तिफलप्रदाः कान्ते ओंकारमहात्म्ये अप्ययलिङ्गे यदि पिनो शङ्कः सर्वे स्वार्पितं प्रदक्षिणनमस्कारैस्तोषये सार्वजोपतिं तत्राप्यशक्तस्य
स्तदर्धं चिंतनमात्रमुक्तं शिवगीतायां प्रदक्षिणास्वशक्तश्चेत् स्वान्ते चिंतयेच्छिवं गच्छन्समुपविष्टो वा तस्याभीष्टं प्रयच्छति लैङ्गे योर्चयेद्बिल्ववृक्षस्थापत्नीनैश्चसाधनैः एतत्फलार्धमेवास्य
न समग्रफलं भवेदिति बिल्वपत्ररहितं शिवपूजनं न कार्यं तदुक्तं आदित्यपुराणे गोमयाद्युत्थितः श्रीमान्बिल्ववृक्षः शिवः प्रियः तत्राप्येष महालक्ष्मीः श्रीवृक्ष इति चोच्यते बिल्वपत्रै
र्विना यस्तु यः करोति शिवस्य च स याति नरकं घोरं यावदिन्द्राश्चतुर्दश शिवरहस्ये शिवलिङ्गं बिल्वपत्रैः कोमलैरमलैरपि एकयेत्त्रिपत्रं पत्रसंघस्थः पुरुषर्षभः छिद्राण्यतीवरम्याणि बिल्व
पत्राणि सादरं येनार्पितानि मल्लिङ्गे तेन मुक्तिरवाप्यते अभिषिच्य विधानेन यो मां बिल्वदलैर्मुदा एकं पिष्यति पुण्यात्मा स मोक्षमधिगच्छति बिल्वपत्रैरखण्डैस्तु सकृत्सम्पूजयेच्छिवं सर्वपाप
विनिर्मुक्तो रुद्रलोके महीयते बृहन्नारदपुराणे नित्यमाद्यैर्नाविद्धैर्बिल्वपत्रैः सदाशिवं एकं यस्तु सदा देवं तस्यास्त्याप्रमदो भव सौरपुराणे यः कं बिल्वदलं रम्यं मद्भक्तो नार्पितं मयि अनंताद्बहुरं
तुरं सत्यमेवोच्यते मया दर्शनाद्बिल्ववृक्षस्य स्पर्शनाद्वन्दनादपि अहोरात्रकृतं पापं नश्यते नात्र संशयः बृहन्नारदे मंत्राक्षरेण मंत्रेण बिल्वपत्रैः शिवार्चनं करोति श्रद्धया यस्तु सगच्छेदैश्व
रं पदं बिल्वपत्रच्छेदने निषिद्धदिनान्याह लैङ्गे अमारिक्तासु संक्रांतौ नावयस्यामिंदुवासरे बिल्वपत्रं न च छिंद्याच्छिंद्याच्चेन्नरकं व्रजेत् नूतनालाभे शुष्कैः पर्युषितैरपि च स्यादर्चनं कार्यं तदु
क्तं शिवरहस्ये शुष्कैः पर्युषितैः पत्रैरपि बिल्वस्य नारद एकयेच्छिवं ज्ञानात्परमलाभेश्चन्नो नरैः सुवर्णं बिल्वपत्रं च रत्नं च जलजं तथा नहि पर्युषितं यस्मात् शुद्धमेव स्वयं यतः तुलस्यां बि
ल्वपत्रेषु जलजेषु च सर्वशः न पर्युषितदोषोस्ति जलजेष्वम्लवं च यत् न पर्युषितदोषोस्ति मालाकारगृहे तथा सिद्धान्तशेखरे पर्युषितानि तुलसी मासमात्रं न दुष्यति चत्वारिंश
द्दिनं बिल्वं कमलं त्रिदिनं शुभं केतकीशतपत्रं च शुभं पंचदिनं स्मृतं पद्ममात्रं रमनकोरं चरित्यतोपि न दुष्यति जातिपत्रैः फलैश्चापि तथा कुंकुमकेसरैः सुगंधपुष्पैर्यन्त्रे न सदा
सुशो महेश्वरः नैषां पर्युषितत्वं चास्त्यन्तेसं वत्सरावधि पाद्मे जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च तुलस्यागस्त्यबिल्वं च न वर्ज्यं जाह्नवीजलं स्मृतिमालायां न पर्युषितदोषः

नतहवसिष्ठः अन्यशेषंपर्युषितंवर्ज्येयत्नकर्मणाः अर्पितानिचपुष्पाणिनैवपर्युषितानिवै नारदीये सर्वेभ्यश्चैवपत्रेभ्योबिल्वपत्रंविशिष्यते दिनेदिनेतुदात्तमंशोधपि
त्वापुनःपुनः सस्रणत्रमतिक्रम्यतिर्मोल्यत्वंप्रपद्यते पाद्मे चूतीलक्तान्यपिप्रशस्ताः बिल्वपत्राणिवैदकाः संयापयत्नयेत्वीशंनवालाभेविचक्षणः पुष्पपर्युषितालाभेअर्पितान्य
पिशस्याणि तदुक्तंस्कान्दे अर्पितान्यपिबिल्वानिप्रक्षाल्यचपुनःपुनः शंकरायार्पणीयानिननवानियदिक्वचित् देविनेंबिल्वपत्रंचयाऽशंताऽशंगेशिवे प्रत्यहंनियमेनेनिप्राक्
जीवालशाखिनः इदंस्यदेवीतोयपत्लामेवेदितव्यं अर्थोदेवन्नवैःपुष्पैःसंवृतैःपुरातोन्वितैः वामपत्रेस्थितोब्रह्मायस्यनाभस्ततोहरिः मध्यपत्रेस्थितोरुद्रःसाम्बःसंसारमोचकः प
श्चभागेस्थितायस्मात्सर्वभक्तानानिषेधकाः इन्द्रस्योलोकपालाद्यानाग्येपालिकीर्तिताः पूर्वभागेस्मृतंसत्वंदेवैर्बुल्लादिभिःपुरा अतोवैपूर्वभागेनपूजयेद्भूरिजायते वारुणेपुष्पंवायोमुखं
नैर्ऋत्यंतुलसीबिल्ववर्जितं तस्माद्बाधोमुखंदेयंबिल्वपत्रंवशंकरे स्कान्देपिपुष्पमूर्ध्वमुखंयोज्यंपत्रंयोज्यंत्वधोमुखं फलंतुसंमुखंयोज्यंयथोत्पन्नंतथार्पयेत् लैङ्गे मणिमुक्ताप्रवाले
स्तुरत्नैरप्यर्चितंभवेत् नगृह्णातिविनादेविबिल्वपत्रैर्वरानने बिल्वपत्रसंख्योक्ताव्यायवीयसंहितायां श्रीपत्रोत्पलपद्मानांसंख्यासाहस्रकीमता श्रत्येकमपरासंख्याशतमष्टोत्त
रंद्विज पुष्पांतरेननियमोयथालाभंनिवेदयेत् शिवरहस्येरूपदीपोपहारादेरभावेपिद्विजोत्तम सांगंबिल्वदलैरेवमविष्यतिशिवार्चनं बिल्वपत्राण्यमस्तुभवत्येवनसर्वथा
स्फुटानीतैःकपर्कीतैःबिल्वपत्रैःपूजनंनकार्यं तदुक्तंलैङ्गे स्फुटानीतैःकपर्द्दीतैः बिल्वपत्रैर्महार्चनं यःकरोतिसमूढात्मारौरवंनरकंव्रजेत् शिवरहस्येपि बिल्वपत्रैर्महादेवंस्वा
स्थैरेवकोमलैः यःपूजयतियत्नेनपरंप्राप्नोतिशंकरं अथलक्षपूजाभविष्ये शिवउवाच अथपार्वतिवक्ष्यामिलक्षबिल्वदलार्चनं शिवप्रीतिकरंनराणांशिवभक्तिविवर्द्धनं
श्रावणेकार्तिकेवायमाघेवैशाखएववा दिनेदिनेसहस्रंतुअर्पयेच्छीरलानिच समाप्तौव्रतसिध्यर्थंकुर्यादुद्यापनंसुधीः शुभेदिनेशुभक्षेचशुभवासरकेतथा आचार्यंवरये
च्छान्तंशिवधर्मपरायणं स्वगृह्योक्तविधानेनदेवंपुःस्वस्तिवाचनं श्रीहस्तलुसवर्णस्यकर्त्तव्योविहमानतः तस्यमूर्त्तेत्वयापुतंमोंचसंपूजयेत्सुरा रात्रौजागरणंकुर्याद्गी

नवाद्यैः प्रयत्नतः प्रभाते स्थण्डिले लिंगं कुर्यात्कुर्याद्ग्निमुखं तथा आधारौ तं प्रकुर्वीत स्वस्वगृह्यविधानतः बिल्ववृक्षसमुद्भूतैः समिधैः घृतसंयुतैः षट्सहस्रेण कर्तव्यो होमस्तुग्र
हसंयुतः दशांशेनानुदशांशेन तर्पणं कारयेच्छुभं तर्पणस्य दशांशेन होमं कुर्याद्द्विजोत्तमः होमस्यानुदशांशेन ब्राह्मणान्भोजयेत्सुधीः सवत्सां कपिलां दद्यादाचार्याय सदक्षिणां श्री
वृक्षसहितं देवं दद्याद्गुरवे तथा इति लक्षबिल्वपूजा ॰ अथ पुष्पाणि सिद्धान्तशेखरे श्वेतं रक्तं तथा पीतं कृष्णं चेति चतुर्विधं सात्त्विकं राजसं मिश्रं तामसं च तथाक्रमं पुण्डरीकं
अंवकार्कं मंदारं द्रोणपुष्पकं नंद्यावर्तं भ्रमावर्तं पुन्नागं च कर्णिका मल्लिका मालतीपुष्पं बकुलं शतकर्णिका कुरवं बंधुपुष्पं च द्विकर्णी शंखपुष्पिका लक्ष्मीपुष्पं महापद्ममहा
द्रोणं करवकं मरुजा तुलसीपुष्पं विषकांसीसपुष्पकं कदलीकुशपुष्पं च श्वेता चागिरिकर्णिका करवीरं सितलोध्रं सात्त्विकानि विनिर्दिशेत् रक्तांबुं करवीरं च पाटली हृहनोसिता
रक्तोत्पलं सधत्तूरं माषाहुंपटिका तथा अशोकं रक्तमंदारं रक्तागस्त्यं च मोलली रक्तार्कं वेजिका आद्वीकेतकं भूमिपाटली लक्षणा रक्तपुष्पाणि राजसानि विचक्षते चंपकं हेमधत्तू
रं शेफालिकं कर्णिकारकं मुशल्ली नगरं गुल्यं कोरंटं शंखिनी तथा कुसुमं हेमवर्णं निमिश्राणीति विनिर्दिशेत् शिरीषं गिरिकर्णी च वैष्णवी सेवमालिका कृष्णं नीलोत्पलादन्यं तामसं
पुष्पमीरितं मोक्षदं सात्त्विकं पुष्पं राजसं श्रीप्रदं मतं सिद्धिदं पद्मं मिश्रं तामसं पुष्टिवर्द्धनं सुरभीणि च सर्वाणि स्थलजान्युदकान्यपि गन्धानि पुष्पाणि देवि यो मे भक्त्या निवेदयेत् सोऽपु
राणे आरण्यसंभवैः पुष्पैः पत्रैर्वा गिरिसंभवैः अपर्युषितनिश्छिद्रैः रक्तैर्जंतुवर्जितैः आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवं आरोपितार्कपुष्पनिषेधो रक्तोत्पलकर्णिकारम
णिरक्तविषयः रक्तोत्पलैः कर्णिकारैः यः करोति ममार्चनं स भाग्यवानसौ तु स्यो बुधमस्याप्यय कृतमः निगदितो न यो विधानात् केचित्तु कर्णिकारविधायकवचनं शुभकर्णिकारविष
यमित्याहुः तत्र द्विविधैः कर्णिकारैः प्रपूजयेत्सा वरानने इति नारदीये द्विविधस्यापि विधानात् स्वार्थेनैव पूजनं कार्यं तदुक्तं शिवरहस्ये स्वयमुत्पाद्य पुष्पाणि यः स्वयं पूजयेच्छिवं
तानि साक्षात्प्रगृह्णाति देवदेवो महेश्वरः स्वारामसंभवं श्रेष्ठं मध्यमं विपिनोद्भवं विक्रीतमधमं पुष्पं पत्रं च पूजने स्मृतं नरेपि समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् शूद्र

नीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः स्वयमाहृतेष्विति नियमविधिः चौर्यवर्जनवत् अयं नियमो द्विजातीनामेव न तु स्त्रीशूद्राणां श्रोत्रियपरोपात्तत्वात् यत्तु धर्मार्जितधनक्रीतैः
पुष्पैः कुर्यात्सुरार्चनं उद्धरिष्यत्यसंदेहः सप्तपूर्वांस्तथा परान् इति तदपि स्त्रीशूद्रपरं छेदनं पत्रपुष्पाणां स्त्रीभिः शूद्रजैस्तथा न कार्यं सर्वथा राजन्निमाह भगवान्मनुरिति स्मृतेः अ
स्वार्थे क्रोडत्वाद्यपि आहरेत् तदुक्तं कूर्मपुराणे गृहीतव्यानि पुष्पाणि देवार्चनविधौ द्विजः अस्वामिमोऽथवा स्वेवमोगार्थे न कदाचन देवतार्थं स्वतं पुष्पमस्तेयं मनुरब्रवीत् याचितैः पत्र
पुष्पाद्यैर्यः करोति सुरार्चनं वृथा भवति सा पूजा तत्परोधीर्भवेत्ततः स्मृतः देवोपरि धृतं यच्च वामहस्ते धृतं च यत् अधोवस्त्रधृतं यच्च जलान्तः क्षालितं च यत् देवतास्तन्मवद्भं च पुष्पं निर्मा
ल्यतां व्रजेत् समित्पुष्पकुशादीनि वह्नं तन्नाभिवादयेत् तद्धारी चैव नाम्भाक्तिनिर्माल्यं न भवेत्तयोः तुलसीबिल्वपत्राणां नोक्ता निर्माल्यता बुधैः तथा च बिल्वापामार्गजातीतुलसि
शमिशताकेतकीभृंगदूर्वामंदारमोजदर्भोशविज्ञानजिल्वचूलकल्हारमल्लीः चंपाश्वारितिकुम्भारमनकमरुवकाबिल्वतोहानि त्रिंशत्त्रिंशत्कार्यरत्नमोदधिवसुभूभूयमाभूपयव
अस्यार्थः बिल्वतः बिल्वादारभ्य मरुवकांतं चतुर्विंशत्यत्र पुष्पाणि क्रमेणाउक्तसंख्याकान्यहानि पर्युषितानि न भवंति तथाहि बिल्वः त्रिंशत ३० अपामार्ग त्रिंशत् ३० जातीः त्रि ३
तुलसी पक्ष १ शमिः अरि६शताशतावरी रात्रि केतकी उदधी ७ भृंगराजनिधिदूर्वावसु ८ मंदारभू १ अंभोजंभू १ दर्भः यम २ भूयः पुनरपि मुनिः अगस्तिः त्रिंशत् ३० नग
रत्नत्रिंशत् ३० तिल ३ चूलः पलाश १ कल्हारं अरि ६ मल्लीरष्टिचंपा ७ अश्वत्थनिधि ९ अरातिवसु ८ कुम्भाभू १ दमनकभू १ मरुवकयम २ स्कान्दे संहृतैरत्यकुसुमैः
पूजनीयो महेश्वरः अंतहीनैः पूजनीयो हरितैः कुसुमैः शिवः अलाभे तु सुपुष्पाणां पत्राण्यपि निवेदयेत् पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् फलानामप्यलाभे तु त
णदूर्वांकुरैस्तथा तृणादिनामलाभे तु नमस्कारः प्रशस्यते केदारखण्डे जातीपुष्पं मल्लिकायाश्च पुष्पं पुष्पं बुष्पं चैवं मोगरं जातिपुष्पं तथा पुष्पं कुरंजकं गोकर्णं कौसुम्भकं वा
रिंगंडकवर्ती यत्तान्येव च पुष्पाणि मध्याह्ने लिंगपूजने विष्णुदानि मयोक्तानि सायाह्ने कथयाम्यहं रत्नमोगरकाश्चैव पवित्राणि विशेषतः करवीरं चार्कपुष्पं हहती पुष्पमेव च

धत्तूरकुसुमं चैव शतपत्रं तथैव च अगरुं च पुन्नागं बकुलं नागकेसरं पद्मोत्पलं कह्लारं च मंदारं कुसुमं तथा बहूनि वारिजान्येव कमलानि बहून्यपि त्रिकाले च पवित्राणि ज्ञेयानि स
ततं बुधैः चंपकानि त्रिकाले च पवित्राणि न संशयः यत्तु कनकानि कह्लाराणि रात्रौ देयानि शंकरं इति पाद्मे धत्तूरकह्लारयोः रात्रावेव समर्पणमुक्तं तत्तु तयोः रात्रौ स्वतिप्राशस्त्यपरं न
तु दिने निषेधपरं धत्तूरपुष्पं च कह्लारपुष्पं रात्रौ प्रशस्तं महादेवपूजने इति कैलाससंहितावचनात् पुष्पाध्याये पद्ममालायाः द्विगुणं पुण्यं तदुक्तं लैंगे प्रसेकमुक्तपुष्पेण दशसौवर्णिकं फ
लं स्वभिन्नं तपशार्दूल तद्वद्द्विगुणं भवेत् नारदीये यस्य वृक्षस्य पुष्पाणि पत्राणि च फलानि च महादेवोपयुक्तानि सोपि याति परां गतिं नास्ति पापसमः शत्रुर्न च धर्मस
मः सखा नैव तस्मात्परो देवो न पुष्पं कनकादपि कनकेनार्चमानस्तु वरदो भवति प्रभुः पुष्पजातिविशेषेण भवेत्पुण्यमथोत्तरं धत्तूरकुसुमे नापि पूजितः शंकरः स्वयं दशानि प
रमं स्यात् न योगिनामपि दुर्लभं तपः शीलगुणाढ्याय वेदवेदांगगामिने दशदत्वा सुवर्णस्य फलं हि तदवाप्नुयात् अर्कपुष्पैः कृतां स्रजां यदि देवाय शंभवे अर्कपुष्पसहस्रेभ्यः
करवीरं प्रशस्यते करवीरस्य निर्माल्यता नास्ति तदुक्तं सिद्धांतशेखरे शिवागमेषु सर्वत्र प्रशस्तं करवीरकं तस्य मध्ये स्थितो देवो लिंगाकारः सपीठकं अर्पितं तत्र निर्माल्यं पुनः
प्रोक्ष्य शिवं यजेत् करवीरसहस्रेभ्यः शमीपुष्पं विशिष्यते शमीपुष्पसहस्रेभ्यो ह्येकं धत्तूरकं वरं धत्तूरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते बृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते
द्रोणपुष्पसहस्रेभ्यो ह्यपामार्गं विशिष्यते पुष्पप्रकरणेपि पुष्पस्यैकं दत्वा दशापामार्गस्य यत्फलं अपामार्गसहस्रेभ्यः श्रीमन्नीलोत्पलं वरं नीलोत्पलसहस्रेण यो मालां संप्रयच्छ
ति शिवाय विधिवत् कृत्वा तस्य पुण्यफलं शृणु कल्पकोटिसहस्राणि कल्पकोटिशतानि च वसेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः बृहती कुसुमैर्भक्त्या यो लिंगं समर्चयेत् ग
वामयुतदानस्य फलं प्राप्य शिवं व्रजेत् मल्लिकोत्पलपुष्पाणि नागपुन्नागचंपकैः अशोककृष्णैन मंदारकर्णिकारबकानि च करवीरार्कमंदारशमीनागकेसरं कुशाथ्यापामार्गकुमुदकह्लारं च
बकुलेपि पुष्पैरेतैर्यथालाभं पूजयेत्तु सदाशिवं करवीरसमा ज्ञेया जाती विजयपाटली श्वेतमंदारकुसुमं सितपद्मेन तत्समं नागचंपकपुन्नागाः धत्तूरकसमास्मृताः सनत्कुमारसं

हितायां चतुर्णां पुष्पजातीनां गंधमाघ्रातिशंकरः अर्कस्य करवीरस्य बिल्वस्य च बकस्य च बिल्वग्रहेणाबिल्वपुष्पंग्राह्यं चतुर्णां पुष्पजातीनामित्युक्तत्वात् सुवर्णनिष्कं पुष्पेनु स
र्वस्मिन्नेव कल्पने बकपुष्पं बिल्वपत्रादपिश्रेष्ठं तदुक्तं तत्रैव बिल्वपत्रसहस्रेण तु यत्त्नमे यत्फलं भवेत् बकपुष्पेण देवेश अस्मिन्नमरदेवे भवेत्फलमिति बकपुष्पं राजनिघंटे प्रसिद्धं बकः पाशु
पतः प्रोक्तः शिवाह्लादः प्रवरस्तथा वसुक अश्वशिवाकअश्वशिवेष्टः शिवसंमतः शिवबलीशिवापूचशाम्भवार्विसंमतः माषपावगोले इति प्रसिद्धः अथ वर्ज्यानि सौरपुराणे केश
कीटापविद्धानि शीर्णपर्युषितानि च स्वयंपतितपुष्पाणि त्यजेदुपहतानि च उपहतानि मलादिभिः उग्रगंधान्यगंधानि अम्लगंधीनि वर्जयेत् येरुपवित्रैरन्नपानवासोभिः कु
त्सितात्मभिः आनीतं नार्पयेच्छंभोः प्रमादादपि दोषकृत् शिवे कुंदमदंतीवृंदयूथीं धूत्तूरकेतकी जपार्कं त्रिसंध्ये द्वे सिंदूरकुटजानि च मालती कुसुमं रक्तं ह्यारिवध्यारिमजेत्
शिवे विवर्जितं पुष्पं प्रयत्नेन विवर्जयेत् मुकुलैर्नार्चयेदीशं पक्वैश्च नारद कलिकैर्नार्चयेद्देवं चंपकैर्जलजैर्विना अत्र कुंदनिषेधे माघमासव्यतिरिक्तमासेतरविषयः माघ
मासे कुंदपुष्पैरर्चयेत् सहस्रशिव मितिवायुपुराणोक्तविशेषवचनोविधानात् ज्येष्ठे कुंदैः पूजनीयः पार्वतीरमणः प्रभुरिति शिवरहस्यात् केतकीनिषेधोऽपि देवे नराज्ञौ कंटकानि कदं
बानीति कश्चित्पाठः तत्र केतकीनिषेधः सर्वदा तदुक्तं भविष्यत्सौरपुराणयोः केतकानि कदंबानि रात्रौ देयानि शंकरे दिवा शेषाणि देयानि दिवारात्रौ च मल्लिकेति प्रहरंतिष्ठते
जातिकरवीरमहर्निशं नार्पणीयं प्रयत्नेन दमनं शिवरूपयोः दमननिषेधस्तु चैत्रमासेतरविषयः चैत्रे दमनकैः शुद्धैः पूजनीयः स्मरांतकः इति शिवरहस्यात् सिद्धांतशेखरे
पुराणपुरोदमनाभिधानाक्रोधादभूद्भैरवउग्ररूपः महाबलस्तेन समस्तदेवानां तापमभूदुद्दिताश्च सर्वे प्रीतेन देवेन सरासउक्तो भूमोभवत्वं विदग्योर्चनीयो ममामराणां च मनो
ज्ञमस्मत्समुत्थितो सौरमनाभिधानः येमानवा ह्यमनकेन पूजां मोहात्करिष्यंति न चैत्रमासे तेषां त्रमासोत्थशिवाद्देवदेवपूजाफलं तेरमनात्तु नेष्यामिति पुष्पाणामप्यलाभे तु बिल्व
पत्रैः समर्चयेत् कार्तिके सोमवारे विशेषतो धत्तूरकुसुमेन पूजा कार्या तदुक्तं शिवरहस्ये यत्कं चापरिधत्तूरकं कार्तिके सोमवासरे यः शंधारयिप्रीत्या मापितौ तो भविष्यति अत्र केचि

श्रीसिलिं.चं.
२८

दाहुः सर्वेषु पुष्पनिषेधावसंतेतरविषयाः वसंते तु ऋतौ प्राप्ते सर्वैः पुष्पैः मनोरमैः पूजिते तु महादेवे अश्वमेधफलं भवेदिति तत्र सर्वेषां विधानात् वस्तुतो निषेधाः तिलपूजाविषयाः
कामनापुरस्कृतेन वचनेन तत्पंचितत्वाद्धाः किंच सुरभीणि च सर्वाणि स्यादेः सर्वपरं निषिद्धेतरविषयं तथैवारव्यं पुष्पसमर्पणप्रकारश्चोक्तः प्रयोगपारिजाते क्रियासारे मध्यमानामि
कामध्ये पुष्पं संगृह्य पूजयेत् अंगुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् पुष्पाहरणकालोपि तत्रैव दर्शितः समित्पुष्पकुशादीनां द्वितीयः प्रहरो मत इति विष्णुरहस्ये स्नानं कृत्वा तु
ये केचित्पुष्पं चिन्वंति कुर्वीयः देवतास्तं न गृह्णंति न नापि पितरस्तथेति स्नानं मध्याह्निकं अस्नात्वा तुलसीं छित्वा पुष्पाणि विविधानि च अस्नात्वा कुरुते संध्यां विप्रश्चण्डाल उच्यते इति
मरीचिना प्रातःस्नानं विना पुष्पाहरणस्य निषिद्धत्वात् अथ ऋतुभेदेन पुष्पभेदमाह शिवरहस्ये पलाशपुष्पैर्यः कुर्याद्वसंते शंकरार्चनं देवेंद्रत्वमवाप्नोति स्वर्गे शक्राभिलाषुकः
ग्रीष्मे तु मल्लिकापुष्पैर्यः कुर्याच्छंकरार्चनं बृहस्पत्वं समवाप्नोति बृहस्पत्वं पदं वांछति वर्षा तौ कुशपुष्पैर्यः पूजयिष्यति शंकरं स विष्णुत्वमवाप्नोति पदं विष्णुत्वमिच्छति शरत्काले
महादेवं यः पद्मैः पूजयिष्यति स सूर्यत्वमवाप्नोति परं सूर्यत्वमिच्छति अर्कपुष्पैर्महादेवं हेमंते योर्चयिष्यति स चंद्रत्वमवाप्नोति पदं चंद्रत्वमिच्छति शिशिरे करवीरैर्यः पूजयिष्यति
शंकरं गाणपत्यमवाप्नोति गाणपत्याभिलाषुकः अथ मासभेदेन पुष्पभेदे न पुष्पभेदमाह तत्रैव द्रोणपुष्पैः पूजनीयः कार्तिके मासि शंकरः अर्कपुष्पैः पूजनीयो मार्गशीर्षे प्रय
त्नतः पुष्ये पुनर्वसुपुष्पैः पूजनीयः सदाशिवः माघे धत्तूरकुसुमैः पूजनीयोऽध्वरः प्रभुः वैशाखे मल्लिकापुष्पैः पूजनीयस्त्रिशूलभृत् ज्येष्ठे कुंदैः पूजनीयः पार्वतीरमणः प्रभुः
आषाढे विरजापुष्पैः पूजनीयः पिनाकधृक् श्रावणे कुरजैः शम्भुः पूजनीयः प्रयत्नतः प्रोष्ठपदे मासि कुशपुष्पैस्त्रिलोचनः आश्विने मासि संपूज्यः पारिजातैरुमापतिः
कार्तिके मनकैः शुद्धैः पूजनीयः स्मरांतकः द्विविधं करवीरं वै रक्तश्वेतो विभेदतः उन्मत्तकोपि द्विविधः श्वेतकृष्णप्रभेदतः पुष्पिका द्विविधा ज्ञेया नगरार्द्धविपर्ययात् केतकी त्रिवि
धा ज्ञेया कुंदो वै द्विविधः स्मृतः वकमेकविधं ज्ञेयं जपा चैव चतुर्विधा सोऽपि द्विविधा ज्ञेयाः पूर्वं चैव चतुर्विधं रजनी द्विविधा ज्ञेया नद्येव तु लसी स्मृता कमलं द्विविधं ज्ञेयं जलजं स्थल

जेंतथा एवंवर्णविभेदेन पूजयेत्सार्वनीयर्ति अथपुष्पैकफलं बकेनवरदोदेवः करवीरैर्धनप्रदः अर्कैरारोग्यमवाप्नोति मोक्षं धत्तूरकेणच नीलोत्पलैर्भवेद्योगः सर्वदासु
खभाक्तथा रक्तोत्पलैकेसरदामकैः मंत्रसिद्धिमवाप्नोति इहस्यागुरुस्य पुष्पकैः योर्चयेत्परमेशानं सोनार्के राजतेथैवच सर्वान्कामानवाप्नोति योर्चयेद्गंधपुष्पकैः कुब्जकैर्विपुलो
लाभः सौभाग्यायचवाहल्ली कन्याकामोजातिभिश्च योर्चयेत्परमेश्वरं सलभेत्तोत्रसौम्यांषराम्यासेन नसंशयः मल्लिकाज्ञानकामार्थमर्चयेत्तु महेश्वरम् लभतेपरमं
ज्ञानं संसारभयनाशनं पुत्रकामोथकुंदैस्तु अर्चयेतं शुचिर्नरः भजेतबहुपुत्रत्वं धनवंतं चिरायुषं आरोग्यं कुशपुष्पैस्तु अशोकैः प्रियसंगमं कर्णिकारैर्धनं विद्याद्वश्या
र्थं द्रोणपुष्पिका करवीरेणार्चयेल्लिंगं संततं निपतव्रतः शत्रूणांवशकामायति स्वमेवप्रणपयेत् नश्यंति व्याधयस्तस्य योर्चयेद्दिनमुल्लकैः सिंदुवारस्य पुष्पेणावद्धमुच्येत
बंधनात् विजयार्थंदमनकैर्योर्चयेद्विधिवद्भ्रमेस्थितः विचित्राः शत्रवस्तेन षण्मासे न नसंशयः तिलक्रोधनकामाय गोकामाय चवंजुलैः सौरभ्यआपिनगरः शा
लः प्रियकरस्तथा कर्पूरदमनं दद्यात् शत्रूणांनाशनायच सदाणवारोग्यदंनित्यं जयायुष्यं तथैवच कुरंडकस्यवश्यार्थं पुष्पं देयं पिनाकिने विद्वेषेरायकाश्यामा
रद्यादेवे महेश्वरे श्रेतकीर्तुनाशायकुंदोलिंगं तु योर्चयेत् सर्वकामप्रदाचैव आब्रीदेवी प्रकीर्तिता वंशपुष्पार्यरीनेवचलमायुष्यवर्द्धते जयंतीजयकामाय
श्वेताचगिरिकर्णिका विद्वेषोच्चारनार्थायनवपुष्पेणयोर्चयेत् उरवीपुष्पेणद्रुजहंतिसर्वानुपद्रवान् बणायुष्यंच यप्रोक्तं व्याधिनाशायन भवेत् अक्रोट
सितवर्णानि निर्गंधकुसुमानिच नानाशत्रुविनाशाय देवदेवाय कल्पयेत् पीतकानिचपुष्पार्थं रक्तानि विजयायच सुश्वेतं कुसुमं दद्यात्सर्वकामार्थये नरैः आ
रोग्यनाचधनप्राप्तलक्ष्मीकामपरामरणस्मृता हस्त्यश्वपशुकामायकुर्यात्तेनार्चयेद्धरः गिरिकासुखदानित्यं तथाचापरं चंपकं दीपाक्षी व्याधिनाशार्थं मरुवकरात्तथैवच अ
थयोगविशेषेपुष्पविशेषोक्तः शिवरहस्ये भूतायां भंगराजेनयः पूजयति शंकरं सर्वपापविनिर्मुक्तः शिवलोकेमहीयते भूतायांसोमयुक्तायां करवीरैर्महेश्वरं यःप्र

जपनियत्नेन समो ऽस्य मधिगच्छति सोमार्द्रायानयुक्तायां मूलायां कमलैः शिवं यः पूजयति सोमेर्द्रायानयुक्तायां मघायां कनकद्वयैः यः पूजयति॰ सोमार्द्रायानयुक्तायां मघ
स्यामर्जुनैः शिवं यः पू॰ सोमार्द्रायानयुक्ताया ममायायां गिरिजापतिं करवीरैः समभ्यर्च्य सामुवंति शिवं जनाः स्कांदे अपामार्गदलैर्यस्तु पूजयेद्गिरिजापतिं सयाति शिवसा
युज्यं चतुर्दश्यां विशेषतः नारदीये तुलसीदलमात्रेण यः पूजयति शंकरं कुलैकविंशमुद्धृत्य शिवलोके महीयते वन्यपुष्पाणां प्राशस्त्यमुक्तं पाद्मे शिवगीतायां वनोद्भवाद्
श्रीप्रीतिर्वर्तते परमेष्ठिनः उत्तमेष्वपि नास्त्येव ग्रामजेष्वपि तादृशी अथ पत्रपुष्पपूजाविधिः स्कांदे मुनय ऊचुः यानि कानि च तीर्थानि पुण्यानि विविधानि च शिवकार्याणि
तत्सर्वं कथय स्वामप्रभो शिवात्मा नापरो लोके त्वत्तो नास्ति हि विद्यते कृपया वासुदेवस्य सर्वज्ञोसि महामते लोमश उवाच यथिमांयानितीर्थानि सागरांतानि वै प्रभो समहात्म्या
नि सर्वाणि कथितानि महात्मनां पुरा दत्तानीव नुमिच्छामि लक्षपूजां शिवस्य च स्कंदेनोक्तां पुरा विप्रा आगस्त्याय महात्मने तेनैव कथितां पूजां ममाग्रे लक्षपुष्पिकां तामप्यहं वदि
ष्यामि त्वत्पुरः श्रृणु द्विजोत्तमाः यद्द्रव्योपभुक्तेमुख्यं शंकरायन दर्शयेत् साङ्गेवावकृत्वेनापि विद्यालक्षपुष्पिकां एकैकं मूलमंत्रेण हृद्यमंत्रेण वा पुनः षडायुधसत्केन हृद्याध्यायेन
वा पुनः अर्चयेमार्चनीनार्चेनमोहृद्दायवाजयेत् अनेनैव प्रकारेण लक्षपूजां समर्पयेत् मुनय ऊचुः यानि कानि च पुष्पाणि विहितानि शिवार्चने तानि सर्वाणि भो ब्रह्मन्
कथयस्व यथातथं लोमश उवाच ब्राह्मणं कर्णिकारं च करवीरं तिलस्य च बिल्वपत्रं च कह्लारमर्कमंदारमेव च मालतीचंपकं चैव तथा भोगरं कुसुमं कनकं शतपत्रं च करवीरं तथा शु
भं जातीपाटलकं चैव पुन्नागं च विशिष्यते नीलोत्पलं च रक्तं च कमलं पद्मसंज्ञकं कुरवं च कुसुमं च अशोकं बकुलं तथा पालाशं मुचकुंदं च तुलसी मल्लिका तथा एवमा
दीनि पुष्पाणि विशिष्टानि शिवार्चने एतेषां लक्षपूजां वै यः करोति नरोत्तमः शिवेन संकरं प्राप्य शिवेन सह मोदते श्रीकामो बिल्वपत्रैश्च शांतिकामस्तु दूर्वया आयुःका
मेन कर्तव्यमर्कपुष्पैर्विशिष्यते पुत्रकामेन कर्तव्यं चाहृतैः पूजनं महत् सर्वकामेन कर्तव्यं चंपकैर्नागकेसरैः बकुलैस्तिलपुन्नागैर्धनकामश्च पूजये दुःस्वप्ननाशना

र्याप कुर्यात्सो नेनपूजनं कल्हारैः कर्णिकारैश्च मंदारकुसुमैः शुभैः विप्राः कामेन कर्त्तव्यं शंकरस्य प्रपूजनं पलाशपाटलैश्च मंदारकुसुमैश्च करवीरैः पूजनं महत् महाव्या
धिविनाशार्थं कार्य्यमेतैः प्रपूजनं वशीकरणकामस्तु सौवीरैस्तोषयेच्छिवं तस्यापि वश्यं भवेद्ध्रुवं मत्रकार्या विचारणा देवदानवगन्धर्वा वशीभवन्ति नान्यथा श्रीकामेन
तु कर्त्तव्यं धत्तूरैः पूजनं महत् उत्तमां श्रियमाप्नोति प्रसादाच्छंकरस्य च एवं सर्वैश्च पुष्पैश्च सर्वकामार्थसिद्धये पूजयेत्पार्वतीनाथं भक्तियुक्तेन चेतसा यं यं चिंतयते कामं तं तं
प्राप्नोति निश्चितं दिने दिने सहस्रं तु ग्रथयेत्कुसुमानि च अथ चोद्यापनं वक्ष्ये पूजापूर्णफलाप्तये व्रतमध्ये व्रतान्ते सर्वमुद्यापनं विना द्विजाः आरभ्य वा त्वरणान्सर्वान् सुमुहूर्त्तेन शु
भे दिने पश्चोद्यापनं कुर्यात्समण्डपं तत्र कारयेत् पुष्पमालान्वितं कुर्यान्नानावस्त्रसमन्वितं आदर्शैर्भूषयेत्सम्यक् तत्र वेदीं प्रकल्पयेत् गीतवादित्रनिर्घोषैर्वेदघोषैः समन्वितः प्र
विश्य मंडपे तस्मिन्नाचार्येण द्विजैः सह पुण्याहं वाचयेत्सम्यगाचार्यं वरयेत्ततः ऋत्विजोप्यथ वृत्वा वै षोडशाष्टौ शुभाननान् चतुरो वापि संपूज्य वस्त्रालंकारभूषणैः आचार्य
द्गुरोरर्च्यस्य यथा विफलं भवेत् वेदिकायां तु कर्त्तव्यं सर्वतोभद्रसंज्ञकं मण्डलं स्वस्तिकं वापि लिंगतोभद्रमेव वा तन्मध्ये विधिवद्धि प्रास्तंडिलैः प्रस्थमात्रकैः कैलासं रचयेत्सम्य
ग्वैकुंठं तस्य दक्षिणे मुहूर्त्ते तु शुभे भित्तं कुर्यात्तस्मल्लोकं तु वामतः गोधूमैश्चापि कुर्वीत कलशान्स्थापयेत्ततः अव्रणानपि तथा शुद्धान्वृणान्स्वर्णजानथ रौप्यताम्रमयान्वापि
मार्त्तिकान्वा सुशोभनान् अकालचिह्नितान्दक्षान्भाजनैः पिहिताननान् पंचपल्लवसंयुक्तान्संचरत्नसमन्वितान् वस्त्रयुग्मेन संवेष्ट्य कैलासं पुस्तकेन वा वैकुंठं पी
तयुग्मेन रक्तयुग्मेन सत्यकं कलशानपि तद्वत्संवेष्ट्य भाजनेषु च सौवर्णी प्रतिमा कार्या देवादीनां क्रमेण च शिवं वा विष्णुपत्नीं सावित्रीं ब्रह्मणोस्तथा तद्वाहना
श्च कर्त्तव्या गजन्सः प्रतिमास्तथा स्थापयेत्प्रतिमास्तत्र भाजनेषु समाहितः तत्र लिंगतोभद्रे वै मंत्रैः षोडशोपचारकैः पूजयेत्तत्र देवेशं पार्वतीसहितं तथा लक्ष्म्या विष्णुं
च सावित्र्या ब्रह्माणं पूजयेत्ततः दुर्गां गणपतिं चैव भैरवं स्कंदमेव च नैवेद्यैर्विविधाकारैर्भक्ष्यभोज्यसमन्वितैः फलैः पुष्पैश्च धूपैश्च दीपैः कर्पूरसंभवैः उपोष्य तद्दिने रात्रौ

जागरं चैव कारयेत् वेदवादित्रनिर्घोषैः पुराणश्रवणेन च स्तोत्रपाठैस्तुवन्तं तं लिङ्गं शं प्रकामयेत्सुधीः ततः प्रभातसमये विधिवत्स्नानमाचरेत् स्थण्डिलं कारयेत्तत्र स्वशाखो
क्तविधानतः हवनं प्रणवमन्त्रेण कुर्याद्धोमं ततः मृत्युञ्जयमन्त्रेण शक्तिनाम्नापि मन्त्रतः तत्तल्लिङ्गोक्तदेवेभ्यो वेदोक्तैर्वा दुर्गादीनामपि प्रभुः रुद्रादिलोकपालानां पयसैस्तु सशर्क
रैः तिलाज्येनापि वा कुर्यात्सहस्रं चाष्टोत्तरं शतं प्रतिदेवं प्रकर्तव्यमष्टाविंशतिसंख्यया दुर्गादीनां च कर्तव्यमिन्द्रादीनष्टसंख्यया समाप्य विधिवद्धोममाचार्यं पूजयेत्ततः उष्णीषकं
चुकी वस्त्रप्रावारैर्भूषणैस्तथा शय्यासनविचित्रैश्च कुण्डलाङ्गुलिकैस्तथा तथोपानद्युगं चैव लाङ्गलान्कलशांस्तथा प्रदद्याद्दक्षिणां चैव वित्तशाठ्यविवर्जितः गां च पयस्विनीं
दद्यात्सवत्सां सोपस्करां तथा सवत्सां स्वर्णशृङ्गां वस्त्राच्छादितां सुशीलिनीं कांस्यदोहां रौप्यखुरां चामरसंयुतां तस्य पत्नीमपि संपूज्य वस्त्रालंकारभूषणैः तथैव वाचकं प्र
पूज्य जापकांस्तथा ऋत्विजश्च तथाभ्यर्च्य यथाशक्त्या च दक्षिणां दद्यात्तेभ्योऽपि कल्पशास्त्रोक्तां तद्दक्षिणां गोभूहिरण्यवस्त्राद्यैर्यथाविभवसारतः तोषयेद्ब्राह्मणां
स्तत्र यथाविधि फलं भवेत् अभिषेकं ततः कुर्याद्धिरण्मयदेवतायाः प्रतिमादिकं तत्सर्वमाचार्याय निवेदयेत् ततः शिवालयं गत्वा सभार्यो ब्राह्मणैः सह संपूज्य विधिवद्
देवं यथाविभवसारतः स्वर्णपुष्पैश्च पुष्पैश्च बिल्वपत्रैर्विशिष्यते वस्त्रयुग्मैः समभ्यर्च्य वित्तान्नैश्चैव दापयेत् यद्यद्द्रव्यमयापूजा लक्षाण्यानुकृता भवेत् तदाकारं सुवर्णेन
कृत्वा विप्राय चार्पयेत् देवाय चन्दनं तेन तु मोदं चैवाम्नायथा भवेत् प्रदक्षिणानमस्कारान्कृत्वाञ्जलिपुटस्तथा क्षमापयेन्महादेवं मन्त्रेणानेन साधकः महादेव जगन्नाथ
भक्तानां फलदायक त्वमस्मात्सादरं मां पूजां यथावल्लभवानहं सानुसंपूर्णां तां यान्तु शीघ्रं कामप्रदो भव अनेनैव विधानेन लक्षपूजां करोति यः पुत्रान्पौत्रांश्च संप्राप्यत
यानेमोक्षमाप्नुयात् कथां शृणोति यो भक्त्या पठते चैव यो नरः स तत्फलमवाप्नोति शिवेन सह मोदते पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं कामार्थी काममाप्नोति धर्मा
र्थी धर्ममाप्नुयात् विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् भोगान्भुक्त्वा तु विपुलानिह जन्मनि साधुभिः स स्वर्गं याति विपुलं मन्ये स्वर्गं च विन्दति इति लिङ्गपुराणोक्ताल

स्नानविधिः समाप्तः ० अथ गन्धः लिंगस्य लेपनं कुर्याद्व्यागन्धैर्मनोरमैः वर्षकोटिशतं दिव्यं शिवलोके महीयते सौरपुराणे सुगंधलेपनात्पुण्यं द्विगुणं चंदनस्य च चंदना
द्गुरोर्ज्ञेयं पुण्यमष्टगुणाधिकं कृष्णागुरोर्विशेषेण द्विगुणं फलमिष्यते तस्माच्छतगुणं पुण्यं कुंकुमस्य विधीयते स्कान्देपि चंदनागरुकर्पूरनाभिरोचनकुंकुमैः लिंगमेतैः समालि
प्य गाणपत्यमवाप्नुयात् सनत्कुमारसंहितायां बिल्वकाष्ठसमुद्भूतं चंदनं यः समर्पयेत् शिवाय देवदेवाय गाणपत्यपदं लभेत् सिद्धान्तशेखरे कर्पूरं कुंकुमं पत्रं त्रिफलं चंदनं ख
गंडशीरं लोहमिश्रितैरेतैर्नवभिर्गंध उच्यते चंदनोशीरकर्पूरचंदनं त्वगंफलत्रयं एतैर्मध्यकनिष्ठस्तु कर्पूरं सह चंदनं हिमं द्रव्यं प्रतिपलं श्रेष्ठं तदर्धं मध्यमं मतं तदर्द्धमधमं ज्ञेयं यथालाभम
लाभतः इति अनुलेपप्रमाणं लैंगे अनुलिंपेच्च लिंगं तु पंचविंशत्पलेन चेति अथाक्षताः शिवरहस्ये अर्चयिष्यंति ये नित्यमक्षतैः शालितंदुलैः तमर्चयन्तु मिच्छामि प्र
तिज्ञेयं मम प्रिये यस्तु नित्यं तिलैः कृष्णैः श्वेतैर्वा पूजयिष्यति तमूर्द्ध्वं यवैर्यैः सततं भक्त्या पूजयिष्यति मामजं तमूर्ध्वं गोधूमैश्चणकैर्माषैर्यो मामभ्यर्चयिष्यति तमूर्ध्वं अ
सितैर्वा सितैर्वा मांसिद्धार्थैर्योर्चयिष्यति तमूर्ध्वं० नीवारतंदुलैः साग्येर्यो मामभ्यर्चये० तमूर्ध्वं श्यामाकतंदुलैर्नित्यं यो मामभ्यः तमूर्ध्वं प्रियंगुतंदुलैर्नित्यं योः तमूर्ध्वं तंदुला
यवगोधूममाषतिलमाषाश्च मुद्गकाः एतेषां लक्षपूजां वै करोति सततं नरः तेषां चैव फलानीह वक्तुं कोपि न पारयेत् इति धूपनं च कर्तव्यं पुष्पोपायनवत्तरः अथ धूपः वायवीयसंहि
तायां चंदनागरुकर्पूरकोष्ठगुग्गुलचूर्णकः घृतेन मधुना चैव सिद्धो धूपः प्रशस्यते भविष्योत्तरपुराणे गुग्गुलं घृतसंयुक्तं शिवाय च निवेदयेत् रुद्रलोकमवाप्नोति गाणपत्यं
च विन्दति सौरपुराणे गुग्गुलं घृतसंयुक्तं साक्षात्कृत्वा निशाकरः गोमूत्रात् गुग्गुलुर्जातः सुगंधिः प्रियदर्शनः स धूपः सर्वदेवानां शिवस्य च विशेषतः सनत्कुमारसंहितायां अगरुं
शतसहस्रं च यस्त्वहस्त्वं तु चंदनं च तु दशसहस्राणि धूपः कालागरुः स्मृतः अनंतो गुग्गुलश्चैव सहाजेन पुनः कृतः दशसहस्रं पलानां तु महिषाख्यस्य योदहेत् देवि संवत्सरं
गोशो मनं सी समो भवेत् लैंगे कृष्णागरुः सकर्पूरं धूपं दद्याच्छिवाय वै नैरंतर्येण मासार्द्धं तस्य पुण्यमनंतकं अथ दीपः लैंगे कर्पूरवर्तिदीपेन सकृद्दत्तेन भक्तितः कर्पूरदेह

 गौरश्रीर्भवेभालविलोचनः वायवीसंहितायां कपिलासंभवेनैव घृतेनातिसुगंधिना नित्यं प्रदीपिता दीपाः शस्ताः शंकरपूजने शस्तात्वेनेन कपिलासंभवघृतदीपस्य

 प्राशस्त्यबोधनात्कपिलाव्यतिरिक्तगवाघृतेनापि दीपाः कार्याः भविष्ये घृतदीपप्रदानेन शिवाय पशतयोजनं विमानं लभते दिव्यं सूर्यकोटिसमप्रभमिति घृताभावे तिलतैलेना
पिकायाः तदुक्तं स्कांदे घृतदीपः प्रकर्तव्यो ह्यभावे शिवमंदिरे तिलतैलेन वा कार्यो दारिद्र्याद्विपश्चितेति अतसीतैलेन वा कार्यः तदुक्तं नागरखंडे अतसीतैलयुक्ता ये दीपास्त्राः
शिवालये तत्रापरे वै दशापरैस्तैः समेताः शिवालये वसंतीति शेषः कौसुंभतैलेनापि कार्यः तदुक्तं स्कांदे कुसुंभस्य च तैलेन दीपान्दत्त्वा शिवालये ज्ञानिनो हि भविष्यंति दीपदा नफले
नहि कार्त्तिक्यां शिवाग्रे दीपदानमतिप्रशस्तं तदुक्तं तत्रैव ये दीपमालां कुर्वंति कार्त्तिक्यां श्रद्धयान्विताः यावत्कालं प्रज्वलंति दीपास्ते लिंगमग्रतः तावद्युगसहस्राणि दाता स्वर्गे महीय
ते अथ जलानि स्कांदे नद्याः समुद्रगामिन्याः नदाद्वा स्वयमाहृतं वस्त्रपूतं च शीतं च विशिष्टं शिवपूजने काशीखंडे वस्त्रपूतेन तोयेन लिंगं स्नापयित्वा ममामराः लभ्याश्वमेधजं
नित्यं पुण्यं प्राप्नोति मानवः वर्ज्यानि तत्रैव शूद्रानीतं स्त्रियानीतं वा महत्वादन्तं त्यजेत् अन्यस्नानावशिष्टं च जलं त्याज्यं शिवार्चने वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलं अवर्ज्यं जाह्नवी
तोयं तुलसी बिल्वपद्मकं सिद्धांतशेखरे कलुषं कृमिसंमिश्रं मोरवरं पल्वलोत्थकं अशुद्धभूतलस्थं च शिलागतं जलं च त्यजेत् सदाच्छायापूतं ग्राह्यं ग्रामजातं निषेवितं इत्यादिदोषसंयु
क्तं वर्ज्यं तोयं शिवार्चने जलसंग्रहणं कुर्याद्दिवा रात्रौ न चैव हि अथ नैवेद्यं सौरपुराणे शालितंदुलप्रस्थेन कुर्यादन्नं सुसंस्कृतं नानाव्यंजनसंयुक्तं शिवलोके महीयते गुडखंडघृतानां
च भक्षणं च निवेदनात् घृतेन याचितानां तु रत्नाशनगुणं भवेत् स्कांदे मातुलिंगफलादीनि सुपक्वानि निवेदयेत् शिवाय तत्फलं तस्य पंचसप्तानि निवेदयेत् एकं मोचफलं पक्वं
पं शिवाय निवेदयेत् सर्वभक्ष्ये महाभोगैः शिवलोके महीयते मोचफलं कदलीफलं वायवसंहितायां हविश्च षड्विधं देयं शुद्धं शुद्धान्नमेव च पायसं दधिसंमिश्रं गौडं च मधुसंस्कृतं
पतेभ्यो कमनेकं वा नानाव्यंजनसंयुतं गुडखंडान्वितं दध्ना मथितं दधि शोभनं भक्ष्याणि अपूपाण्यतिस्वादुमूलानि फलानि च यावंतस्तंडुलास्तस्मिन्नैवेद्ये संति संख्यया तावद्वर्षसहस्रा

णि शिवलोके महीयते घृतादिनैरिदने स्थनं पुरबाहारसंमितं आढकेन प्रस्थं महानैवेद्यं कुर्यात् महानैवेद्यलक्षणमुक्तं विधेश्वरसंहितायां शालितंडुलभारेण मरीचप्रस्थकेन च प
वाप्यपरिशप्रस्थं मध्वाज्यं कुडवं तथा द्रोणमानेन मुद्गान्नं चारशाकं व्यंजनान्वितं सूतपक्वैरसैरपेक्ष्य मोदकैस्सलिलकादिभिः चारशैश्चक्षयोक्षीरं द्वादशप्रस्थकेन च नारिकेलफलानि स
हस्रशतसंख्यया चारशाक्रमकैर्युक्तं षट्त्रिंशत्पत्रकैर्युतं कर्पूरखदिरचूर्णेन यथं च गंधकैर्युतं तांबूलमेव कथितं महानैवेद्यलक्षणं तथापि शिवधर्मोत्तरे सदापि शिवस्य नैवेद्ये यावच्छिक्थानि
संख्यया तावद्वर्षसहस्राणि शिवपुरे वसेत् सूतस्य युक्तैः सिद्धैः पुष्पैः शतगुणोत्तरं उपदंशयुतैर्ज्ञेयं पुण्यं दशगुणोत्तरं बहुभेदेन नैवेद्ये सहस्रगुणितं फलं सुगंधशालिनैवेद्ये
विज्ञेयममृताधिकं कमलशालिनैवेद्ये दशलक्षाधिकं फलं एवं शालिविशेषेण फलं स्यादुत्तरोत्तरं घृतं व्यंजनयुक्तैर्भूपलक्षसमुदायमधिवर्द्धने व्यंजनानि विविधानि स्वादूनि सुरभी
णि च कोटिकोटिफलान्याहुः स्निग्धानि मधुराणि च क्षीरभक्तेन नैवेद्ये दशकोटिगुणाधिकं तथा फलविशेषैश्च स्वादुभिः कोटिसंमितं गुडखंडकैर्नैर्भक्ष्यैर्घृतस्नेहेन पाचितैः को
टिसहस्रगुणितं ज्ञेयं सुगंधिभिः माषप्रकारैर्विविधैर्भक्ष्यैर्घृतस्नेहेन पाचितैः कोटिसहस्रगुणितं ज्ञेयं सुगंधिभिः माषप्रकारैर्विविधैर्मधुरैर्घृतपाचितैः कोटिकोटिगुणं पुण्यं
शिवनैवेद्यकर्मणि इति नैवेद्यं अथ तांबूलं काशीखंडे मुखवासं ततो दद्यात् नैवेद्यमनुत्तमं संख्यासमुद्रतान्तो कर्पूरचिक्कणमिष्यते मुखवासादिदानस्य कः संख्याम
तुकारयेत् मुखवासं ताम्बूलमिति स्मर्यते मुखवासलक्षणं हेमाद्रौ रत्नकोशे महापिप्पलपत्राणि क्रमुकस्य फलानि च नालिकेरफलोपेतं मातुलिंगसमायुतं एलाकंकोलक
र्पूरैर्मुखवासं लक्षयते इति तांबूलं अथाभिषेकमंत्राश्चोक्ताः लैंगे मंत्राणि तेषु वक्ष्यामि स्नानसंबोधसिद्धये येलिंगं सकृदभ्यर्च्य वस्तामयमुच्यते मानवः पावमानेन मंत्रेण तु
पावामीयके न च रुद्रेण नीलरुद्रेण पुरुषेण शुभेन च शंभ्साचायपुनं शंसाभाहंडेन कूपर्द्दिना आपो राजेति साम्ना हृदेन विष्णुना पंचब्रह्ममयैश्चैव वक्ष्येवलं प्रणवेन
चेति सनत्कुमारसंहितायां केवलेनोदकेनैव स्नपनं मे भवेत्सुगंधोदकेन शतगुणं पंचगव्येन तेनाधिकं तस्मात्सहस्रगुणं क्षीरं सहस्रं कपिलं भवेत् ततः शतगुणं प्रोक्तं सर्पि

श्रीलिं-चं.
३२

बाल्लानमेवच कपिलासंभवेनैवसर्पिषास्नपयेच्चमां समाभिरेविनस्याहमपराधान्वलन्पि शिवधर्मोत्तरे दध्नः सर्वाणिजातानिमांगल्यान्यचलिह्वये घृतादमृतमुत्पन्नंमम
राणामतिप्रियं पयसासर्वलोकानांतृप्तिर्भवतिभ्वाश्वतिः नंदासुभद्रासुरभीसुशीलासुमनास्तथा गोमातरः स्थितामूर्मोस्नानार्थंवशिवस्यतु तस्माद्घृतेनपयसादध्नावस्ना
पयेच्छिवं नदनेचोष्णतोयेनकषायैश्चविलेपयेत् संस्नाप्यशीततोयेनस्येषस्नानविधिस्ततः शिवधर्मोत्तरे यःस्नापयतिदेवेशं शंखतोयेनमानवः सर्वपापविनिर्मुक्तः शि
वलोकेमहीयते यत्तुवर्ज्ययेच्छिवस्रजायां शंखतोयंविशेषतः अत्रतुल्यवलविरोधाद्विकल्पः केचित्तुगोशृंगेणाभिषेकंकुर्वंतितत्रमार्तंविंत्यं अभिषेकपात्राण्युक्तानिलैङ्गे सुव
र्णकलशेनाथतथावैराजतेनवा ताम्रेणपद्मपत्रेणपालाशेनदलेनव शंखेनमत्स्येनाथशोधितेनक्षुभेनच सकूर्चेनसपुष्पेणस्नापयेन्मंत्रपूर्वकमिति इत्यभिषेकः अ
थप्रदक्षिणासनत्कुमारसंहितायां प्रदक्षिणानमस्कारेसर्वाभीष्टप्रदावुभौ इज्यांतेचसदाकार्यौभोगमोक्षार्थिभिर्नरैः शिवरहस्ये शिवप्रदक्षिणात्पापंसर्वंनश्यतितत्क्षणा
त् अथसंशिवधर्मेषुप्रदक्षिणाभिनीरितं प्रदक्षिणाविनास्यंचपातकंनास्तिभूतले तस्मात्प्रदक्षिणेनैवसर्वंपापंविनाशयेत् शिवप्रदक्षिणेनैवसर्वाभीष्टंप्रसाधयेत् कूर्मपु
राणे प्रदक्षिणांद्विजःकुर्यात्पंचवृक्षाणिवैजपन् पंचवृक्षाणिसद्योजातादिपंचमंत्राः प्रदक्षिणासंख्यामाह शिवरहस्ये शिवप्रदक्षिणांकुर्यात्स्वयमष्टोत्तरंशतं सहस्रमयुतंल
क्षंकोटिरन्येनकारयेत् सनत्कुमारसंहितायां शिवेप्रदक्षिणांकुर्याल्लिंगमष्टोत्तरंशतं लैङ्गे शिवेप्रदक्षिणाः कार्याद्वादशैकादशाथवा सौरपुराणे प्रदक्षिणात्रयंकुर्या
च्छिवस्यायतनेनरइति अन्यत्रच एकावर्णादेः सप्ततिस्रोद्योद्विनायके चतस्रोविष्णवेदद्याच्छिवेतिस्रः प्रदक्षिणाः अत्रशक्ताशक्तपरत्वेनव्यवस्था तदुक्तंशिवरहस्ये
प्रदक्षिणात्रयंकुर्यात्पापंचदशाथवा अष्टौद्वादशवाकार्याः स्वशक्त्यापिशक्तितः नैकंप्रदक्षिणंकुर्यात्साम्बस्यपरमात्मनः एकांप्रदक्षिणांकृत्वाशम्भोपुण्यात्प्र
तिपते प्रदक्षिणात्रयान्नूनंनैवकार्यंमहेश्वरे कालभेदात्संख्याभेदमाह शिवरहस्ये प्रातःपूजावसनेदविदशकार्याप्रदक्षिणाः मध्याह्ने द्वादशैकादशसायाह्निसाद्रं

प्रदक्षिणाप्रकारः स्कान्दे वृषभान्तरितो भूत्वा पीठं कान्तरमेव च प्रदक्षिणं न कुर्वीत कुर्वन्किल्विषमश्नुते देवीपुराणे सव्यं व्रजेत्तेनोपसव्यं गणालं नैव लंघयेत् अस्यापवादो ना-
रदीये रत्नलिंगं बाणलिंगं पार्थिवं गंः कौसुमं प्रदक्षिणं कुर्वीत सव्येनैव यथोदितं सोमसूत्रं प्रपंचं च पत्रं वा चित्सुमंदरं अपसव्येन कुर्वीत सव्येनैव प्रदक्षिणं आश्रमभेदेन स-
व्यापसव्यव्यवस्था च माह पाद्मे अपसव्यं यतीनां तु सव्यं तु ब्रह्मचारिणे समासव्यं गृहस्थस्य ह्याश्रमोः प्रोक्तं प्रदक्षिणं सव्यासव्यं विजानीयाद्दक्षं सव्यमिति सूतसंहितायां
ज्योतिर्लिंगे रत्नलिंगे स्वयंभुवि तथैव च वृषचण्डादिनियमः सुरेश्वरि न विद्यते आदित्यपुराणे पश्चिमाभिमुखं लिंगं लिंगं नादिविवर्जितं गिरिलिंगं स्थललिंगं जललिंगं तथैव च
लिंगः स्वेनेष्टसर्वेषु कुर्यान्नानाप्रदक्षिणं पश्चिमाभिमुखे विश्वेश्वरादि गिरिलिंगं श्रीवकादि स्थललिंगं काश्यपादि जललिंगं वरुणेश्वरादि अग्निपुराणे सर्वदिक्षु महाभागे विभोः
कुर्यात्प्रदक्षिणां सोमसूत्रादिनियमो नास्ति विश्वेश्वरालये अथवा वृषचंडं वृषंचैव सोमसूत्रं पुनर्वृषं चंडं च सोमसूत्रं च पुनश्चंडं पुनर्वृषमिति वचनस्य प्रदोषप्रकरणपठितत्वात्प्रदोषे
सर्वलिंगेषु तथैव प्रदक्षिणा कार्या अत एव पश्चिमाभिमुखत्वादिमति प्रसवं बाधित्वाऽस्य प्रदोषे वृषचंडादिनियम उक्तप्रकारेण विश्वेश्वरेप्यासेन प्रदक्षिणा कृतेति सनत्कुमारसंहितायां
तथापि शिवरहस्ये सव्यासव्यविधानेन प्रदोषे शंकरालये नित्यप्रदोषपुरस्कारेणैव सव्यासव्यप्रदक्षिणाविहितः अथवा वृषचंडादिनियमप्रासादप्रदक्षिणाविषयं शिवालयेषु यः कुर्यात्सव्यास-
व्यप्रदक्षिणामिति यावच्छिवालयपदोपादानात् प्रदक्षिणारूपं कुर्यात्सः प्रासादसमंततः सव्यापसव्यन्यायेन महणात्मा शुचिर्नर इति लैंगे प्रासादपदोपादानाच्च शिवरहस्येपि वृषं चंडं
वृषं चैव सोमसूत्रं पुनर्वृषमित्युपक्रम्य एवं प्रदक्षिणं कार्यं प्रत्यहं शंकरालये इत्युपसंहारे आलयपदोपादानाच्च अथवा शक्ताशक्तविषयं तत्रापि अशक्तेनापि प्रदोषे सर्वथा कार्यं तदु-
क्तं शिवरहस्ये शक्तैस्तु सर्वदा कार्यं सव्यासव्यं प्रदक्षिणं इदं कार्यं प्रदोषे तु शक्तैर्हीनैरपि द्विजैः प्रदक्षिणायां नियमश्चोक्तो लैंगे शिवप्रदक्षिणां कुर्यान्मृदुगत्या शुचिर्नरः नतिष्ठन्ना-
पि धावन्शनैः कुर्यात्प्रदक्षिणां भविष्ये आसन्नप्रसवा नारी जलपूर्णं घटं यथा उद्वहन्ती शनैर्याति तथा कुर्यात्प्रदक्षिणं पदे पदांतरं गत्वा करौ चलनवर्जितौ वाचा स्तोत्रं मनो ध्या-

नं चतुरंगं प्रदक्षिणं नारदीये शिवप्रदक्षिणायां तु सोमो नं कार्यं प्रयत्नतः कृतं जल्पिपुरे च शिवस्मरणपूर्वकं बृहन्नारदीये शिवं प्रदक्षिणीकुर्वन् सोमसूत्रं न लंघयेत् लंघयित्वा क्रमे
णैकं स्यात् लंघनात् पुनस्त्रयं सोमसूत्रमानं सिद्धान्तशेखरे प्रासादविस्तारसमानसूत्रं सोमस्य सूत्रं दिशि सोमसूत्रं सूत्राद्बहिर्लिंघनं तेन दोषः सदोषमध्यं नालं लंघने तु अस्यार्थः ते नैव कृतः प्रा
सादमध्यलिंगमवधीकृत्याप्यर्धपर्यन्तं सोमसूत्रमानं तावत्यानं नाभिन्नेवाहि नालं लंघनीयं कस्यां दिशि सोमस्य दिशि सोमः श्रीदस्यादिगुत्तरा तत्स्वामित्यर्थः ततोत्र न सोमसूत्रं न लंघनेन दो
षः किंतु एकमेकं प्रदक्षिणाफलं न दलंघने तु पुनस्त्रयं प्रदक्षिणाफलं स्यादित्यर्थः यथा स्मृति आख्याने त्वेकमेकं स्यादिति नोपपद्यते तत्र लंघनस्य निषिद्धत्वात् सोमस्य दिशी त्युपलक्षणं
तेन प्रणालीं न संलंघयेदित्यर्थः काष्ठलोष्ठादिभिराछिन्नायां तु न दोषः तदुक्तं स्वतंत्रसंहितायां काष्ठलोष्ठादिभिः छिन्ने लंघने नैव दुष्यति सोमसूत्रमनुलंघ्य गर्भे कार्या प्रदक्षिणा बृ
होपरि भवेद्गर्भे नो चेत्तत्र न सर्वथा सोमसूत्रमनुलंघ्य गर्भे सद्वृषभेपि च विहितं वा त्वविहितं सोमसूत्रं न लंघयेत् बहिश्चापिहितं त्वत्र मुल्लंघ्यं नैवं सर्वथा मोहादपिहितं सूत्रमुल्लंघ्य आमो
तिपातनं सोमसूत्रद्वयं पत्रेस्तुक्तः सोमसूत्रद्वयं यत्रास्ति तत्र सोमसूत्रं लंघने न दोषः प्रदक्षिणा देवागारस्य गर्भे न कार्या यस्य कस्यापि देवस्य साक्षात्तत्रानलंघने महाहानिर्भवेत्त
स्माद्बहिः कार्या प्रदक्षिणेति शिवधर्मोत्तरे दोषो पादनात् नेशीशं कर्यो मध्ये नगन्त मंडपे चनेति श्रीतरागमन्निषेधाच्च शिवरहस्ये प्रदक्षिणाप्रकारस्तु द्विविधो वेदसंमतः सव्या
पसव्यः सम्यक्त्वनत्राद्येविधिरुच्यते वृषं चंडं वृषं चैव सोमसूत्रं पुनर्वृषं चंडं च सोमसूत्रं च पुनश्चंडं पुनर्वृषं यत्र प्रदक्षिणे तु नाति स्थानानि नवसत्तम नतामुल्लंघनीयानि वेश्मा
गारे नेद्विजैः प्राग्द्वारं देवदेवस्य वृषस्थानं प्रकीर्तितं वृषस्य तु मुखं त्वेवं पश्चिमाभिमुखमुत्तमं देवस्य नैर्ऋतं स्थानं चंडस्थानं प्रकीर्तितं पश्चिमाभिमुखे लिंगे स्थानमेतदुदीरितं प्राङ्मु
खे शिवलिंगे तु चंडस्थानं द्विजोत्तम ईशानभागे विज्ञेयमन्यत्र तु न सर्वथा महेशस्योत्तरं स्थानं सोमसूत्रस्थलं स्मृतं पूर्वाभिमुखलिंगे तु नियमोयं प्रकीर्तितः पश्चिमाभिमुखे लिं
गे सोमसूत्रं शिवस्य तु पूर्वस्थानं तु विज्ञेयमन्यत्र तु न सर्वथा त्रीण्येतानि स्थलान्येव नवस्थानानि यत्नतः एतेष्वेव त्रिराहृत्य नवस्थानप्रकल्पनं नैवेद्यैकैकमाहुस्तान्यन्येवा

त्रपुनःपुनः यत्नेनावर्तनीयानि नवतत्वानि तानि ततः उपविश्य वृषस्याग्रे संकल्पविधिपूर्वकं कृतांजलिपुटो मौनी चैव स्थाने बृजेत्ततः ततो वृषेशमप्राप्य सोमसूत्रं बृजेद्द्विजाः सोमसू
त्रमनुलंघ्य चैव स्थानात्तु वृषं बृजेत् स्थानात्मेवं समावृत्य वृषमेशं पुनर्यदा प्राप्नुयान्नियतो भूत्वा देवं स्थाप्य प्रदक्षिणं सव्यापसव्यरूपेण चैव दिक्केन प्रदक्षिणो प्रदक्षिणाविधिः प्रोक्तो ज्ञात्वा
त्रैरूप्यमेव हि एवं प्रदक्षिणं कार्यं प्रत्यहं शंकरालये यथा च मोहाद्धमसा सततास्पादस्यथाकृतं दिवासंध्यानुकर्तव्यं नरपिशाचित्वोदितं नरपिंडजमात्रस्यानित्यमेव न संशयः पश्चिमाभिमुख
लिंगलक्षणमुक्तं सिद्धांतशेखरे लिंगानां पश्चिमा योनिः प्रभवाय पतनः पश्चिमाभिमुखं प्राहुर्योनिस्थमिति तद्विदः इति प्रदक्षिणा अथ नमस्कारः बुत्वैवैतेषजपित्वा महादेवं लिं
गरूपिणमव्ययं प्रदक्षिणात्रयं कृत्वा प्रणमेच्छर्वं वच लैंगे साष्टांगो दंडवद्भूमौ प्रणामो भक्तिपूर्वकं कर्तव्यः श्रीमहेशाय देवदेवाय सर्वदा शिवधर्मोत्तरे ये कुर्वंति नमस्कारं मोहनाय
क्वचित्क्वचित् संपर्कोन्नैनुका लोभाद्विमानैः प्रयांति च काशीखंडे लिंगं समर्चितं दृष्ट्वा यः कुर्यात्प्रणतिं सकृत् सं देहो जायते तस्य पुनर्देहनिबंधने कूर्मपुराणे येन मंत्रि विरूपा
क्षमीशानं कृत्तिवाससं प्रसन्नचेतसो नित्यं तेषां नियतमंपदं तथा च व्यासः एवंविधे कलियुगे दोषाणामेकशोधनं महादेवनमस्कारो ध्यानं दानमिति श्रुतिः इति शिवरहस्ये अष्टां
गसहितः कार्यः प्रणामः पार्वतीपतेः कूर्मपुराणे नमस्कुर्यान्महादेवं ऋतं सत्यमितीरितं अष्टांगान्युक्तानि तत्रैव जानुबाहुशिरोवक्षःस्थं[illegible]गाष्टकं पद दंडवत्प्रणतासक्तेन
दष्टांगनतिर्भवेत् साष्टांगनमस्कारकरणे प्रत्यवायोप्युक्तस्तत्रैव यः साष्टांगं महादेवं न तमेत्सावधानतः स दष्टांग इति ज्ञेयः सत्यं सत्यं न संशयः लैंगे शिवस्याग्रे नमस्कारः
शिवदेहस्थितिस्ततः सद्यः पापनाशकृत्तस्मात्कर्तापापफलं भवेत् पतित्वा दंडवद्भूमावुत्थायोत्थाय भूरिशः प्रणामास्तु प्रकर्तव्याः शंकराय महात्मने यत्तु सिद्धांतशेखरे दंडप्रणाम
आद्यः स्यात्प्रणामोऽथ नमस्कृतिः अष्टांगैरथ पंचांगैस्त्रिभिरंगैस्त्रिधा स्मृतः शिरसा हस्तयुग्मेन करणोभ्यां चुबुकेन च बाहुभ्यां भवमष्टांगैः संस्पृश्य प्रणमेच्छिवं शिरो हस्तैश्च
जानुभ्यां पंचांगः प्रणमेच्छिवं शिरसा हस्तयुग्मेन त्रिभिरंगैर्नमेच्छिवं यथोचितं नमेद्देवं देशकालाद्यपेक्षयेति तदशक्तविषयं देशकालाद्यपेक्षयेति तत्रैवोक्तत्वात् नेदे ३

स्यायोस्यायसा छागान्प्रणामान्विंशत्तु त्रयन् यः करिष्यति यात्त्वं न स पापेभ्यो विमुच्यते कोमें प्रणामं त्रिमहादेवं दण्डवद्येयतानदा पतंति पापरिगयो वज्रसंतापितादिव यः शंकु
रायसां छागं प्रणामं न करिष्यति सदग्माकुलोऽपि कुलेषु पतित्वे वर्तते सद्यस्तिष्ठति संध्यावोक्तान्तत्रैव सदाशिवं नमस्कुर्यान्मंत्रेणाघोरं शतं शिवरहस्ये एकविंशति कर्तव्याः प्र
णामाः पार्वतीपतेः एकादशाथवा षड्वा नान्तो नगनाः कृतचनः त्वेऽपि नमस्काराः कर्तव्यमथि कंशास्त्रादित्ति चेत् ततोनूनं नकर्तव्यं शंकी हीनैरपि द्विजैः यत्तु नमस्कारत्र
यं कुर्यान्महादेवे सदा नरः इति तत्स्वशक्तिविषयं वृत्तवेवेते अग्रे पृष्ठे वामभागे समीपे गर्भमंदिरे जपहोमनमस्कारान्न कुर्याद्देवतालये अग्रे मृत्युमवाप्नोति पृष्ठे त्वपचयः स्मृतः
वामभागे भवेन्नाशो दक्षिणे सर्वकामदः अत्र दक्षिणाभागो देवस्य न त्वात्मनः तदुक्तं ज्ञानरत्नमालायां देवस्य दक्षिणे भागे नमस्कारं प्रकल्पयेत् नप्राप्तमयतः शंभोर्नैऋत्ये
पोषिदाश्रये नप्रतीच्यां यतः पृष्ठं तस्मादुत्तरसमाश्रये ननु वृत्तपत्तसकल्लत्वा मम दक्षिणामंडपे देवस्य दक्षिणो भागे स्थित्वा निर्वाणमण्डपे नमस्कारत्रयं कृत्वा सर्वपापैः प्रमु
च्यते इत्यादिकाशिखण्डे विश्वेश्वरस्य पश्चिमाभिमुखत्वात् मुक्तिमण्डपस्य वामभागे त्वसंभवात्तत्र नमस्कारविधानमनुपपन्नं स्यादिति चेन्न अत्र तु देवस्य दक्षिणा भागे स्थि
त्वा निर्वाणमंडपे इत्यनेन विशेषवचनेन मुक्तिमंडपे नमस्कारविधानेन सामान्यनिषेधबाधसंभवात् केचित्तु पश्चोः पशुपतेरग्रे दण्डवत्पतितं तस्यैव पततिपातकाः सर्वे नो तिष्ठति
कृतचनेति विशेषवचनेन सामान्यनिषेधं बाधित्वा शम्भोरग्रेऽपि दण्डनमस्कारः कार्यः इत्याहुः इति नमस्कारः ० अथ शिवपूजायामुदङ्मुखत्वमावश्यकं तदुक्तं सूतसंहितायां स्ना
त्वा मुद्वासने देशे गोमये नोपलेपिते समासीनः सदा मौनी निश्चलो दङ्मुखः शुचिः सोमशम्भुनापि देवस्य दक्षिणे भागे समासीनः सुखासने उत्तरास्यो विनीतात्मा स्मरन्मंत्र
करद्वये उदङ्मुखत्वेकारणमुक्तं पूर्वमेव प्राच्यमग्रतः शम्भोरिति कल्पकल्पतरौ गौतमः शिवार्चनं सदा प्येवं शुचिः कुर्यादुदङ्मुखः बृहस्पतिस्तु कालभेदेन दिग्भेदमाह शिवार्चनं
सदा कार्यं भुक्तिमुक्तिप्रदं नृभिः प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु चेति ० अथ नैवेद्यनिर्णयः कालिकापुराणे स्वच्छन्दस्य निर्माल्यं सवासाजलमाविशेत् सौरपु

राणे वरं विषमपि प्राश्यं शिवस्वं नैव भक्षयेत् विषमेकाकिनं हन्ति शिवस्वं पुत्रपौत्रकं लैंगे शिवस्वपरिपुष्टांगाः स्पर्शनीया न साधुभिः तेन कर्मविपाके ननन स्तेरौरवो कलः
सौरपुराणे तथा रवेश्च निर्माल्यं भक्षणालोभान्न भक्षयेत् भक्षणान्नरकं गच्छेद्विलंघ्यं च विमूढधीः तत्र च स्नानपूजाद्यं प्रतिगृह्णाति शंकरः यत्र नैवेद्यनिर्माल्यमलमुत्सृज्य येच्छिवं ब्र
ह्मपुराणे भूप्रदेशो यथा कश्चित्स्वदेहमलदूषितः असंस्पृश्यो भवेत्सोपि यो यस्यांगमलं स्पृशेत् तस्मात्तत्संस्पर्शो लिंगे नरो निर्माल्यदूषितः शिवपुराणे न धारयेत्क्वचिच्छम्भोर्निर्मा
ल्यं च न भक्षयेदित्यादिनिषेधाः अथ विधयः तथा जाबालोपनिषत् रुद्रभुक्तं भुंजीत रुद्रपीतं पिबेत् रुद्राघ्रातं जिघ्रेत् रुद्रान्नमश्नाति रुद्रपीतं पिबति रुद्राघ्रातं जिघ्रति तस्माद्ब्राह्म
णाः प्रशान्तमनसो निर्माल्यमेव भक्षयंति लैंगे पुष्पं फलं सुगंधं च वस्त्राण्याभरणानि च शिवार्पितानि स्वीकुर्यान्न स्यात्किल्बिषी भवेत् शिवाग्रे शिवनिर्माल्यं गृह्णीते वशिवद्वि
जान् स्वयमेवाश्नाति तु नरकं न प्रतिपद्यते सनत्कुमारे शिवः ब्रह्मचारी शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् तस्य पापं महद्दोषं नाशयामि न संशयः ब्रह्माण्डे मम मन्त्रं प्रयत्नेन निवेद्या
श्नाति यः सदा स भूपालः सर्ववेत्ता भवत्येव हि सर्वथा अनीतानागतं ज्ञानं भूपाल त्वं च शाश्वतं जातिस्मरत्वं सौन्दर्यमन्ने नैवेद्यस्य भक्षणात् मन्नैवेद्यमनुच्छिष्टमस्यानुच्छिष्टमु
त्तमं योश्नाति स तु सर्वज्ञः स भूपालोपि जायते निर्माल्यसलिलं पीत्वा देवदेवस्य शूलिनः क्षयापस्मारकुष्ठाद्यैः सद्यो मुच्येत बंधनात् शिवपदाभिषिक्तं यः पात्रे तोयं विवेज्जलं
सर्वपापविनिर्मुक्तः स याति परमां गतिं यः पादसलिलं शम्भोः करेणापि वहते यदि स मूढो नरकं याति यावदिंद्राश्चतुर्दश निर्माल्यं परमं पुण्यं नैवेद्यं पापनाशनं ब्रह्मचारिगृहस्था
नां यतीनां च विमुक्तिदं निर्मलत्वाच्च निर्माल्यं नराणां नैर्मल्यकारणं यद्यदल्पमहितं लोके तत्तद्भुत्तममर्पयेत् शिवलिंगार्पितं कुर्यान्नरस्तु स्वामिपार्वति उपवाससहस्राणि प्राजाप
त्यायुतानि च शिवप्रसादशिक्थस्य कोट्यंशेनापि नो समाः पत्रं पुष्पं फलं तोयमन्नपानादिमौषधं शिवार्पितं विना भुंक्ते सद्यो भवति किल्बिषी इत्यादिविधयः तत्र व्यवस्थामा
ह नारदः शिवानुभूतमखिलं निर्माल्यं परिभाष्यते भोज्यं धार्यमिति द्वेधा षड्विधं च तदुच्यते देवस्वं देवताद्रव्यं निवेद्यं च निवेदितं चण्डद्रव्यं बहिःक्षिप्तं निर्माल्यं षड्विधं तथा देवस्वं

भूम्यादिदासीदासचतुष्टयं हेमरूप्यकरत्नादि देवद्रव्यमिति स्मृतं यत्संकल्प्य च देवाय पत्रं पुष्पं फलं जलं अन्नपानादि तत्सर्वं नैवेद्यमिति कीर्तितं एतत्त्रिविधनिर्माल्यमनर्हमिति
कथ्यते प्रमादाद्भोजनं कुर्वन्भूमौ सस्यात्समंगलः शिवद्रव्यापहारेण नरकं प्राप्नुयान्नरः शिवोपभुक्तं स्रग्गंधमन्नपानादिकं तथा निवेदितमिति प्रोक्तं सर्वपापहरं परं स्थापितं
विधिना लिंगं सर्वैर्देवासुरैर्नरैः एतत्त्रिविधनिर्माल्ये चण्डेशाधिकृतः शिवः वह्निः शिवमनर्हं स्यात्स्पृश्यत्वकारणात् पिशाचानां च सर्वेषामधिकारोऽत्र सर्वदा निर्माल्ये बहुधे
भोज्यमेकमेव निवेदितं अतो यानि विधायकवचनानि तानि सर्वाणि निवेदितविषयाणि वेदितव्यानि यानि निषेधवचनानि तानि चंडद्रव्यादिपंचविधानिर्माल्यविषयाणी
ति व्यवस्था वेदितव्या ननु न केवलं चण्डादिद्रव्यस्यैव निषेधः किंतु शिवनिवेदितस्यापि भोजननिषेधोऽवगम्यते तथा च मनुना सामान्येन नैवेद्यभोजननिषेधः क्रियते अस्थ
त्रसूतकान्नं च नैवेद्यं श्राद्धमेव च पतितान्नं समूहान्नं राजान्नं चैव वर्जयेत् यद्यप्यत्र निर्माल्यशङ्काभावान्नैवेद्यनिषेधः शिवेतरदेवताविषयः स्युच्यते तदिदमास्तां स्कंदपुरा
णे विष्णुशिवयोर्मध्ये निवेदितभोजननिषेधोऽवधीयते निर्माल्यं च निवेद्यं च विशेषेण विवर्जयेत् रुद्रेणाभुक्तं निर्माल्यं न तथा देवतान्तरैः नैवेद्यं विष्णुना भुक्तं न तथा देवतां
तरैः निर्माल्यं च निवेद्यं च भुक्त्वा चांद्रायणं चरेत् शिवपुराणे च निर्माल्यलंघने दोषो धारणे च विशेषतः न धारयेत्क्वचिच्छंभोर्निर्माल्यं च न भक्षयेत् एवं प्रायकवचनबहुत्व
दर्शनात् प्रायेणापि शिवनिवेदितस्यापि निषेधो दुर्वार इति चेत्सत्यं शिवपुराणवचनबहुत्वदर्शनात् प्रायेण शिवनिवेदितस्यापि निषेधो दुर्वार इति चेत्सत्यं शिवपुराण
वचने निषेधस्य विशेषाभावात् चण्डद्रव्यविषयत्वे विरोधाभावः यद्विष्णुनिवेदितेन सह शिवनिवेदितस्यापि स्कन्दपुराणे भोजननिषेधवचनं रुद्रभुक्तं भुंजीत रुद्रपी
तं पिबेत् रुद्रघ्रातं जिघ्रेत् रुद्रेणात्तमश्नाति रुद्रेणापीतं पिबति रुद्रेणाघ्रातं जिघ्रति तस्माद्ब्राह्मणाः प्रशांतमनसो निर्माल्यमेव भक्षयंतीति प्रत्यक्षश्रुतिविधायकजाबालश्रुतिवि
रोधेन परास्तमेव श्रुतिस्मृतिविरोधे श्रुतिरेव बलीयसी स्मृत्याचारविरोधेन स्मृतिरेव गरीयसीति न्यायात् बहूनामल्पस्य बाध इति न्यायेन तद्विधायकबहुपुराणवचनेन अस्ये

कस्य तद्विरोधि नोवाधोपि स्यात्स्यः यद्वा गोत्रिकार्चितलिंगार्पितनैवेद्यके नैष्ठिकं किन्तु स्वार्चितानामेव तद्गुरुपुरःसरार्थप्रबोधे तत्र शूद्रजननष्टाच्युतोऽछिद्रं नकस्यतु भोज्यमित्युच्य
ते प्राज्ञैर्भोज्यं वैद्यकस्य तु तस्मान्निषेधविधायकवाक्यानि तान्यत्र कानिवेद्य तत्परिहारविधायकवचनानि वैद्यकनिवेदितविषयाणीति व्यवस्था कार्या ननु अदीक्षितानामनि
र्माल्यभक्षणं नरकप्रदमित्याद्या वाक्ये दीक्षारहितानां वैद्यकारइति चेन्न तेषामपि दीक्षासम्भावात् तदुक्तं स्कान्दे अन्निवेद्यकं निषानामपि दीक्षाविमोचनी इत्यादि शिवतात्पर्यं
स्थितोऽति च मलत्रयं अतो दीक्षितसाप्रोक्ता दीक्षा शब्दार्थवेदिभिः यद्वा निरतिशयनैर्मल्यनिधानस्य शिवस्य प्रसादत्वमतिशुद्धं तद्भक्तानामेव भोज्यं नाभक्तानामिति व्यवस्था
पकवचनवाकुल्यात् निषेधवचनस्येदृशस्य तद्भक्तविषयत्वं योजनीयं तथाह शिवपुराणे निर्माल्यं निर्मलं शुद्धं निर्मलत्वात्प्रदिष्टं तस्माभोज्यं तु निर्माल्यं प्राप्तं तेरशि
वास्मकैः लोभान्न धारयेद्यस्मो निर्माल्यं च न भक्षयेत् जिह्वाचापलसंयुक्तः शिवसंस्कारवर्जितः शिवनिर्माल्यभोजी च रौरवं नरकं व्रजेदिति अत्र शिवसंस्कारवर्जितानामेव शि
वनिवेदितमतिपावनमप्यभोज्यमिति निर्धार्यते अतः परमपावनं शिवनिर्माल्यं तद्भक्तैरेव परिभुक्तं भोज्यं नान्यैरिति व्यवस्था युज्यत एव अयमर्थः शैवसंहितायामासज्जे
मिनिसंवादेऽप्युच्यते तत्र जैमिनिः अतर्हमयमनैवेद्यं पादांबुकुसुमं दलं इतीश्वरेण कथितं इति कोविन्महर्षयः वदंति तत्कथं स्वामिन्पायंके कथयस्व मे व्यासः देवदेवस्य वचसो
विषयोयं तु जैमिने ये वीरभद्रशापेन शिवभक्तिपराङ्मुखाः शंभोरन्यत्र देवेषु ये भक्ता ये न दीक्षिताः तेषामनर्हमीशस्य तत्प्रसादं च तु ब्रूयं तत्रेश्वरवचनमपि मत्प्रियभक्तो निर्माल्यं
पादांबुकुसुमं दलं धर्ममर्थं च कामं च मोक्षं च दद्यते क्रमात् महालिङ्गधारिणो लोके दीक्षा कामस्य पयसः मेरकृशस्य तेषां योग्यं नैवान्यजंतुषु कामिकेपीश्वरवचनं अशुद्धात्मा
ऽशुचिर्लोभात्तु भुक्तं पावनं परं भस्ये नाशमाप्नोति संक्षेयश्च नादेव अत्र शिवभावनारहितेनानाराहितेनाशुद्धानां प्राकृतानां शिवनिवेदितभोजनं नरकसाधनमेव यथो
पनयनसंस्कारशुद्धिरहितानां शूद्राणां वेदाध्ययनमिति सिद्धं अतः शिवात्सनां शिवभुक्तान्नमावश्यकं नचापि चालनानामिति व्यवस्थितं तद्विधिनिषेधपरत्वमुभयवचना

नांगतिसामान्यमिति मंतव्यं यद्वा भोजनस्य रागतः प्राप्तत्वात् तदेव नियमयति भगवती श्रुतिः लिंगभुक्तं भुंजीयादित्यादिका तत्र लिंगनिवेदितसंस्कारवदन्नस्य भोजनत्वं नान्यस्येत्येवं गम्य
ते तस्य पुनः सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितमिति प्राप्तत्वोन्नान्ति भुञ्जीतेत्यादौ कालदेशनियमः क्रियते अतो लिंगनिवेदनसंस्कारवतामेवान्नानां भोजनभोग्यत्वं यथा
आधानसंस्कृतानामेवाग्नीनामुत्तरक्रतुयोग्यत्वं यथा वाध्ययननियमसंस्कृतानामेव मंत्राणां कर्मविनियोगार्हत्वं ननु सर्वं भुक्तं प्राणलिंगप्रसादत्वान्नोपवासं समाचरेदिति सु
पवासनिषेधः शिवरात्र्यादौ च शिवं महाव्रते शिवार्चकानामेव त्रिकालं पूजाविधिनियमश्च क्रियत इति न शंकनीयं तत्र पूजानिवेदितानामन्नादीनामेकीकरणे न स्थापनं कृत्वा परेद्युर्दु
तौ निवेदनस्वीकारेणापि न दधिविरोधः यद्वा तत्र पूजावसाने तत्तत् असितमनर्पितं भवतीति न्यायो नुसर्तव्यः यद्वा कर्मणा मनसा वाचा त्रिविधं च समर्प्येणां नो चेदनर्पितं भुंक्ते इति वचना
त शिवपूजावसाने नैवेद्यासंभवेपि कालांतरेणासंभवात् यद्यसंभवस्तस्य वा गात्यादि नायेन केनापि समर्प्य भोक्तव्यं अन्यथा प्रसादमेव भोक्तव्यमसत् गोमांसवत् समर्पितवचनो
क्तप्रत्यवायः स्यात् एवमकरणे प्रत्यवायवाक्यश्रवणात् ईश्वरनिवेदितभोजनस्य काम्यत्ववादः यद्वा ततः अत्र रागप्राप्तस्य भोजनस्य लिंगेनाभुक्ते अभुक्ते च यास्मिन्केनापि लिंगभुक्तमे
व भुंजीतेत्यनुक्त्वा लिंगभुक्तमिति श्रुत्या भोजने नियम्यते अत्र लिंगभुक्तं द्विविधं तदन्निवेदितं अन्यदेवतानिवेदितं च तथाप्यत्र तस्य हिताया यान्यदेवतानिवेदितभोजने दोषोऽभिधीयते शम्भो
र्निर्माल्यकं भुक्त्वा भुंजीयात्सर्वतो द्विजः अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेदिति स्कान्दे च प्रसादमन्यदेवस्य भुंजतां किल्बिषं भवेत् शिवस्यैव तु निर्माल्यं भक्त्या धार्यं द्विजातिभिः
अन्यच्च लिंगमर्पितं भुंजीयादिति प्रत्यक्षश्रुतिचोदितस्य लिंगभुक्तभोजननियमस्य तदुक्तानुवादित्वमित्यादिस्मृतिवचनानुपेक्षणीयानि नहि साक्षान्नापि कृपया उदीर्यमाणोऽर्थो दृष्टो वचन
संवादापेक्षास्ति बौधायनस्मृतौ शिवाराधनं शिवप्रसादोपसेवनं सांगमेव विहितं मनुनापि द्वयाक्षरो संपावपाय साह्यशन्तु लोके मासे देवानिवेदितानामभोज्यत्वस्य वचनात् न
दुष्टत्वायमेवं ततः श्रुत्यादिसकलप्रमाणप्रसिद्धेर्निरंकुशस्य शिवप्रसादस्वीकारनियमस्य न कुत्रापि पराहतिरिति मंतव्यं अन्यच्च रसान्नकृस्य जिह्वाग्रे श्वामोनीश्वरवचनात्

भक्तैः सकलैरपि शिवस्य प्रसादत्वादिकमेव तत्प्रसादमुपभोक्तव्यमिति साधुनिरूपितं विष्णुनापि नियमपूजासंख्यापूरणाय कमलपूर्त्तिनिमित्तया निजनयनमेवेश्वराय समर्पितं पुन
रपि तदीश्वरप्रसादत्वेन तल्लब्धं कथं न्यूपते अतः शिवनिर्माल्यं परिहर्तव्यं केनापि तत्र शाक्तैरितसेवैरपि मंतव्यं अन्यच्च निर्मलत्वाच्च निर्माल्यं । पत्रं पुष्पं फलं तोयं । उपवासस्य हस्ताग्निः ।
तिलयोः शिभागं च न रत्नमंबुकलशोपमं पादोदकं प्रसादान्नं सेवयामो हमाप्नुयात् इत्यादिबुद्धिर्वा निर्माल्यस्वीकारेणास्वल्पेनापि मोक्षोपभवमिति महाफलं निर्दिश्यते तत्कथमात्मानं म
हापातकभाजनं कुर्वते शिवप्रसादनिर्माल्यपरित्यागिनः पशवो वायते ये हिताहितं न जानंति स्वाद्याखाद्यं निवारणीयानि तस्मात् सर्वप्रयत्नेनेमं केशरणास्तेषामित्यादिना स्वपर्वचनपुं
जैर्यपरमेश्वरं प्रपन्नात्मदैकशरणः तत्क्षैकयेनितादेवतांतरविमुखाः भक्तिमंतो महापुरुषाः एधन्तश्च द्बुताः तत्र शिवप्रसादत्वात् स्वीकारेणोऽधिकारिणो नान्ये भक्तिहीनाः शिवेतर
बुद्धयस्तिसर्वं शिवमेव आपतन्न विशेषेतु लोभादपि धारणमात्रेण दोषः तदुक्तमाग्नेयपुराणे बाणलिंगे चले लोहे सिद्धलिंगे स्वयंभुवि प्रतिमासु च सर्वासु न दोषो माल्यधारणे नि
र्माल्यधारणेऽस्यार्थः लोहे धातुमये तथा स्थाने अन्यत्र शिवनिर्माल्यं पत्रं पुष्पं फलं जलं शालिग्रामस्य संसर्गात् सर्वं याति पवित्रतां इति शिवनैवेद्यनिर्णयः । अथ पर्वणि भेदेन
पार्थिवलिंगे सदभेदः श्लोकः याये श्वेतार्कवृक्षमी प्रसादं चेव गोदानं राज्यप्रदा भवेत् रक्ता च स्त्री प्रदा ज्ञेया लक्ष्म्यावैरिविनाशनी पुत्रकामप्रदा पीना बालुका मोक्षदा तथा वर्ज्यापतन्त्रैवो
क्ता श्मशाने मृतभूमौ च नौत्थिक्षेत्रे च यथा भवेत् उत्थरे ग्रामपार्श्वे च दुष्टकर्मस्थलेपि च नदीपारे वृक्षमूले छायायत्र विभीतकी मृत्तिका वर्जयेत् प्राज्ञ अमुच्यायत्र भूमिषु अथ पूजा
कालः लैंगे प्रातःकाले च मध्याह्ने सायंकाले सदा शिवं पूजयेत् भक्तिभावेन बिल्वपत्रादिभिर्मुदा ईश्वरसंहितायां प्रातर्मध्याह्नसायाह्नमहाहिरव्येकतः क्रमात् प्रातर्विधिकृतं ज्ञेयं म
ध्याह्ने काम्यकं तथा सायाह्ने शांतिकं ज्ञेयं रात्रावपि तथैव च काले निशीथे प्रोक्तं हि मध्ययामद्वयं प्रिय शिवपूजाविशेषेण तत्र कालेषु मोक्षदा पूजायोऽशाधाप्राहरस्ये कालविभेद
तः मुहूर्तद्वितयं तत्र कालस्तत्र शिवं यजेत् द्वात्रिंशत्कालभेदेषु केचित् पूजां प्रचक्षते कालस्तत्र मुहूर्तस्याधजेत्नातिमुहूर्तकं संपदाधिकतो ज्ञेयं सर्वमेतन्न संशयः वायव्यसंहि

नार्यां त्रिकालमेककालं वा पूजनीयः सदाशिवः शिवरहस्ये तु दोषपूजाफलं प्राप्तमुक्तं सायंकाले महादेवः पूजनीयोऽखिलैरपि महापातकयुक्तो वा युक्तो वा सर्वपातकैः मुच्य
ते पातकैः सर्वैः प्रदोषे शिवपूजया सर्वेष्वपि प्रदोषेषु तत्पूजा विशिष्यते प्रदोषकाले भगवान्महादेवः सुराधिपः करोति ताण्डवं देवीमुपवेश्य प्रभासने तांश्चाभिरतं देवं पूजये
त्सर्वथा नरैः प्रदोषे पूजाकरणे प्रत्यवायश्चोक्तस्तत्रैव सायंकाले महादेवं यो नार्चयति शंकरं स एव सर्वपापानामाश्रयो भवति ध्रुवं सायंसकाशं करस्य देवदेवस्य पूजनं
परित्यज्यान्यपरां प्राप्तैः संतिष्ठन्ते न संशयः सोमे नाराधयति यः सायं देवदेवोत्तमं शिवं सोपि शापो भवेच्छैव नात्र कार्या विचारणा यदा प्रमादः प्रदोषे पूजा आलस्यवशात्त्यक्षिय
ते नरः अष्टमी चतुर्दशी पौर्णमासी अमावास्या रवौ शुभविशेषेण प्रदोषे पूजा कार्या तदुक्तं शिवगीतायां अष्टम्यां च चतुर्दश्यां पर्वणो रुभयोरपि भूतिभूषितसर्वांगो यः पूज
यति मां विभो सोमवारे विशेषेण समे भक्तो न नश्यति सिद्धान्तशेखरे उत्तमं मध्यमं नीचं पूजनं तत्पुनस्त्रिधा प्रत्येकं त्रिविधं चेति नवधा कालभेदतः अष्टयामे च यजनमुत्त
मोत्तममुच्यते प्रातरारभ्य यामेषु सप्तसूत्तममध्यमं उत्तमाधममित्युक्तं षट्सु यामेषु पूजनं पंचयामार्चनं ज्ञेयं मध्यमोत्तममागमे प्रातर्मध्याह्नसायाह्ने निशीथे मध्यमध्यमं प्रातर्म
ध्यंदिने सायं मध्यमाधमं प्रातः काले च रात्रौ पूजनं त्वधमोत्तमं कनिष्ठमध्यमं ज्ञेयं प्रातः काले शिवार्चनं यथासंभवकाले स्यात्पूजनं त्वधमाधमं इति पूजाकालः ०
अथ शिवप्रकाशकामंत्राः प्रदर्श्यन्ते तत्र संहरणे रुद्राध्यायस्तत्रापि सारभूतो नमः शाम्भव इत्यादि शिवतराय चेत्यन्तो मंत्रः तत्रापि सारतमः पंचाक्षरः ततः ॐ सत्यमिति स
र्वो वै रुद्र इति विश्वभूतमिति कद्रुद्रायेति एष ते इति त्र्यंबकमिति यो रुद्र इति सद्योजातादि पंच ब्रह्ममंत्राः एतेषामन्यतमेन शिवार्चनं कुर्यात् तत्रापि पंचाक्षरो मंत्रः सर्व
मंत्रान्ते पठनीयः तदुक्तं शिवरहस्ये मूलमंत्रस्तु सर्वत्र शिवपंचाक्षरस्ततः पठनीयोऽन्यमंत्राणां मूलमंत्रस्तु सर्वतः मूलमंत्रोपमंत्रास्ते सर्वे मंत्रा यतः स्मृताः प्रणवस्य प्राशस्त्य
मुक्तं शिवगीतायां कुशपुष्पैर्बिल्वदलैः पुष्पैर्वा गिरिसंभवैः यो मामर्चयते नित्यं प्रणवेन प्रियो हि सः केवलप्रणवेनेत्यर्थः तदुक्तं नागरखण्डे पुष्पं फलं समूलं वा पत्रं स

त्विलमेववा योऽध्यास्यमाणे नैवतत्कोटिगुणितं भवेत् इत्यंयतिपरं अथलिंगप्रमाणविधिः तत्रलिंगप्रमाणमुक्तं विश्वेश्वरसंहितायां लिंगप्रमाणकं तदेवानां द्वादशांगुलमुच्य
ते ततोऽभ्यूनं न कर्तव्यमधिकं नैव दूष्यते कर्तुरंगुलमारभ्य नंसर्वथा नैव पूजयेत् अंगुष्ठमात्रमाने तु पूजामिच्छंति केचन चरे विप्राश्यते सूक्ष्मं स्थावरे स्थूलमेव हि क्रियासारे
नवाष्टसप्तांगुलिकं लिंगं श्रेष्ठमिहोच्यते षट्पंचकचतुर्मानं मध्यमं त्रिविधं स्मृतं त्रिद्व्येकांगुलमानं यत्त्रिविधं तत्कनीयसं एवं नवविधं प्रोक्तं चरलिंगं यथाक्रमं शिवरहस्ये का
यस्त्सप्तांगुलं लिंगं अथवा द्वादशांगुलं द्वित्रिपादांगुलं वापि मुष्टिशोधितयामल लिंगं षडंगुलान्यूनं न कर्तव्यं कदाचन ततोऽधिकं न कर्तव्यं स्वस्वशाखानुरोधतः इति पार्थिवमानं
अथ शैलादिमानं सिद्धांतशेखरे शैलस्यानवहस्तांतमुत्तमोत्तमकल्पना एषकीर्तिसपीठं वा तलं नाधिनवांगुलात् सिद्धये वरणान्नाधः चणकाद्यप्रशस्यते सुस्थानं सुप्रतिष्ठं
चेदधिकस्य न दूषणं मानोन्मानप्रमाणादि तेषु स्थाप्यं न वा बुधैः सान्निध्यकारणं शंभोरिति भिरेव प्रशस्यते हस्तादधः स्थितं शैलं प्रासादेषु न शस्यते यानि स्वयंभुवानि तेषां न
चमानप्रमाणता लिंगं स्वयंभुवं पूर्वे बाणलिंगमतः परं योनिस्थं वापि मुक्त्यर्थे भुक्त्यर्थे च प्रपूजयेत् पंच सूत्रप्रकारेण विष्णे वृत्तं वा चतुरस्रं वा त्रिकोणं वाष्टकोणकं वृत्तं स्मृतका
कारं षट्कोणं मणलाकृतिः उत्तमं बुद्बुदाकारं मध्यमं कुक्कुटांडवत् अधमं गोलकाकारं इति लिंगं त्रिधा मतं गृहस्थस्य विशेषेण वृत्तं पूज्यं हि सर्वदा अंगुलादिवितस्त्यंतं लिंगं गेहे प्र
पूजयेत् प्रासादे तु न दूष्यं स्यात् पूजनीयं प्रयत्नतः लिंगमस्तकविस्तारं पूजाभागसमं न्यसेत् नालं तत्त्रिगुणं कुर्यात् नालवसोटविस्तारं पूजांशाद्द्विगुणं कुर्यात् उन्नतं पीठमुत्तमं वृत्तं वा चतु
रस्रं वा मध्ये कंठसमान्वितं द्विगुणं लिंगनाहाच्च कंठनाहं समाचरेत् त्रिमेखलमधश्चोर्ध्वं समं स्यात् द्वाद्विमेखलं लिंगमस्तकविस्तारं षड्भागं विभजेत्ततः मेखलामेकभागेन कुर्यात् खातं त
तः समं लिंगदैर्घ्यसमं कुर्यात् प्रणालं पीठवाह्यतः विस्तारं तत्समं मूले तदग्रे चतुरर्धकं जलमार्गः प्रकर्तव्यः मस्तस्य मध्यत्रिभागतः कुर्यात् पीठाद्दैर्घ्यं वा प्रणालं च शिवोदितं सर्वेषां रत्नलिं
गानां सपीठत्वं विशेषतः लोहादीनां च लिंगानामेवं लक्षणमाचरेत् अस्यार्थं अंगुलादिवितस्त्यंतमुच्चं सपीठं लिंगं गेहे पूजयेत् पूजाभागो लिंगशालिका नालं परिधिः वेष्टन

श्रीलिं॰चं॰
३८

ऽभितियावत्कंठं तु पीठमध्यसंकुचितो भागः पीठं जलाधारो इति प्रसिद्धिः तत्र लिंगमस्तकविस्ताराद्द्विगुणं लिंगोच्चं विस्तृतपीठमुक्तं लिंगमस्तकविस्तारत्रिगुणो नालिंगस्थौल्यं पीठं वर्तु
लाकारं चतुरस्राकारं वा विस्तरनिम्नं तस्माद्वर्तुलाकारं चतुरस्राकारं वा लिंगमस्तकविस्तारसमं प्रमाणं देहे छेः मूले विस्तारं च तदर्द्धमग्रे विस्तारं प्रमाणं मूलाग्रविस्तारयोस्त्रिभागे तज्ज
लमार्गं खातं कुर्यादिति सर्वत्र संबंधः कंठस्थौल्यं लिंगस्थौल्याद्द्विगुणं लिंगमस्तकविस्तारखंडेन पीठघोमे खला खातं च कुर्यादिति निर्गलितोऽर्थः अयं पंचसूत्रप्रकारो पार्थिवेना
स्ति तदुक्तं सनत्कुमारसंहितायां पंचसूत्रप्रमाणं तु पार्थिवे न विचारयेत् अर्धर्वं तद्धि कर्तव्यं न द्विदर्वं करावचन द्विर्वस्तु प्रकुर्वाणो नैव पूजाफलं लभेत् रजतं हेमजं लिंगं पारदं स्फटि
कं तथा पार्थिवं पिष्टजं योध्यमखंडं तु प्रकारयेत्॥ अथ लिंगस्थापनविधिः लिंगस्थापनमुक्तं काशीखंडे लिंगं यः स्थापयेत्सम्यक् सम्यग्जन्म कृतार्थकृत् मुच्यते नात्र संदेहो विरुद्धः स्व
र्गभाग्भवेत् यास्ये पक्कस्मिन् शाम्भवे लिंगे विधिना स्थापिते सति कृमेत्र ह्येपराधानां पातं मोक्षं प्रपद्यते कूलार्णे ततुध्यति तथा शम्भुर्येन स्थापनतपो वृतैः यथानुध्येत्स लिंगे वि
धिना स्थापिते सति लैंगे नगोशस्य दाने न नस्वर्णशतदानतः तस्माल्लेलभ्यते लिंगे विधिना स्थापिते सति पावसर्वस्वभविष्ये चतुर्वर्गो लभ्यादि स्मृः प्रतिष्ठाप्य सुखाद्यैर्भिः
ब्राह्मणैः क्षत्रियैर्वैश्यैर्लिंगं स्थाप्यं प्रयत्नतः लिंगं हीयतिबीपि संस्थाप्यं तु यत्नेत्स्वदेति यत्नः स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर स्थापने नाधिकारोऽस्ति विष्णोर्वा शंकर
स्य चेति स्कांदे च तंतस्य कागतिरिति चेद्दुच्यते चतुर्वर्गोऽस्तिर्वंशः वचनाद्विश्वादि वृत्तिच्छायां शूद्रस्यापि कस्य लिंगस्थापने शूद्रस्य नाधिकार इति सिद्धं स्थापनकालाः सिद्धान्त
शेखरे श्रेष्ठोत्तरे प्रतिष्ठा स्थापने भक्तिमीहमानां दिवसरोहिमुहूर्तानां मलमासेन साध्यो इति हेमाद्रौ लक्षणसमुच्चये उत्तरायणगते भानौ लिंगं विधिना पीठं स्थापनमुक्तम्
संग्रहे स्थापनं नेष्टं तथा वै दक्षिणायने संग्रहे स्थापिते लिंगे व्याधिनाशो प्रजाः कुमाराः संप्रदीप्यंते कन्यानाशश्च जायते तस्मात्त्र स्थापयेल्लिंगं संग्रहे दक्षिणायने यतीनां
सर्वकाले कन्यानाशश्च जायते तस्मात्त्र स्थापयेल्लिंगं संग्रहे दक्षिणायने यतीनां सर्वकाले च लिंगस्थापनं मतं विष्णुधर्मोत्तरे चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा माघे

वासर्वदेवानां प्रतिष्ठा शुभदा सिते रिक्तां त्यक्त्वा तिथिषु स्यात् सावारे भौमवारे त्यक्ते तथेति तत्रैव आषाढे द्वे तथा मूलमुत्तरात्रयमेव च ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रपदा तथा हस्तो
श्विनी रेवती चैव पुष्यो मृगशिरस्तथा अनुराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते इति नारसिंह तथा अश्विनो महामासउत्तमः सर्वकामदः देवालत्र सदाशङ्करूपां भुनापि प्रतिष्ठिता भव
ति फलदा पुंसां कर्कस्थे च वृषस्थिते तिथि नेत्र नक्षत्रे नोपवासो न कारणं मात्स्यैरववाराह नारसिंहत्रिविक्रमाः महिषासुरहं अष्टस्थाप्यावेदश्चिरायने क्वचिन्निषेधः आ
द्रादि केस्वाति विरमकाले नक्षत्रं देशके स्थिते ऽर्के विवाहचौलव्रतबंधदीक्षासुरप्रतिष्ठादिनकार्यमेवेति वसिष्ठः मासे तपस्ये तपसि प्रतिप्रतिष्ठा धनापुत्ररोग्यकरी च कर्तुः चैत्रे महान्
मयेदा च भुङ्क्ते सा माधवे पुत्रधनप्रदा स्यात् ऊर्जे च कर्तुर्निधनप्रदा च सौम्ये सयोबेऽखिलदः स्वस्य स्यात् बलक्षपक्षः शुभदः समस्तः सदैव न त्याज्य दिनं विहाय अंत्यत्रिभागे परिद
मलक्षेप क्षेपि शस्तं खलु पक्षयोश्च रिक्तामवस्यार्कदिने च वर्जितं योगेषु वैनाशिक १३ वर्जितेषु दिने महासेव वि वर्जिते च शशांकतारा बलसंयुतेपि अथ वारशुद्धिः कौस्तुभ
दक्षेमकरं कुशानुभयप्रदं वृद्धिकरं रविर्ज्ञं च लक्ष्मीकरं सुस्थिरदं त्विनादिवारे वसुस्थापनमामनंति रत्नमालायां रोहिण्युत्तररेवत्यो मृगवासवरण्येद्रमाश्विनीवासववारुणधे स्वजीव
मेषु कुर्यान्नं विष्णोः प्रतिष्ठापनं पुष्यक्रमाभिजित्सुरे म्वरकयो विन्नाधिपत्वं स्यो मैत्रे तिग्मरुवेः करे तिर्ज्ञति मिदुर्गादिकानांशुभं गणाधिपतेरदृरक्षो यक्षभूतासुराणां मृगमक
गोसरस्वत्यादिकानां च पौष्णे श्रवसि सुगतनाम्नो वासवे लोकपानां निगदितमखिलानां स्थापनं च स्थिरेषु सिंहोदये दिनकृतो मिथुने महेशो नारायणश्च युवतौ घटभे विधाता
दिकोऽद्विमूर्तिभवने वुविनेशनीया सुराश्चरस्थिरगृहे निखिलाश्च देवाः केंद्रत्रिकोणभवमूर्तिषु १।४।७।१०।९।५।११ सकूहेषु चंद्रार्कभौमशनिस्त्रिषडायगेषु सांनिध्यमेति नि
पतं प्रतिमासु देवः कर्तुः शुभार्थे सुखसंपदरोग नाशं अपरे वनाद्वदन कालो दीपिकायां क्रवलखुमदवर्गो बाहतो विष्णुवेवे महदितिधनिष्ठे शोभने वासरे व त्रि३ दश १० मदन ७
जन्मेकादशे ११ शीतरश्मो विवुधलतिभोष्ठा नाडि न सत्रहीना नाडिनक्षत्रं त्रयोविंशतिनक्षत्रं अथ प्रयोगः तत्रादौ विप्राशीः सवं धुर्भुक्त्वा भ्याभूते निर्वर्त्य नित्यक्रियं श्रुत्तरी

श्री·लिं·च·
३५

लक्षणसंपन्नं गृहस्थं आचार्यं ऋत्विजश्च तादृशान् षोडशाष्टौ चतुरो वा विधिना वृत्वा वस्त्रालंकारादिभिः प्तोरवात् द्विगुणमाचार्याय ततस्तु पंचैर्वाद्यैः सह प्रतिष्ठास्थानं गत्वा

प्रासादं द्वारशाखं तं चतुर्द्वारं गगनाभ्यं लसोदुंबरं श्वस्थमग्रोधनतोरणालसद्द्वारशाखं हेमरत्नकलशधूम्रमौक्तिकविचित्रप्रवालस्त्वेनवर्णध्वजपताकादिभिः सर्वोपशोभितमंडपं न

मध्ये चतुरस्रां पंचहस्तां पंचहस्तोच्छ्रितां वेदिं च कारयेत् पश्चाद्द्वारसु कुंडानि हस्तमात्राणि चतुरस्राणि सयोनिमेखलानि स्युः आचार्यकुंडं मैशान्यां सर्वे होमस्तत्र तं प्रतिष्ठाप्यमंडप

स्योत्तरतो देवस्थापनमंडपं शुभद्रसंकाशैः कृत्वा अभिषेकसाधनानि स्थापयित्वा प्राक्पश्चाल्लाततो देवं प्रासादं प्रादक्षिण्येन नीय शुभासने देवस्थाप्य सर्वसंभारान् संभृत्य स्नातः प्राणा

नायम्य प्रतिष्ठाप्य देवतामंत्रेणा त्रिविधं मासंकृत्वा देशकालं स्मृत्वा अस्मिन् लिंगे शिवसान्निध्यार्थमायुः श्रीसर्वफलावाप्तिसुखकामः ईश्वरप्रीतिकामो वा लिंगस्य प्रतिष्ठां करिष्ये इति संकल्प

गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च कृत्वा आचार्यं ऋत्विजो द्वारपालान् तु स्मरणं सरस्वं चरत्वा तान्संपूज्य पेत् मधुपर्कादिना मंत्रमूर्तिभिर्वा तत्रापसंसारोच्चारेण कारक देवः

पूजार्हो यथास्थानं तु रक्ष मां कुर्मि च नः संसारभयभीतेन अयं पत्नः सुभक्तितः प्रार्थ्यतस्त्वत्प्रसादेन निर्विघ्नं मे भवत्विति आचार्यं प्रार्थ्य द्वारजापकान् ऋत्विग्भ्यो तत्र तत्र कार्ये नियोजयेत् अ

थाचार्यः प्राणानायम्य मंत्रदेवमयो भूत्वा यागभूमिं प्रासादं स्नानशालां चापोहिष्ठेति कुशोदकेनाभ्युक्ष्य सिंचन सर्षपान् प्रक्षिपेद्वा आपो नुयातुधाना अपसर्पन्तु विघ्नो देवयज्ञं तं रक्षन्त्विति

रक्षां कृत्वा प्रतिद्वारं कलशद्वयं सोदकं सपल्लवं स्थाप्य लोकपालानावाह्यार्चयित्वा प्रतिपत्स्य देवं प्रार्थयेत् स्वागतं देवदेवेश विश्वरूप नमोस्तु ते शुद्धेपि त्वदधिष्ठाने शुद्धिं कुर्मः सहस्व ता

ततो देवं शुद्धेन जलेन नाभ्यज्य उद्वर्त्तनद्रव्येणोद्वर्त्य उष्णोदकेन स्नपयित्वा पीठं ततः देवस्थाप्य सुगंधेनानुलिप्य धूपेन धूपयित्वा पुष्पैः संपूज्य नवोत्तमवाससोर्भ्यां वेष्टयित्वा परमात्मनेन वलिं

दद्यात् ततो लिंगमर्चां च द्वादशवारं मधुदक्षे नपंचगव्येन पंचामृतेन वासं शोधयेत् जाम्बारण्यवणहोस्नानच लक्ष्मी कं संगम दूरराजद्वारअग्निहोत्र सप्तस्थानान्मृत्तिकाः नीतां कलशोदकेन

स्नपयेत् द्वितीयकलशे क्षीरवृक्षशाखा चतृतीयकलशे ब्रीहिनीवारयवादि ... आपोहिष्ठा० यो वः शिवतमो रसः तस्मा अरंगमाम वः इति तत्स्मंत्रः

मेणाभिषिच्य समुद्रज्येष्ठेति सूक्तेन कलशचतुष्टयोदकेनाभिषिच्य पीठान्तरे निवेश्य वस्त्रयुग्मेनाच्छाद्याचार्यो देवमभिवेष्ट्य अलंकृत्य गंधपुष्पधूपदीपाद्युक महानैवेद्यैः संपूज्य तैजसपात्रस्थं
मधुसुवर्णशलाकया गृहीत्वा चक्षुर्देवानामिति मंत्रेण स्वयं पार्श्वे स्थित्वा सन्मुखे प्रबोधयेत् केनेत्रं समस्योन्मीलयेत् ततः कश्चिद्युतस्तिष्ठेत् अथादर्शे मसभोमानि रूपित्वा सवर्णेन
आगंधेन वाल्लक्षणांलिंगाकारं ॐ नमो भगवते हिरण्यरेतसे परापरमात्मने विश्वरूपाय उमाप्रियाय नमः इति मंत्रेण कीलितन्ययथाशास्त्रं पिप्लिम्भिः स्फुटं कारयित्वा रंध्रे नेत्रोन्मीलनं प्रतिमा
मुखलिंगविषयं तथा चारणत्र्यवंतलिंगे ऽपि विशेषः ततः पञ्चमानः सुवर्णशलाकां स्नानवस्त्रादिकं च पिप्लिस्त्रिनेत्रत्वात् आचार्याय दद्यात् वृद्धारोप्य यथाशक्ति हिरण्यं दद्यात् ततः उत्तिष्ठ
वृषभाख्यने इत्युत्थाप्य कनिक्रदज्जनुषं पाठैः सहमंडपं प्रदक्षिणे तद्वारेण देवं आनीय स्नानीयवेद्यां कुशास्तरे कोपप्रमुखवस्त्रेणाच्छाद्य प्राक्शिरसं देवं शाययेत् तच्छिरः प्रदेशे व
स्त्रैर्विष्टितं सपल्लवकलशं प्राणायामोपमूर्ध्नि स्वस्ति मुखं मंगलद्रव्योपरि प्रणवेनाव स्थाप्य समंतात् भक्ष्यभोज्यानि मंगलद्रव्याणि एवस्थाप्य मध्वाज्यसर्पिस्तिलपिष्टेन देवमाप्याययेत्
सर्वायुतस्यप्रतिमायां स्वेन विलोमतत्त्वं कर्णे लेकनिक्रदिति मंत्रेण वध्नीयात् ततो देवपुरुषादीनि यंत्राणि शांतितत्त्वानि निवेश्य मनोबुद्धिरहंकारश्चित्तं पृथिव्यप्तेजो वायुराकाशशब्द
स्पर्शरूपरसगंधश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थजीवप्राणाः इहैवागत्यास्मिन्सुखं चिरं तिष्ठन्तु स्वाहा ॐ हं सः स्वाहा इत्यधिवाससान्यावाहयेत् ततः सर्वस्वपुरुषसूक्तेन तु
स्वपूर्णरूपरसगंधं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थजीवप्राणाः इहैवागत्यास्मिन्सुखं चिरं तिष्ठन्तु स्वाहा
लापुष्पांजलिं दत्वा गंधपुष्पांजलिभिर्मंडपं वेदिं चाभ्यर्च्य तदुपरि देवस्याग्रे चतसृषु मंडलेषु स्वस्तिकलशं छित्वा तत्र मध्ये वृषभविम्बे शान्तिदिशं लोकपालान् तदनन्तरं तेषु अष्टौ वस्ते
कारयेदूर्ध्वाश्वारिमपि श्वेदेवसाध्यनासम्मतद्रव्याणि अन्यर्वा पूर्वसंधिगतप्रयुक्त्या नीर्थानितनयाविहंर्षे शतक्तुं इशानस्ने त्रयालापयथावकाशमावाहनं नामभिस्तत्र दिक्पालादिमंत्रै
र्बीचे पिता मन्तिष्ठाप्यदेवपार्श्वे रभ्योत्तमरत्नचोकार्याश्रीत्रियायागारग्निमानीयस्वकुंडे स्वगृह्योक्तमार्गेण अन्वाधाय देवस्यात्रकलासिध्यं पंचयज्ञेत्येतिसंकल्प्य प्रणीताप्रस्थापनांतं
कृत्वा तत्प्रतिष्ठाप्यदेवमावाह्य अग्रभ्यर्च्य तत्प्रकाशकमंत्रेण आरतिं भिर्वापल्लापोईं वरण स्थाप्य मार्गेण समीक्ष्य पित्ते रुद्रसहस्त्रमष्टशतमष्टाविंशतिं वाजुहुयात् ततो ज्यहोमे प्रमा

हुतिसंपातप्रतिकुंडस्थापितकलशेषु निक्षिपेत् ततः शिरस्युरसि पादयोर्देवं प्रति दक्षं कृत्वा स्पृष्ट्वा स्वस्वकरादि कृत्वा एतां हुतिं जपेत् एवं ऋत्विजोपि स्वस्वकुंडेषु कुर्युः पूर्वद्वारादि जाप
काः पुरुषसूक्तं शतरुद्रियं ज्येष्ठसाम नीलरुद्रसूक्तमावर्तयेयुः गायत्री श्रीसूक्तं अस्य छायावमास्यादि अधिवासनमेकरात्रं त्रिरात्रं वा कार्यं तत्रादौ विचित्रभूषितान्ते नरुद्रबलिः का
र्यः तत्रमंत्रः ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशूलधराय मातृपितायविश्वाधिपतये रुद्राय देवेन नमो नमः पिनाकार्हतं कर्मचालस्वाहेति भूतबलिस्तु अश्वत्थपर्णैः श्वालरो
म्य श्रपिता न्ते अधिवासनरात्रिसंख्यया चरस्थिलांस्थापात् ज्योमूतेगर्भगृहे स्थापितपीठिकायां देवाः देवस्याभिषेकं कृत्वा महीसूबु मातरं सुवृतानामिदेवीमावास्य अदितियोरिति
स्तुत्वा तस्तेरवामंत्रेण बोः शोपचारैः संपूज्य तेनैव मंत्रेण एतां हुतिं कृत्वा श्रा त्वं दुग्नीति सूक्तेन प्रासादं प्रोक्ष्य देवं प्रार्थ्य नुतिष्ठ ब्रह्मस्यतेऽस्मु श्राप्यतत्त्वनमेवाभिमुखं कृत्वा रत्नानि प्र
दर्श्य पुष्पांजलिं दत्वा पुरुषसूक्तेन स्तुत्वा आलस्येनेति ब्रुह्मरथेन गर्भगृहं प्रवेश्य अभ्यर्च्य पीठिकागर्भे रत्नं स्थित्वा रुद्रो वा घटादि स्तुइंद्रादिनामभिर्नमोंतैः वज्रमौक्तिकवैडूर्यशंखस्फटिक
पुष्परागेंद्रनीलमाहानीलपाकलान्नतु नमेरात्रिप्रवालगोधूममुद्गनीवारब्रीहिसर्वधान्यमाक्षतित्वा नसुवर्णरजतताम्रलोहत्रपुसीसकांस्याधपसन्तधातुजातं गर्ते निक्षिपेत् ह
रितालाभ्रकक्षमांजनमाक्षिकाशीसस्वर्णमाक्षिकगैरिकसौराष्ट्री रोचनामनः शिलादि निक्षिप्य धायसेन संलिप्य सौवर्णीपद्मं श्वभ्रे निधाय प्रणवेन कृतांगन्यासः सुलग्ने यममीप
तः परमेश्वरः इतिशलाकामपसारयेत् ततो देवं प्रपञ्चान्तस्यापोह्य त्वा प्रधानपुरुषौ यावद्वाचयन्दिवाकरो तावत्त्वमत्रपाशा स्नापुत्रो त्रैवस्थिरो भवेति उल्कार्धकाद्यो रितित्र्यंबंज
स्थायवं पवांईन रक्षास्थितमीशानस्थितं वालिंगं पीठिकायां श्वभ्रे निधाय स्थिरो भव शाश्वतो भवेस्तु क्वापि पिंडिकालिंगांतराले वालुकासीसकादि भिर्दृढं पूरयित्वा पुनर्नचालयेत् आचा
र्यः पुरुषसूक्तेनउपतिष्ठेत् यजमानस्तु स्वागतं देवदेवेशमद्भाग्यात्वमिहागतः प्राकृतं त्वां मदृष्ट्वा बालवत्परिपालय यावच्चन्द्रानलः सूर्यास्तिष्ठन्त्वत्रावधानितः तावत्त्वपात्र
देवेशस्थेयं भक्तानुकंपया भगवन्देवदेवेश त्वं पिता सर्वदेहिनां त्वयामातमिदं सर्वं जगत्स्थावरजंगमं त्वपिंडः पावकश्चैव यमो निर्ऋतिरेव च वरुणो मारुतः सोमः ईशानः प्रभुरव्य-

येन रूपेण भगवंस्त्वया मे प्रवराचरं तेन रूपेण वागत्य स्थिरो भव जगद्गुरो सकलत्रस्त्वां शरणं प्रपद्येति पुष्पांजलिं दद्यात् आचार्यस्त्व वा दिदृक्षाशांतिकलशोदकेन पंचामृतेनाभिषि
च्य पुष्पकुशांतोदकेन स्नापयित्वा पुनस्तल्लिंगामंत्रेण संपूज्य पादुकाभिषिक्तस्तु देवं स्पृष्ट्वा हे देव नंदिमहाकाल वृषभ भृंगिरिटि स्कंदेशमाविनायक विष्णुबृहज्जयं तेन अग्निपयपतिरुद्र निवहणावा
पुत्तोमे शानानागौरीगणगंधर्वगुह्यक विद्याधरादि परिवारा देवताः संस्त्रजयेत् लोकानुग्रहहेतवे स्थिरो भव सुखासने सांनिध्यं हि सदा देव अस्य हंपरिवर्जनं यः मा भूत्पूजाविरामो स्मिन्यजमानः
समध्यतां संपाल्यसततां राष्ट्रं सर्वोपद्रववर्जितं क्षेमेणवृद्धिमतुलां सुखमक्षयमच्युता मिति समार्थयेत् ततो यजमानः देवप्रतिष्ठासिध्यर्थं वस्त्रालंकारगो भूहिरण्य माचार्याय दत्वा तं
प्रार्थयेत् भगवन्सर्वधर्मज्ञ शिवधर्मपरायण मोचितोहं त्वया नाथ दुष्टेद्या भव बंधनात् ज्ञानतो ज्ञानतो वापि भगवन्यत्कृतं मया तत्सर्वं क्षमे वा स्व त्वत्प्रसादाज्जोत्रमेति ततर्द्धमृत्विग्भ्यः ततर्द्धंजा
पकेभ्यः ततर्द्धं सदस्येभ्यो यथाविभवं ब्राह्मणभोजनं यवमाचतुर्थाहं प्रथमे देवस्य मधुना द्वितीये हरिद्रापिष्टेन तृतीये सर्पो खंडपिष्टेन लेपनं स्नानं च चतुर्थे तु मनःशिलाप्रियंगुपिष्टेनोद्वर्त्त
अष्टोत्तरशतकलशोस्तदर्द्धं तदर्द्धसंख्यैः सक्षीरवृक्षत्वक्चूतपल्लवदूर्वापवसिद्धार्थादिमंगलद्रव्यतोयोदके गंगादिनदीवारास्थवा लशोमेहाभिषेकं कुर्युः सर्वे जलक्रीडां च प्रतिष्ठोपकरणमा
चार्येस्मत सघं पस्सेव हस्तमारणमधुकुंकुमादि सर्वं द्रव्येस्तद्दिनप्रवदेवं लेपयेत् ततः तास्मिन्नेव दिने नीतं ततो वालिंगमति ष्टांग तथा चंडप्रतिष्ठां कारयेदिति संक्षेपात्साध्वहिं गर्भगृहार्धस्त्र्यां तसलेर्द्धं
श्रामा चंडस्थाने चंडमूर्तिं संस्थाप्य पूजयेत् तथा लिंगपरतो वृषभं संस्थाप्य पूजयेत् यावत्तिष्ठति लोके स्मिन्देवदेवो महेश्वरः तावत्कालं त्वया देव स्थातव्यं शिवसन्निधाविति प्रार्थयेत् ० अ
यजीर्णोद्धारविधिः अग्निपुराणे जीर्णादीनां च लिंगानां मुद्धारविधिमाचरेत् लक्ष्मोज्झितं च भग्नं च स्थूलं वज्रहतं तथा संपुटं स्फुटितं व्यंगं लिंगमित्येवमादिकं इत्यादिदुष्टलिंगानां साज्यपिंडि
तथा वृषः लक्ष्मोज्झितं वाणादिश्रमे राजद्विधिनास्थापितं तल्लक्षणरहितमित्यर्थः भग्नं अनेकशकलीभूतं स्थूलं पिंडिकाननुरूपं वज्रहतं विद्युद्धतं संपुटं मुखं स्फुटितं एकदेशे भग्नं व्यंगा
डिकाप्रमाणत्वादिरहितं आदिपदेन चंडालस्पृष्टादीनां ग्रहणं पिंडीवृषयोर्दुष्टत्वे तयोरेवत्यागो न लिंगस्य चालितं चलितं निम्नमत्यंतं विषमस्थितं दिङ्मूढं पतितं लिंगं मध्यस्थं पातितं तथा

श्री लिं० चं०
४१

एवंविधं च संस्थानि ब्रीणां च भवेद्यदि नारेयेन प्रवाहेण तत्स्थाप्यते यदि ततोन्यत्रापि संस्थाप्यं विधिदृष्टेन कर्मणा निम्नं समानभूभागान्निम्नायां भूम्यवस्थितं विषमस्थितं पत्रद्वारादिकर्तुं न शक्यते तेन तस्मिं देशे व्यवस्थितं दृष्ट्वा विशेषविधाभावेपि दग्नितिरिक्तादिकं प्रणालीकं यातिर्नंगतो दोषो मध्यस्थं संस्थापितं गर्भान्तर्गतं प्रासादमध्यभागे स्थितमित्यपि केचित् एवंविधमित्यनेन लक्ष्मोऽसनमग्नस्फुटितविद्युद्धतादितिरिक्तानां ग्रहणं तेन तत्र स्थानिर्वृत्यापा शक्त्योपि लक्ष्मोरिसेताद्यतिरिक्तानामेवोपलक्षणं पिण्डिकातलं लिंगं निर्दोषं तु भवेद्यदि ततो वै स्थापयेत्तेन जपेत्वक्षमघोरकं स्रजेत्सदोषिकं लिंगं स्वपदाद्येश्वसेविनं लिंगान्तरं प्रतिष्ठाप्य विशुद्धिमधिगच्छतीति सिद्धान्तशेखरोक्तेः तत्रैव लिंगादीनां च जीर्णानां प्रोच्यते विधिरुत्तमो सर्वारिष्टविनाशार्थं सर्वेप्राप्तिहितार्थकः लिंगस्य पीठिकायाश्च प्रतिमामुखलिङ्गयोः सर्वेषां परिवाराणां हर्म्यप्राकारयोस्तथा उद्धारश्चाहुतिः प्रोक्ताः पीठद्वारे हेतुरुच्यते आहुतिः पुनः संस्कारः स्फुटिते खण्डितं भग्ने दग्धे वाशनिनाग्निना उक्तेः शत्रुभिश्चोरैः कीटाणुत्तोतसाहते लिंगे पीठादिके वापि विशीर्णे कालपर्ययात् देहं जीर्णं यथा देही त्यक्त्वान्मुद्गृह्णाति लिंगादीन्यपि जीर्णानि तथासंचालितदेवताः एवंदिनं चूर्णितं लिंगं प्रेताद्याश्राश्रयं तच लिंगाद्यं सत्वमस्यत्वात्तथा च वृक्षराक्षसाः कर्तुर्नृपाणां राष्ट्रस्य तदामस्य विशेषतः पीडां कुर्वन्ति तेत्युग्रां दुर्भिक्षं मरणाधिकं तस्मात्सर्वप्रयत्नेन कुर्यादुद्धाराक्रियां स्वायंभुवे चार्षे दैवे च बाणलिंगे तथैव च ऋषिभिश्च सुरैर्दैवैः स्तत्वविद्भिः प्रतिष्ठिते लिंगे जीर्णादिदुष्टेपि तोद्धारं तत्र कारयेत् इदमपि स्वायंभुवादिमन्त्रविषयं ननु देवात स्थाने नाशेन तत्स्थानस्थापितेऽपनीतनतादृशमन्त्रविषयं स्वायंभुवादि लिंगानां जीर्णयीठ्यपरि स्रजेत् उक्ते जीर्णादिदुष्टं भानुयं तु परित्यजेत् दिग्धूपतिदिनं स्थानान्तमध्यस्थं स्तोतदारुतं चोरादैश्चालितं लिंगं स्थापयेन्निर्वृणं पुनः लोहात्यंच्छितमिन्नाग्नं संधाय स्थापयेत्पुनः सुवर्णाद्यष्टलोहनिर्मितं लिंगं दैवाभ्यग्नं सतरेव संसज्य कृत्वा पुनः स्थापयेदित्यर्थः बाणपारद्योरेहीनां करणं नास्तात्यहीनकाम् तादृशी परिवाराणां प्रतिमां परिवर्जयेत् पद्धवंयत्नमाणं च लिंगं वा प्रतिमापि वा तादृशी नैव मानेन तद्द्रव्येण प्रकल्पयेत् कारयेत् नान्यमानेन नान्यद्रव्येण तत्पुनः नास्ताकारं च नान्यत्र स्थापयेत्तद्गुरुत्तमः स्तोतसाहते लिंगे प्रासादे वा तरन्यतः तत्समीपान्ते देशे स्थापयेद्गाधवर्जिते प्रासादे पतिते हर्म्ये गोपुरे मंडपादिके तदाकारं च तद्द्रव्येण तन्मानं तत्र कारयेत्

कर्मयोग्याधिलाग्नाद्याह्युदकाश्च तथाविधाः हीनं स्वल्पं तं हर्म्ये श्रेष्ठैर्द्रव्यैः समाचरेत् हीनं वाप्यधिकं मानं आकारं नैव कारयेत् एवमुक्तेन मार्गेण दोषैश्चैव विचार्य च लिंगपीठादिकं जी
र्णोद्धारं तथाचरेत् लिंगेपि न स्वतंत्रवाणादिनश्यंश्चे न विचारयेत् जीर्णं चोद्धारयेद्विद्वान् जीर्णं नैव तु चालयेत् जीर्णस्य धारणे दोषश्च जीर्णं चलने तथा तस्मान्नोधारये जीर्णमजीर्णं रक्षये
द्बुधः सुस्थितं दुःस्थितं वापि पूर्वलिंगं न चालयेत् शतेन स्थापनं कुर्यात्सहस्रेणानुचालनं अस्य श्लोकस्य चार्थो वर्ण्यते पुरुषार्थप्रबोधे नित्यं एकादिभिर्युक्तं जीर्णं यमपि सुस्थितं हीनं र
जादिभिर्लिंगमजीर्णमपि दुःस्थितं देवतास्थापितं लिंगं मोहान्मत्त्वमागतं तल्लिंगं दुःस्थितं वापितं त्रैराशिनिश्चितं सहस्रादिकहोमेन तस्य चालनमीरितं स्थापनं शतहोमेन तस्य लिं
गस्य चेदितं . . . . बहुविधेस्तत्रैदोषाश्च बहु चोदिताः परीक्ष्य बहुधा तांश्च जीर्णे लिंगस्य चोदितं स्यमुद्धरेत् हयशीर्षागमेपि जीर्णोद्धारविधिं तत्त्वं संक्षेपात्प्रब्रवीमि ते चलितो
त्पादिता भूमिः केनचित्पापकर्मणा चंडालांत्यजसंस्पर्शदूषिता वह्निना च या सद्भूतापतिता जीर्णा न दोषेगाद्पातिता अपुण्यजलसंस्पर्शाविप्रस्नानजदूषिता पतिताघर्विताश्लेष्मविण्मू
त्रादिविदूषिता निर्बृणताल्पलक्षणोपेतासंस्कार्यादिष्विके तत्र भूमिर्लिंगः मोक्षार्थमतिमार्थं चंडालपतितस्पृष्टा असंस्पर्शोनिषिद्धस्पर्शः जीर्णाकालवाऽल्पेन स्नापरिसंबंधे नैव विशीर्णा सव्र
णाएकदेशोपन्नादिष्विकउपासकः एवोक्तेन विधानेन वह्निकेन सुरोत्तम अचलां दूषितामेव स्थापयेद्विधिनोत्तमां एवोक्तेन विधानेन वह्निकेन सुरोत्तम अचलां दूषितामेव स्थापयेद्विधि
नोत्तमां एवोक्तेन बलाचार्यप्रतिष्ठाप्रकारेण एवंविधिना च स्वमाराप्रकारेणोत्तमतामित्यर्थः एवं वै पीठं परित्यज्य परस्परपितत्कृत्वं ततो यथोक्तविधिना प्रासादे सन्निवेशयेत् दृष्ट्वं सर्वासनं
परित्यज्यास्मिंस्तस्मात्तु तस्मिन्नासने यथोक्तेनाचलाचास्थापनप्रकारेण पुनः स्थापयेदित्यर्थः अति जीर्णं तथा भग्नं शांभवीं शैलजामपि परित्यज्य न्यसेदन्यां पूर्वोक्तविधिना गुरुः संहारवि
धिना तत्र मंत्रान्संहरेत्पिण्डिकः सहस्रं नारसिंहेन हुत्वा वा प्रहरेद्गुरुः संहारविधिना तत्र मंत्रान्संहरेत्पिण्डिकः सहस्रं नारसिंहेन हुत्वा वा प्रहरेद्गुरुः संहारविधिना प्रातिलोम्येन मंत्रान्क
लाः संहरेत्तोत्तमनारसिंहेन नृसिंहमंत्रेण होमद्रव्यमाज्यमस्य नादेशात् इत्थं संयोजयित्वा तु मंत्रैरणोद्धारयेत्पिण्डिकः शांभवीं दहेद्वह्नौ शैलजां प्रक्षिपेज्जले धातुजां रत्नजां वापि प्रक्षिपेत्

श्रीलिं॰चं॰
४२

मकरालये अगाधे वा स्वतोये च क्षिपेत्तथा महाजले रुद्रं रुद्रेण वाऽस्त्रेण संयोज्य मंत्रेण पाशुपतेन वा हृदयेनेति त्रिविक्रमः यानमारोप्य जीर्णं सांगोपांगं वस्त्रादिना गुरुः शंखदुंदुभिनिर्घोषैर्गी
तवादित्रनिस्वनैः नीत्वागाधं जलं सम्यग्भागीरथ्यामथार्णवे विश्वरूपेनापवीर्येण प्रक्षिपेन्नाननो गुरुः यानमारोप्येत्यानि सर्वोक्तमेव प्रतिपादनमितिकर्तव्यतां मंत्रोक्तं च विशेषतेनोद्देशेन वी
र्येण बीजेन गंगाभागीरथ्यादिजले तां प्रतिमां क्षिपेत् इत्यर्थः रत्नानि क्षिप्त्वा स्वरूपस्वर्णं स्वानुरूप्येण धेनवो दश वा पंच सवर्णवस्त्राद्यलंकृताः जीर्णोद्धारे प्रदातव्या गुरवे देवतुष्टये लिं
गांतर्निक्षिप्तानि रत्नानि स्वरूपस्वर्णं यजमानो रक्षयेत् पंच वा हेमवस्त्रादयलं कृत्वा गुरवे दक्षिणां दद्यादित्यर्थः भोजनीया विप्रमुख्यकाद्येयमन्नमवादितं त्रिणेत्रमुत्सवः कार्यः पंचसप्तमथा
पि वा बलिश्च विधिना देयो यथोक्तेन सुरोत्तम यथोक्तेनार्चनाचार्य प्रतिष्ठोक्तप्रकारेण ततो निवेदयेत्सांप्रतिमां लक्षणान्वितां निवेदये स्थापयेत् लक्षणादेवराजेंद्र तस्य दोषस्य शांतये
संपत्तिर्वा विपत्तिर्वा नो ये स्थानं तत्कारयेत् अथास्य पिंडिकां सर्वेमस्यां तत्र निवेशयेत् यद्वा आपन्नमार्गा च यामूर्तिश्चोद्धृता हरेः तद्वा तन्मार्गा च सामूर्तिस्तत्र कीर्तिता यन्मार्गांप्रा
कारं यन्मयं लिंगमुद्धरेत् तन्मार्गं तत्प्रकारं तन्मानं तत्र विन्यसेत् विहाय पिंडिकां सर्वां तद्दिने वापरं न्यसेत् द्वितीये वा तृतीये वा दिवसे स्थापयेद्धरं अतद्दैर्भवे दोषो विधिनापि निवेशिते
भग्ने नैव विधानेन लेप्यादिषु विसर्जयेत् लेप्यादी कुड्यलिखिताः प्रतिष्ठापिताः प्रतिमाः अन्यद्विकल्पयेत्तत्र तन्मार्गां तदाकृतिः एवं संक्षेपतः प्रोक्तो जीर्णोद्धारविधिस्तव सर्वेषामेव
देवानामेष साधारणः स्मृतः यो जीर्णं विधिना लिंगं संस्कुर्यान्मानवो भुवि फलं दशगुणं तस्य नूतनान्नात्र संशयः वापीकूपतडागानां सुरधाम्नां सतां च प्रतिमानां समानां च संस्कर्ता
यो नरो भुवि पूर्वं दशगुणं तस्य भवेन्नूतनान्न संशयः संशयोऽत्र न कर्तव्यो जीर्णसंस्कारकर्मणि मूलाद्दशगुणं प्रोक्तं पुण्यं कूपे प्रतिष्ठिते प्रतिष्ठितमिति भावे क्तः प्रतिमायां शतगुणं कूपादेः
परिकीर्तितं प्रतिमायां शतगुणं जीर्णसंस्कारणाद्भवेत् कूपप्रतिमयोर्दशगुणशतगुणयोरल्पत्वमहत्त्वापेक्षया अवस्थापन्नमग्निपुराणे सुस्थितं दुःस्थितं वापि शिवलिंगं न चालयेत्
शतेन स्थापनं कुर्यात्सहस्रेणानुचालनं पूजादिभिश्च संयुक्तं जीर्णं चाप्यसुस्थितं एजयारोहितं यत्र दुःस्थमपि दुःस्थितं अयं च चालननिषेधो विधिव्यतिरेकेण यदपि तत्रैव अप्सु रेणुनिभे

देवेशत्वद्विप्रतिष्ठितं जीर्णं च वाप्यथवा भग्नं विधिनापि न चालयेत् लिङ्गं सुरादिप्रतिष्ठापितं तच्छक्तिविषयं नतु दैवाच्छक्तिनाशे न तत्स्थाने स्थापितेषां नीतं न तान् दृशाच्छक्तिविषयं जीर्णो

द्धारप्रकारोप्यत्रैव पाद्ये मंडपमीशे वा प्रसन्नद्धारैकतोरणं विधाय द्धारस्तंभादिस्थंडिले संप्रपूजनं द्धारस्तंभादि शिवकुंभस्तंभनमिति त्रिविक्रमः मंत्रास्तं तर्प्य संस्थाप्य वास्तुदेवान् प्रपूज्य च इत्यलिं च वहिर्

त्वा समाचम्य स्वयं गुरुः ब्राह्मणान्भोजयित्वा तु शंभुं विज्ञापयेत्ततः दुष्टं लिंगमिदं शंभो शांतिहोमपुरःसरं चेत् तच्चलनात्ते विधिनास्याधितिष्ठ च मां शिव एवं विज्ञाप्य देवेशं शांतिहोमं समाचरेत्

मध्याह्ने सीरदूर्वाभिर्मूले नाभ्यादिके शतं ततो लिंगं च संस्थाप्य प्रपूजयेत् स्थंडिले तथा लिंगं लिंगाधिष्ठितदेवतां स्थंडिले संस्थाप्येमर्थः ॐ आपकेश्वरायेति नाम्ना मे न शिवार्चनं ॐ आपकेश्वर

हृदयाय नमः ॐ आपकेश्वरशिरसे नमः ॐ आपकेश्वरशिखायै नमः इत्याद्युक्तं इत्यंगमंत्राः तत्र तत्राश्रितं मंत्रं धारयेदस्त्रवेधतः सत्वः कोपीह यः कश्चित् लिंगमाश्रित्य तिष्ठति लिंगं

मत्कृपया वा ज्ञाभिर्ये त्वं तत्र गच्छतु विद्याविश्वेश्वरः शंभुः शंभुरत्र भविष्यति सहस्रं प्रतिमागं च ततः पाशुपतास्त्रेण हुत्वा शांत्यंबुना प्रोक्ष्य स्पृष्ट्वा कुशैर्जलं ततः स्थूलशिलापिंडीलिंगा

स्त्रकं देवतामागत्य पसंस्कारार्थं पाशुपतास्त्रेण हुत्वा शांतिकलशोदकेन देवं संप्रोक्ष्य कुशैः स्पृष्ट्वा होमसंख्यया पाशुपतमंत्रं जपेत् रत्नाद्यं च विलोमेन तत्त्वतत्त्वाधिपालनं मूर्तिमूर्तीश्वरा

लिंगपिंडिकासंस्थितान्गुरुः विसृज्य स्वर्णपाशेन वृषस्कंधस्य पातयेत् रज्वा वध्वा तया नीत्वा शैवमंत्रेण गणान् शनैः तज्जले निःक्षिपेन्मंत्री पुष्ट्यर्थं पायसं ततः स्थापयेद्वा नीतं च वायुभक्षेश

तेशतं दत्त्वा विधाय तच्छांतिमहापाशुपतास्त्रतः लिंगमन्यत्तत्तत्र स्थापयेद्विधिवद्गुरुः विलोमेन पराङ्मुखसंस्कं ततत्त्वाधिपमूर्तिमूर्तीश्वरवस्थं तेषु संवत्सरे जीर्णोद्धारविधिं व

क्ष्ये समासात्तत्त्वतोदितं ईशाने दक्षिणे वापि मंडपं पश्चिमामुखं कुर्वीत पूर्ववत्सर्वं एकास्यं चैकतोरणं पूर्ववत्सर्वं भाद्र द्वारपालार्चनं कुर्यात्स्थंडिले शिवार्चनं द्वारपालार्चनं मंडपम

त्रिधा प्रकारेण मंत्राणां तर्पणं कृत्वा वास्तुदेवार्चनं तथा मंत्राणां देवस्थापितकलानां अंतर्बहिर्बलिं दद्याच्छिवभक्तांश्च भोजयेत् शिवभक्तान्संचेति त्रिविक्रमः द्विजानुक्रमेण कांदीश्च ततो वि

ज्ञापयेच्छिवं दोषे लिंगमिदं दुष्टं शांतिरस्त्वस्य वो द्विजौ भवत्विति वचनेन प्रोक्तं तत्प्रावयेद्गुरुः तेन शिवेन प्रोक्तं शांतिर्भवत्विति वचो गुरुर्भावयेत् विज्ञाप्यैवं शिवं भक्त्या शांतिहोमं समाचरेत् म

धृताज्येन दुग्धेन स्वाभिर्मूलमंत्रतः शतमष्टाधिकं मंत्रं प्रत्येकं जुहुयात्ततः मंत्रं मूलमंत्रमुच्चार्येत्यर्थः त्रिभिश्च मधुरैः सार्द्धं समिधो धारमंत्रतः शांत्यर्थं वर्तुले कुंडे सहस्रं जुहुयात्ततः अथवा
स्त्रेणजुहुयाद्यात्रिभिश्च स्वरेणया वध्नीयात्कंकणं हेमं लिंगस्याज्ञानतोऽकरे लिंगस्योज्ञानंकरं भावयित्वा तत्र हेमं कंकणं वध्नीयादित्यर्थः लिंगसंस्थाप्य संरज्य रवोक्तविधिना ततः सांगं
संरजयेद्रत्नान्यादित्ले मापिकेश्वरं लिंगाश्रितानि भूतानि ताः येरस्त्रमंत्रतः यानि कानि च भूतानि तिष्ठंत्याश्रित्य लिंगकं सत्कानि बावत्यमानानि बुजंतु स्थानमोक्षितं विधाविधेश्वरैर्वतः
शिवो लिंगे भविष्यति इति रत्नाशिवस्याज्ञां ततो भागत्रये गुरुः हुत्वाहुत्वास्त्रमंत्रेण ततः पाशुपतास्त्रतः प्रतिभागं सहस्रं च वसिंचेच्छांतिहृद्रोरकैः वृषशिलापिंडलिंगात्मकवेदत्रभागत्रयं
संस्कृत्य त्रिसहस्रमस्त्रेणाहुत्वा तेनैव प्रतिभागं कलशसहस्रेणाभिषिंचेदित्यर्थः मूलमध्याग्रकैर्देवैस्तथा च जपमाचरे वृषशिलां मूलेन पिंडीमध्येन लिंगमग्रेणाभैस्यबेत्यर्थः प्राग्वत्पा
शुपतास्त्रं च जपेद्धोमस्यसंख्यया सद्योजातादिवक्त्रेषु घोरश्चैव पराङ्मुखं दुष्टलिंगप्रतिपत्तिमाह सोधं भूमौ पाशिस्यत्संत्यजं वाग्निना रहेत सौधं सुधानिर्मितं लिंगं लोहजं तेन कार्यं स्यात्
लजं वाप्सु निक्षिपेत् सुवर्णाद्यष्टलोहनिर्मितं भग्नं चेत्तेनैव सुवर्णादिना तत्कार्यमित्यर्थः नत्वतत्त्वेश्वरान् लिंगान् मूर्तिमूर्तीश्वरानपि लिंगस्थान्विसृजेन्मंत्री पीठवृषशिलागतान्
वृषस्थान्विसृजेत्तद्वद्गमूर्तिस्थितानपि ततः सुवर्णपाशेन रज्वा गोचर्मजातया वृषस्कंधस्य पावध्वा लिंगपीठं च चर्मणा शिवमस्त्विति तद्वाक्यसज्जनोद्धाहरेत्ततः उद्धार्यैव च लिंगस्य
तोदृषोप्रेरयेत्ततः वहिर्नीत्वा ततो लिंगपीठं वृषशिलाद्वयं रथादिकं समारोप्य समुद्रे निक्षिपेत्ततः स्थूललिंगोद्धृतो बध्वाग्रजं वाप्रेषयेत्ततः सोधं भूमौ पारिसज्य राहजं वानले दहेत्
सर्वं वा निक्षिपेत्तोये लिंगं वा प्रतिमादिकं ततः पाशुपतास्त्रेस्य शांत्यर्थं जुहुयाच्छतं लोकपालास्त्रभिस्त्व द्वात्रिंशं स्मेशतं शतं प्रतिदेवतं शतं जुहुयादित्यर्थः रक्षां कुर्यात्ततः पश्चान्महा
पाशुपतात्मना तन्मानं तत्समं पुंलिंगं तत्र संस्थापयेत्पुनः प्रतिष्ठोक्तेन मार्गेण सर्वकर्म समाचरेत् हर्म्यस्य परिवारस्य प्राकारादेः समुद्धृतौ सर्वेषामपि जीर्णानामेष एव विधिः स्मृ
तः कर्ताव्हरिणां स्थापुर्वादिस्थो यथोदितः पशुरूपं स्थापने मोजेतनकः लंभेतड्ढौ अथ मत्रनिर्गलितार्थः लक्ष्मोरिनसूदितविशीर्णस्य च सेवितानां लिंगानां तद्दर्शनोत्वाद्बुधा

दिषु रः कर्णेनासास्य हीनानां प्रतिमानां च विधुक्तप्रकारेण चालनं जलादिप्रतिपादनं च कृत्वा नूतनप्रकारेण तस्मिन्नेव स्थाने पूर्वसजातीयद्रव्यनिर्मितं तन्मानेन तदाकारं लिंगं तादृशीं प्र
तिमां च स्थापयेत् ॥ अतिजीर्णमिति स्वोक्ताद्धयशीर्षवाक्यात् पीठाद्यचालनं लिंगमिति नाशेत्सहायतं लिंगमिति वाद्युपादिशिरोहीनमिति पद्धयं पत्रमार्गाचेति च सिद्धांतशेखरोक्तेः अ
स्मादेव वाक्यात् च यात्राप्रतिपत्तिप्रयोजकदोषाभावाच्च स्वबुद्धिमान् विषमस्यादिः भूत्रानां चैवेध न्यालनं तेषामेव पुनः स्थापनं च भग्नदीर्णजीर्णपोलवयवानां प्रतिपादनं एवं कृत्वा नानां स्था
पनं अनेकशकलत्वेन चूर्णितत्वेन वोद्धार पुनः स्थापनाविधोरत्नेः चालितचलितपातितपतितमध्यस्थानांतु नोद्धारेन चमागः किंतु तेषामेव पुनः स्थापनं उद्धृतस्योद्धारसंभवान्निर्दुष्ट
त्वेन प्रतिपत्तिविघ्नप्रहेतेश्च एतेनैव नदीवेगाद्यपहृतानां नष्टशत्रुचोरादिहृतानां लाभे तान्येव पुनः स्थाप्यानि तेषामलाभे तु तादृशान्यन्यानि स्थाप्यानि निषिद्धस्पर्शदूषितानि निषिद्ध
जलस्पर्शविप्रकृततन्दूषितपतिताद्यर्चितम्लेच्छविण्मूत्रादिदूषितानां स्वस्थानस्थितानामेव पुनः संस्कारो नोद्धरणं नापि प्रतिपत्तिः अतिजीर्णमिति पाठाच्चालितमिति प्रजेत्सदोषितं लिं
गमिति स्वोक्ताद्वाक्यात् च यात् अनुद्धृतानामेव तत्रैव संस्कारसंभवात् स्थलांतरनयनविधानाभावाच्च एतेन स्वस्थानाच्चलितस्य विकृतस्य च विशुद्धतदाधारे यथैव मेवं च स्वस्थानात्स्थापनाच्च
लितस्य तु पुनस्तत्रैव प्रतिष्ठा स्थानांतरविधानाभावाच्चलितस्य विकृतस्य च मार्गतादृशस्यान्यस्य प्रतिष्ठा स्थानांतरविधानाभावाच्चलितस्य विकृतस्य च मार्गतादृशस्यान्यस्य प्रतिष्ठा
स्थूले सर्वपिंडीवृषलपीठादयुद्धारः प्रतिपत्तिविधानात्पिंडिकांतरादिनिवेशश्च भंगे तु सर्वपिंडिकादीनां भग्नत्वे एवमेव पिंडिकाद्यभावे तु पिंडिकाद्यंतरस्थानमात्रमित्यादि दृष्टलिंगा
नामिन्यग्निपुराणवाक्यात् लिंगे पीठादिके वापीति सिद्धांतशेखरवाक्यात् सर्वपीठं परित्यजेदिति हयशीर्षवाक्याच्च सवर्णादिनिर्मितभंगादौ तु तेनैव सुवर्णादिना तादृशं तादृशं ताव
त्परिमाणं च लिंगादि कृत्वा तत्रैव पुनः स्थाप्यं यदि तेन सुवर्णादिना तादृशं कर्तुं न शक्यते तदा समुद्रे क्षिपेत् रत्नजातु समुद्रपर्वसेप्रभा(?) रत्नजापदि [illegible] स्थकांतिं न जहाति तदा से
व स्थाप्येति त्रिविक्रमः लोहपंचीत्यभिन्नं(?) गमिति सिद्धांतशेखरवाक्यात् धातुजं रत्नजं वापीति हयशीर्षवाक्यात् ॥ इति जीर्णोद्धारविधिः अथ पापसंप्रयोगः यजमानउद्धार्य्याद

क्षिणस्यामीशान्यां वा पश्चिमद्वारे कृते तोरणं मण्डपं तन्मध्यभागे वेदिं पूर्वभागे वर्तुलं चतुरस्रं वा कुण्डं स्थण्डिलं वा पश्चिमे वास्तुपीठमुत्तरे वास्तुरूपास्थण्डिलं च कृत्वा कालादिसत्वामौलपूला
पन्तगुणफलकामोऽस्य प्रतिमायां चतुरश्रगुणफलकामो वा जीर्णादिदोषदुष्टस्य लिङ्गस्य लिङ्गस्य प्रतिमाया वा उद्धारं मुमूर्षणं वा करिष्यामीति संकल्पयेत् पिण्डिकाहवनं गतः प्रासादकल
शेषु ईश्वरप्रीतिकाम इति विशेषः सर्वत्रेश्वरप्रीतिकामो वा ततो गणेशपूजां स्वस्तिवाचनं मातृपूजां नान्दीश्राद्धानि नूतनप्रतिष्ठावत्कृत्वा तद्देवबुद्ध्याचार्यं स्वरस्यान द्वात्रिंशषोड
शाष्टौ चतुरो वा ऋत्विजो द्वारपालान् अष्टाष्टौ चतुरो वा वृत्वा वस्त्रालंकारमधुपर्कादिभिस्तान्पूजयेत् अथाचार्यो मण्डपपूजादि पिण्डिकाकुम्भपूजां तं कृत्वा वास्तुमण्डले महावेद्यां च देवतास्थापनं
च कृत्वा पीठादौ प्रणवेनासनं दत्त्वा ॐ व्यापकेश्वरहृदयाय नमः ॐ व्यापकेश्वरस्त्वस्थापय नमः ॐ व्यापकेश्वरशिरसे स्वाहा ॐ व्यापकेश्वरशिखायै वौषट् ॐ व्यापकेश्वरकवचाय हुं ॐ
व्यापकेश्वरनेत्रत्रयाय वौषट् ॐ व्यापकेश्वरअस्त्राय फट् इति मन्त्रैः पीठमर्चयेत् देवतां तद्द्वारे मूलमन्त्रेणार्चयेत् ततोऽग्निं संस्थाप्य लिङ्गे चालनार्थं मूलमन्त्रेण तिलाहुतिसहस्रं हुत्वा
मण्डलदेवताहोमं पूर्णाहुतिं च कृत्वा जीर्णं भग्नमिदं देवं सर्वदोषावहं नृणाम् अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन्कथिता त्वया जीर्णोद्धारविधानेन चनस्पतिच्छिन्नावहं तदत्राधिष्ठितान्देवानु
द्धरामि तवाज्ञयेति देवस्य जीर्णादेर्बंशा वपित्वा पिण्डिस्य पुनः सांगोपांगं विसर्ज्य यजमानस्य सौवर्णं कङ्कणं बद्ध्वा सौवर्णरज्जुनिबद्धेनोद्धृत्य समारोप्य ततः पापापर्यन्तदेशे वृषमूले अगाधनदी
ह्रदे वामदेवेन क्षिपेत् प्रतिमां तु प्रणवेन क्षिपेत् ताम्रजं चेत्तद्दुग्धे रहेत् रत्नजं लिङ्गं यदि निजकौन्तिमध्ये न भवति तत्र तद्देवं पूर्ववत्स्थापयेत् सुवर्णादिमयं तद्देवसान्निध्यं कृत्वा स्थापयेत् प्रासादे त्व
यं विशेषः प्रासादमन्त्रान्खड्गच्छुरिकायां वा संयोज्य ततः प्रासादं सिद्धिपर्यन्तं खड्गादिकमर्चयित्वा प्रासादे सिद्धे खड्गादिमन्त्रान्यथास्थानं प्रतिष्ठाकाले अस्य यजमानमभिषिञ्चेत् ततो लिङ्गं
प्रतिमां वा तत्रैव विधिवत्संस्थाप्य धूपं वाद्यघोषादिमन्त्रान्पठित्वा स्थिरीकृत्य चतुरस्रं संपूज्य प्रार्थयेत् ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर कर्तृराज्ञः
प्रजानां च शान्तिर्भवतु सर्वदा अस्मात्कर्मफलप्राप्तिर्नां चैव सुप्रीतो भव सर्वदेति इति जीर्णोद्धारविधिः ० अथ सामान्यतः प्राणप्रतिष्ठा प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसा

मायबीजात्मकं हंसि सकलजगत्सृष्टिस्थितिसंहारतिरोभावानुग्रहकारिणी परा प्राणशक्तिदेवतात्मा अं ॐ हुं सें लृं लॄं ॠं ऋं उं ऊं इं ईं आं अं ॐ अं नः अमुष्य सर्वेन्द्रियाणि मनोबुद्ध्यहंकार
रश्मित्रयं पृथिव्यप्तेजोवाय्वाकाशशब्दस्पर्शरूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थजीवप्राणा इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॐ हंसः सोहं स्वाहा इति प्राणप्रतिष्ठा
अग्निं समिं वाजं भरं रस तोनि सद्भेन अग्मुन्नारणं अग्निपरमागः अथ स्थापितलिंगस्य पुनः प्रतिष्ठा ज्ञावापवीपसंहितायां अनंतोपहतं लिंगं विशोध्य स्थापयेत्पुनः संप्रोक्षयेदुपहतम
नागपहतं यजेत् स्वयमुध्यातलिंगे चारिश्चे चार्ध्यं तथैव च आपीठपीठमावेष्य पक्वलात् संप्रोक्षणं विधिं यजेत् तत्पूर्वं तेषां प्रतिष्ठानावसोपते रथं श्रम्लमयं शुनां गंचजिह्वे ये लिंगं जलाशये संधान
योग्यं संधाय प्रतिष्ठाविधिमाचरेत् एकांहपूजाविहतो कुर्याद्विगुणमर्चनं द्विरात्रे तु महापूजां संप्रोक्षणमतः परं मासादूर्ध्वमनेकाहपूजायदि विहन्यते प्रतिष्ठैव कथ्यते केचित्केचित्संप्रोक्षणं क
मः वेणुविकल्पालिङ्गादेवं पूजापुरःसरं उद्वास्य यदि संधानं मामं वा पुनःमाचरेदित्यादि इति लिंगप्रतिष्ठा० अथ रसलिंगमहिमा पुरुषार्थप्रबोधे रसार्णवाभिधे ग्रंथे देव्या पृष्टो महेश्वरः अव
तारं रसेंद्रस्य माहात्म्यं चोक्तवान् पुरा देव्युवाच अवतारं रसेंद्रस्य माहात्म्यं च सुरेश्वर श्रोतुमिच्छामि देवेश वक्तुमर्हसि तत्वतः ईश्वर उवाच साधु पृष्टं महाभागे गुह्याद्गुह्यतमं त्वया अनुग्रहकरं धन्यं
लोकानामुपकारकं त्वं माता सर्वभूतानां पिता चाहं सनातनः द्वयोश्च यो रसो देवि महामैथुनसंभवः सरेतः शाम्भवं देवि पारदः कीर्तितो मया पारदो गदितो यश्च परार्थं साधकोत्तमैः सूतोयं मत्सु
तो देवि मम प्रत्यंगसंभवः ममदेहरसो यस्मात् रसस्तेनायमुच्यते दर्शनात्स्पर्शनात्तस्य भक्षणात्स्मरणादपि पूजनाद्रसदानाच्च दृश्यते षड्विधं फलं केदारादीनि लिंगानि पृथिव्यां यानि कानि चि
त् तानि दृष्ट्वा तु यत्पुण्यं तत्पुण्यं समप्रभा तस्मात्सम्यक् लिंगं संस्थाप्यं तु प्रयत्नतः सहस्रसम्यक् लिंगं भक्त्या संपूजयेद्यदि अनंतेशपदं गच्छेत् श्रद्धावान्को न भावयेत् रसलिंगं तु संपूज्य सर्वपापक्षयो भवेत्
वर्षेणाद्रुतिर्नंहति नमस्कारेण दुर्भगान् संपूज्य रसलिंगं तमाप्यते

(लिंगार्चन चंद्रिका समाप्ता)

श्री लिं. चं०
४५

